शारदा दीपावली विशेषाङ्कः

शारदा दीपावली १९७७

शारदा

शारदा

दीपावली

शारदा दीपावली विशेषाङ्कः

शारदा

शारदा दीपावली

वाचक-विज्ञापनवितरक-साहाय्यक-लेखक-मुद्रित-
शोधक-मुद्रकत्त्रेन शारदोपासना-परायणेभ्यः

दीपावली-नूतन-वर्षम्

शान्ति-पुष्टि-तुष्टि-सुख-समृद्धिकारकं भवतु ।

शारदा

संपादक वसन्त अ. गाडगीळ

शारदा शारदाम्भोज-वदना वदनाम्बुजे ।

सर्वदा सर्वदास्माकं संनिधिं सन्निधिं क्रियात् ॥

श्रीद्वारका-शारदा-पीठ-जगद्गुरु-श्रीशंकराचार्य महाराजः

कृपाशीर्वाद-प्रसादेन संवर्धिताय 'शारदा'-पाक्षिकाय

卐 एकोनविंश-वर्षारम्भोत्सवे शुभेच्छाः 卐

कृष्णं 'बिटको'-चूर्णं दन्तान् शुभ्रीकरोति ।

जे. डी. बिटको कॉस्मेटिक्स प्रा. लि.

नासिक-रोड (मध्य रेल्वे)

शृङ्गेरी-द्वारका-पीठ-श्रीशंकराचार्य-स्वीकृता शासन पुरस्कृता विश्वप्रिया

दीपावली १८९९ नोव्हेम्बर १९७७

शारदा

संपादकः वसन्त अ. गाडगीळ.

वर्षम् १९ अङ्को १ २

वार्षिकं मूल्यं रू. २० ❋ अस्य अङ्कस्य रू. २०-००

श्रीश्रीजगद्गुरु-शङ्कराचार्य-महासंस्थानम्, शारदापीठम्, शृङ्गेरी

Private Secretary
To His Holiness Sri Jagadguru
Shankaracharya, Dakshinamnaya
Sri Sarada Peetham
Sringeri-577 129 Karnataka

Ref. No. 8510/77
Camp : मदरास्
Date : 8-12-77

शारदा-संपादकेषु सादरा विज्ञप्तिः ।

ऐषमः अष्टादश-वर्षाणि समाप्य एकोनविंशे हायने पदं निदधानायाः शारदायाः दीपावली-विशेषाङ्कः ललिता-सहस्रनाम-स्तोत्र-नामावली-पवित्रितः प्रकाश्यत इति विज्ञाय प्रमुदितान्तरङ्गाः 'श्री'-चरणाः श्रीशारदाचन्द्रमौलीश्वरयोर् अकम्पयानुकम्पया पत्रिकेयं चिरम् अभिवर्धताम् इति आशासते ।

इति निवेदयिता
सि. वि. गिरिधरशास्त्री

अनुक्रमणिका ।

श्रीशृङ्गेरी-शारदापीठ-शुभाशीर्वादः		१
उत्तिष्ठत! जाग्रत! ... संपादकीयम्		४
श्रीद्वारका-पीठ-शुभाशिषः		५
शारदा-पञ्चरत्न-स्तुतिः	प. पू. भारतीतीर्थमहाराजः	८
जयोऽस्तु धर्माध्वर-दीक्षितानाम्	सं. लक्ष्मीनारायणमूर्तिः	१५
भारत-धर्म-मन्दिरे नन्दादीपः	सौ. शशिकला काकोडकर	१६
सपर्यापर्यायस्तव भवतु यन्मे विलसितम्	पं.श्री.ल.आठलेकर	१७
श्रीशृङ्गेरी-शारदा-पीठाधीश्वराः	एम्.व्ही.नरसिंहमूर्तिशास्त्री	२१
श्रीमदभिनवविद्यातीर्थगुरुसुवर्णमालास्तोत्रम्	के.के.शंकरन्	२४
विद्यातीर्थ-महेश्वर-चरणसरोजयोः प्रार्थना	पं.वा.बा.भागवत	२५
नैव सुरक्षितं धर्मपावित्र्यं हिमालये	सौ. सुलभा केङ्घे	२७
श्रीगुरुराज-नवरत्न-मालिका	एस्.एन्.कृष्णशास्त्री	२८
संस्कृत-सत्याग्रह-समर्थनम्	भवेश लश्करः	३०
जननि जगदम्बिके ! कुत्र त्वं शेषे ?	सूर्योदयः, वाराणसी	३१

शारदा-गौरव-ग्रन्थमाला

		रू. पै.
४९ संस्कृत-पत्रिका-विश्वम्	पं. वसन्त अ. गाडगीळ	१-००
५१ तुलसी-मानस-नलिनम् (क्रमशः)	प्रा. नलिनी साधले	—
५२ श्रमगीता	डॉ. श्री. भा. वर्णेकर	२-००
५४ सावित्री	पं. ओगेटी परीक्षित्	१-००
५५ श्रीगणपति-वाक्यार्थ-महासभा	पं. वसन्त अनन्त गाडगीळ	५-००
५६ श्रीललिता-त्रिशती-स्तोत्रम्	पं. वसन्त अनन्त गाडगीळ	१-५०
५७ श्रीललिता-सहस्रनाम-स्तोत्रम्	पं. वसन्त अनन्त गाडगीळ	३-००
५८ भासोऽहामः ।	डॉ. ग. बा. पळसुळे	५-००

भारते भातु भारती।

एकोनविंश-वर्षारम्भे शारदा-शुभचिन्तनम्

—सत्यनारायणः काब्रा

महाराष्ट्र प्लास्टिक इण्डस्ट्रीज्

सुभाषनगरम्, गुफा-मार्गः, जोगेश्वरी, मुम्बई ६०.

उत्तिष्ठत ! जाग्रत ! ....

शारदा। सर्वप्रिया संस्कृत-पाक्षिक-पत्रिका। स्वीय-प्रकाशन-वर्षाणाम् अष्टादशीं समाप्य प्रविष्टा संप्रति एकोनविंशतितमं संवत्सरम्। शारदा-जीवने गतं वर्षं क्रान्तिकारकं सिद्धम्। न केवलं शारदाकाराणां जीवने परं संस्कृतस्य इतिहासे अभूत-पूर्वा स्वर्णाक्षरोट्टङ्कनीया घटना घटिता। अघटित-घटना-पटीयसी-माया-महिम्नः परम-कारुणिकस्य परमेश्वरस्य संकेतेन। पारमेश्वर-संकेत-मूला सा घटना नाम राजधानी-दिल्ली-नगरस्य: संस्कृत-सत्याग्रहः। प. पू. द्वारका-पीठ-जगद्गुरु-शंकराचार्य-'श्री'चरणानां यत्र सक्रियः शुभाशीर्वादः। सूर्यपुरे — सूरत-गुर्जर-राज्य-संस्कृत-परिषदि समर्थितः प. पू. 'श्री'चरणैः 'शारदा'-काराणां सत्याग्रह-संकल्पः। सत्याग्रहे प्रारब्धे प्रेषिताः सर्वत्र तैः पत्र-तन्त्री-संदेशाः शारदाकाराणां सत्याग्रह-विषयिणीम् आत्मीयतां प्रकटीकर्तुम्। महती चिन्ता तैः प्रकटीकृता सत्याग्रह-विषये प्रबोधिताः च शासकाः सत्याग्रह-विषये। प. पू. शृङ्गेरी-शारदा-पीठ-जगद्गुरु-'श्री'-चरणैः अपि तेषां संचारे सर्वत्र भृशं प्रशंसितः संस्कृत-सत्याग्रहोपायः शुभाशीर्वादैः च सनाथीकृताः 'शारदा'काराः।

अङ्गुलिमात्र-गण्यान् कांश्चन शासन-चरणारविन्द-मिलिन्दायमानान् संस्कृतोपजीविनः स्वार्थमात्रनिष्ठान् आङ्ग्लशूद्रान् अपवादीकृत्य प्रायः संस्कृत-जगतीतले सर्वैः सादरं सबहुमानं सक्रियं च समर्थितम् इदं संस्कृत-सत्याग्रह-साहसम्।

नचिरम् एव श्रीतिरुपति-क्षेत्रे एकस्यां संस्कृत-सत्याग्रह-समर्थक-सभायां 'शारदा'कारैः साग्रहं यत् समर्थितं तदेव पुनरपि निवेदयामः। संस्कृत-विश्वेन त्यक्त-निद्रालस्येन सम्प्रति स्व-हित-रक्षार्थं दक्षेण भाव्यम्। आत्म-संरक्षण-वृत्तिं न्यून-गण्ड-मूलां विहाय संस्कृत-सत्र-पक्षस्य विजयार्थम् आक्रमकैः भवितव्यम्। अकिंचित्करं संस्कृत-विश्वम् इति लौकिकं भ्रमं सर्वेषां दूरीकर्तुं 'अमृतस्य पुत्राः' अपि वयं सति प्रसंगे शत्रु-बुद्धि-विनाशाय कठोर-वज्र-कुठार-तीक्ष्णतां स्वीयां परिचाययितुं न बिभीमः' इत्यपि सर्वे संप्रति जानन्तु। अयम् एव संदेशः संस्कृत-सत्या-

सत्याग्रहार्थं श्रीद्वारका-पीठस्य शुभाशिषः

राष्ट्रपति - उपराष्ट्रपति- महामात्य - शिक्षामन्त्रि - शिक्षासचिव-संस्कृताधिकारिभ्यः तथा 'शारदा'-कारेभ्यः प. पू. द्वारका'श्री'चरणैः प्रेषिताः तन्त्रीसंदेशाः —

1) Many Sanskrit scholars in leadership of Vasant Gadgil fasting near Parliament for maintain statusquo and promote Sanskrit, the mother language of All India (.) Your immediate intervention essential(.) Save Sanskrit and precious life of scholars without failure(.)

Jagadguru Shankaraeharya
Dwaraka Peeth Camp-Prabhaspatan

2) TO Pt. Vasant A. Gadgil, New Delhi.

With choicest blessings from His Holiness for complete and speedy suceess in your noble cause.

His Holiness Trusts the Janata Govt. will give proper place and Justice (which is long over due) to Sanskrit and God also will save you and bless you, with complete Victory.

Mahabalabhatta (Secretary)

ग्रहस्य । तं सर्वे सम्यक् समधिगत्य सर्वत्र प्रसारयन्तु । प्रतिराज्यं संस्कृत-संस्था-संघटनाः सत्याग्रह-शस्त्र-माध्यमेन समाजस्य शासनस्य च प्रबोधनार्थं बद्धपरिकराः सन्तु । शारदा-नूतन-वर्षारम्भे अयम् एव सत्याग्रह-दुन्दुभिः सर्वान् प्रबोधयति —

उत्तिष्ठत । जाग्रत । प्राप्य वरान् निबोधत ।

दीपावली-नूतनवर्ष-शुभचिन्तनम्

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशम् ।
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ॥
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यम् ।
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

THE SEA PALACE HOETL

with an of dignity commands
a beautiful View of the
BOMBAY HARBOUR
Telephone – 113012
Telex – Luxury 3252

Very near to Taj Mahal Hotel
26 P. J. Ramchandani Marg
BOMBAY 400 039

सौन्दर्य-विभवस्य मुम्बई-खातस्य मनोरम-दर्शनार्थम् —

दि सी पॅलेस हॉटेल

ताजमहाल-हॉटेल-समीपम्
२६ पी. जे. रामचन्दानी मार्गः
मुम्बई 400 039

पेपको मिल्स, खोपोली

महाराष्ट्रस्थः एकः अग्रेसरः कर्गज-कर्मान्तः

अस्माकं खोपोली-स्थिते कर्मान्ते औद्योगिक-वेष्टनार्थम् आवश्यकाः विविध-प्रकारकाः कर्गजाः पृष्ठपत्राणि च निर्मीयन्ते ।

*

पेपर अ‍ॅण्ड पल्प कन्व्हर्शन्स लिमिटेड

पञ्जीकृत-कार्यालयः
१९८३, शिवाजीनगरम्
फर्ग्युसन-महाविद्यालय-मार्गः
पुण्यपत्तनम् ५ (महाराष्ट्रम्)
411 005

कर्मान्तः
खोपोली
(कुलाबा)
(महाराष्ट्रम्)
410 203

दीपावली-नववर्ष-शुभचिन्तनम्

शारदा-पञ्चरत्न-स्तुतिः ।

(प. पू. श्रीशृङ्गगिरि-शारदापीठ-जगद्गुरु-
श्रीभारतीतीर्थ-स्वामि-महाराज-विरचिता)

श्रीमच्छङ्कर-देशिकेन्द्र-रचिते तुङ्गापगा-तीरगे
शृङ्गेर्याख्य-पुर-स्थिते सुविमले सन्मौनि- संसेविते ।
पीठे तां रवि-कोटि-दीप्ति-सहितां राराजमानां शिवाम्
राजीवाक्ष-मुखामरार्चित-पदां वन्दे सदा शारदाम् ॥ १

पादानम्र-जनार्ति-नाश-निपुणां नादानुसंधायिनीम्
वेदान्त-प्रतिपाद्यमान-विभवां वादादि-शक्ति-प्रदाम् ।
विद्या-कल्पलतां चतुर्मुख-मुखाम्भोजात-सूर्यायिताम्
विद्यातीर्थ-गुरूत्तमैर् अहरहः संसेव्यमानां भज ॥ २

ईषत्-स्मेर-मुखाम्बुजां कुचभरानम्रां त्रिलोकावनीम्
दैत्य-व्रात-विनाशिनीं कच-जित-प्रावृट्-पयोदां शिवाम् ।
संसारार्णव-मग्न-दीन-जनता-संताप-सन्नाशिनीम्
वन्दे तां शुभदाम् अनन्य-शरणः स्वान्ते सदा शारदाम् ॥ ३

कारुण्यामृत-वारि-राशिमनिशं केयूरहारैर् वृताम्
कामारेः सहजां कराब्ज-विलसत्-कीरां कुबेरार्चिताम् ।
काम-क्रोध-मुखारि- वर्ग-शमनीं कैवल्य-संपत्-प्रदाम्
कञ्जोद्भूत-मनःप्रियां हृदि भजे भक्त्या सदा शारदाम् ॥ ४

नित्यानित्य-विवेक-दान-निपुणां स्तुत्यां मुकुन्दादिभिः
यत्याकार-शशाङ्क-मौलि-विनुतां सत्यापित-स्वाश्रवाम् ।
नत्या केवलमेव तुष्ट-हृदयां त्यक्त्वान्य-देवान् अहम्
भक्त्या मे हृदयाम्बुजेऽनवरतं वन्दे सदा शारदाम् ॥ ५

श्री श्री जगद्गुरु शङ्कराचार्य महासंस्थानम्, शारदापीठम्, शृङ्गेरी

कटाक्षे दयार्द्रां करे ज्ञानमुद्रां । कलाभिर्विनिद्रां कलापैः सुभद्राम् ।
पुरस्त्रीं विनिद्रां पुरस्तुङ्गभद्रां । भजे शारदाम्बामजस्रं मदम्बाम् ॥

Sri Sarada Seva Samiti
Bombay

अपने परिवार के साथ हर साल
दिवाली का आनंद उठाने का सबसे
आसान तरीका आर. डी. स्कीम—
यानी हमारी रिकरिंग डिपॉजिट योजना।

हार्दिक शुभकामनायें

स्टेट बैंक

CHAITRA-SBI-261 Hin

सुवर्णयुग सहकारी अधिकोषः मर्यादितः
पुण्यपत्तनम् २

[सुवर्णयुग सहकारी बँक मर्यादित, पुणे]

२१५-२१६ बुधवार पेठ, पुण्यपत्तनम् ४११ ००२

स्थापना– २ ऑक्टोबर १९७३, दूरवाणी ४७१८

न्यास-स्थापकानां हितचिन्तकानाम् आश्रयदातृ-वर्गस्य
च शुभाशीर्वादेन स्वल्पकालावधौ अधिकोष-क्षेत्रे
साहसिकः प्रागतिकश्च पदन्यासः

मूल-भाग-धनम्	२	लक्षाधिकम्
न्यास-धनम्	११	लक्षाधिकम्
ऋण-धनम्	११	लक्षाधिकम्

★ आरक्षित-न्यासानाम् आकर्षक-योजना। प्रत्यावर्ति न्यासानां सौकर्यम्। आकर्षक-व्याजेन न्यास प्रबन्धः।

श्रीमतां सेवायां सदैव तत्परता

कृपया साध्यतां संपर्कः —

दि. अ. कुलकर्णी	**उल्हासराव शेडगे**	**श्यामकुमार श**
व्यवस्थापकः	अध्यक्षः	उपाध्यक्षः

— संचालक-मण्डलम् —

प्रतापराव गोडसे	धर्मराज राऊत	नारायणराव हरा
फिदाहुसेन कांचवाला	माधवराव भोसले	शंकरराव सूर्यवंशी
विठ्ठलराव घाटे	काशिनाथ रासने	विठ्ठलराव रायक
मुरलीधर लोण्ढे		दिगम्बर रासने

अग्निभयाद् दक्षाः भवत रेल-यान-कक्षेषु ।

मा वहत ज्वालाग्राहादि-पदार्थान् स्फोटकादीन् ।

मा प्रक्षिपत प्रज्वलित-शलाका-धूमवर्तिकाग्रादिकम् ।

मा प्रज्वालयत 'स्टोव्ह्'-सदृशीं मृत्तैल-चुल्लिकाम् ।

भारतीय-रेल-विधानम् अनु सर्वेषां स्फोटक-ज्वालाग्राहि-
विघातक-वस्तूनां प्रावासिक-यानेषु नयनानयनं
निरपवादं प्रतिषिद्धम् ।

विधि-भञ्जकाः दण्ड्याः स्युः ।

म ध्य रे ल्वे

समाज कार्याची आवड असलेल्या गृहिणीना संसारातील दैनंदिन जबाबदाऱ्या पार पाडीत असताना थोडीफार कमाईही करता येईल आणि त्यातूनच समाजसेवाही घडेल.

तुम्ही फक्त एवढंच करायचं तुमचे परिचित, मैत्रिणी, नातेवाईक, दैनंदिन व्यवहारातले छोटे दुकानदार, डॉक्टर यांना अल्पबचतीचं महत्त्व पटवून द्यायचं आणि पोस्टाच्या पुनरावर्ती ठेवींची व संचित मुदतीची खाती उघडण्यास प्रवृत्त करायचं आणि अशाप्रकारे जमा होणारी रक्कम वेळच्यावेळी पोस्टात भरायची. गप्पांतून किंवा कौटुंबिक समारंभ प्रसंगीही तुम्ही हे काम सहज करू शकाल

तुम्ही जमा केलेल्या गुंतवणुकीवर तुम्हाला ४% दराने कमिशन मिळेल समजा तुम्ही दहा हजार रुपयांची गुंतवणूक मिळवलीत तर तुम्हाला ४०० रु मिळतील आणि याच पटीत तुमची कमाई वाढत राहील त्यातून तुमच्या कुटुंबाला मदतीचा हात तर मिळेलच. पण तुमच्या हातून राष्ट्रसेवाही घडेल आणि तुमचा रिकामा वेळ निश्चितच सार्थकी लागेल

UNITED DESIGNERS

'महिलाप्रधान नेत्री' म्हणून आजच तुमचं नाव नोंदवा आणि स्वावलंबनाच्या दिशेनं पहिलं पाऊल टाका

आजच प्रत्यक्ष भेटा किंवा फोनवर संपर्क साधा :

- अल्पबचत संचालनालय, महाराष्ट्र शासन
  नवीन प्रशासकीय इमारत, मुंबई ४०० ०३२ दूरध्वनी : २९१३०६
- प्रादेशिक बचत संचालक, इस्ट ॲन्ड वेस्ट बिल्डिंग,
  ५५ अपोलो स्ट्रीट, फोर्ट, मुंबई ४०० ००१. दूरध्वनी २५००२१
- तुमच्या जिल्ह्याचे अल्पबचत सहाय्यक संचालक द्वारा—जिल्हाधिकारी.

आजच हे कुपन भरून अल्पबचत संचालनालयाकडे पाठवा
आपल्याला महिलाप्रधान क्षेत्रीय बचत योजने विषयी सविस्तर माहिती पाठविण्यात येईल.

नाव - - - - - - - - - - - - - - - - - -

पत्ता - - - - - - - - - - - - - - - - - -
- - - - - - - - - - - - - - - - - -

माहिती व जनसंपर्क महासंचालनालय, महाराष्ट्र शासन, मुंबई तर्फे प्रकाशित

विवाह, यज्ञयाग, प्रासंगिक, धार्मिक मंगलकार्यें सभासंमेलनें यांसाठीं

गिरगांवांतील भरवस्तींतील आधुनिक पध्दतीचें लोकप्रिय मंगल कार्यालय

धी य.गो.गं.फडके चॅरिटेबल ट्रस्टचे

यशोमंगल

फडके वाडी, विठ्ठलभाई पटेल रोड, मुंबई ४   फोनः ३५४१०५

□ श्री गणपती मंदिराचे पवित्र सान्निध्य

□ प्रशस्त हॉल व सोईस्कर खोल्या □ मुबलक पाणी

□ भरपूर उजेड व पंखे □ यज्ञमंडप व यज्ञकुंड

□ भरपूर मांडीकुंडी □ पाट, बैठका, लाकडी स्टेज.

झोंपाळा इत्यादि □ लाऊडस्पीकर व

एक्झॉस्ट पंखे

श्रीक्षेत्र धनकेश्वर, ता. अलिबाग, जि. कुलाबा येथें ट्रस्टची धर्मशाळा विनामूल्य वापरण्यासाठी देण्यांत येते

जयोऽस्तु धर्माध्वर-दीक्षितानाम् ....

(प. पू. श्रीशृङ्गगिरि-शारदापीठाधीश्वर-श्रीजगद्गुरु-श्रीअभिनवविद्या-तीर्थमहास्वामिनां षष्टयब्दपूर्ति-महोत्सवावसरे समुपहृता पद्यरत्नमाला)

अहो ! अद्य तावत् —

तुङ्गानदी-संगत-पावन-श्रीशृङ्गाद्रि-सुक्षेत्र-विभूषणं तत् ।
श्रीशंकराचार्य-कृत-प्रतिष्ठं, श्रीशारदापीठमधिष्ठितानाम् ॥ १
जगद्गुरूणां जनताहितार्थम् आसेतुशीताद्रिमनेकवारम् ।
मत्वा महान्तं श्रममप्यकिञ्चित्करं, स्वधर्मेण कृताटनानाम् ॥ २
श्रीचन्द्रशेखर-गुरूत्तम-संप्रसाद-लब्धात्मबोधमथिताखिलकल्मषाणाम् ।
शुद्धात्मनां सुमधुराभिनवाढ्य-विद्यातीर्थाभिधा-प्रथित-देशिकशेखराणाम् ॥
षष्टयब्द-संपूर्ति-महोत्सवोऽयं संचाल्यते संप्रति-शिष्यसङ्घैः ।
शुद्धात्मभिर् मद्रपुरे महद्भिः संभद्रमिच्छद्भिरिहाऽखिलस्य ॥ ४
अपूर्व सौभाग्य-समुज्वलः सन् महोत्सवोऽयं जयतात् जगत्याम् ।
चक्षुष्मतां श्रोत्रवतां समेषां मनस्विनां संमुदमादधानः ॥ ५

वस्तुतस्तु—

सत्यं ज्ञानमनन्तमौपनिषदं यद् ब्रह्म सर्वान्तरम् ।
नित्यानन्दघनं नितान्त-मधुरं तन्निष्कलं निष्क्रियम् ॥
स्वात्माभिन्नतया सदाऽनुभवतां नित्य-प्रशान्तात्मनाम् ।
सत्यं, लोकविडम्बनैव भवतां षष्टयब्द-पूर्त्युत्सवः ॥ ६

यद्यपि—

धीरा न हृष्यन्ति न च द्विषन्ति, जिजीविषां तद्विपरीततां वा ।
विज्ञानदृष्टया विकृतित्व-साम्यात् विभिन्नदृष्टिस्त्विह मादृशां, यत् ॥ ७
अतोऽर्थयामो वयमादिदेवं 'जगत्प्रभो ! शंकर ! चन्द्रचूड !
शतायुषोऽस्मद्गुरुसार्वभौमान् विधेहि लोकस्य हिताय शश्वत् ॥ ८

अपि च—

जयोऽस्तु धर्माध्वर-दीक्षितानां, जगद्गुरूणां जगतां हिताय ।
श्रीभारतीतीर्थ-विनेयवर्य-साविष्य-संदीप्त-महत्त्वभाजाम् ॥ ९

4-11-77 श्रीचरणशिष्यपरमाणुः
सिकन्दराबाद (A. P.) संनिधानं लक्ष्मीनारायणमूर्ति शर्मा

.... भारत-धर्म-मन्दिरे नन्दादीपः ।

(मद्रास-महोत्सवे गोमन्तक-मुख्यमन्त्रिणी-समर्पितः प्रणामाञ्जलिः)

सदाशिव-समारम्भां शंकराचार्य-मध्यमाम् ।
अस्मद्-आचार्य-पर्यन्तां वन्दे गुरु-परंपराम् ॥
गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
गुरुः साक्षात् परब्रह्म तस्मै श्रीगुरवे नमः ।

परम-प्रातःस्मरणीयाः, परमपूज्याः, श्रद्धेयाः, शृङ्गेरी-शारदा-पीठ-जगद्गुरु-श्री-चरणाः! तथैव परमपूज्य-श्रीभारतीतीर्थ-श्री-चरणाः! अखिल-भारतवर्षात् मद्रपुरं समागताः शारदा-पीठ-भक्तोत्तमाः! भगिन्यश्च!

शृङ्गेरी-जगद्गुरूणां परम-मङ्गले अस्मिन् षष्टचब्दी-पूर्ति-समारोहे श्रीचरणानां दर्शनेन स्वात्मानं पवित्रीकर्तुं तेषाम् अमृतोपदेश-श्रवणेन नूतनं सामर्थ्यं संपादयितुम्, उत्साह-धीर-शक्ति प्राप्तुम् अहम् अत्र समागता । न पुनः प्रवचनार्थम् । न मम तत् सामर्थ्यम् । नैव अधिकारः । परम् आदिष्टा अस्मि संयोजकैः अत्र 'वदतु किंचित्' इति । अतः अस्माकं सर्वेषां भारतीयानां— नहि नहि, जगतीतलवासिनां मार्गदर्शनार्थं धीर-उत्साह-सामर्थ्यं दातुं, धर्म-संवर्धनार्थम्, अस्माकम् इयं परमवत्सला, मातृ-पितृ-स्वरूपा, गुरुदेवता शत-शत-संवत्सरपर्यन्तं सर्वत्र संचार-प्रसादेन सद्-धर्म-उपदेशस्य अमृतविद्यावितरणेन सर्वेषाम् उद्धारं करोतु' इति संपूर्णस्य धर्म-विश्वस्य इयं प्रार्थना मया एतैः अमृतवाणीशब्दैः अत्र स्थाप्यते ।

भारतराष्ट्रं धर्म-मन्दिरम् । धर्मक्षेत्रम् । आधुनिके जगति धर्मस्य अधर्मेण, न्यायस्य अन्यायेन, ज्ञानस्य अज्ञानेन, दैवी-संपदः राक्षस-संपदा च युद्धं प्रारब्धम् । **यतः धर्मः ततः जयः । सत्यम् एव जयते ।** इति सर्वं सत्यम् । — परं तस्य प्रकाशनार्थम् अत्र अपेक्ष्यते: नन्दादीपः । कुत्र अस्ति सः नन्दादीपः ? शृङ्गेरी-क्षेत्रे । अस्य नन्दादीपस्य **अभिनवविद्यातीर्थस्य** भारतीतीर्थ-सहितस्य दर्शनेन अस्माकं सर्वेषां शुभं भवति । कल्याणं भवति ।

अतः पुनः प्रार्थये गोमन्तक-राज्यस्थां महालसां मङ्गेशं शान्तादुर्गां तथा श्रीशारदाम्बां चन्द्रमौलीश्वरं च यद् — **अयं धर्म-नन्दादीपः अखण्डं प्रकाशितः भवतु ।** एतैः वाक्यैः समर्प्यते मया सविनयं सादरं मम प्रणामाञ्जलिः परमपूज्य-श्रीजगद्गुरु-चरणारविन्दयोः ।

रॅशनल आर्ट अॅण्ड प्रेस प्रा. लि.

डिझाइनर्स, लेटरप्रेस तथा ऑफ्सेट-कलर-प्रिण्टर्स
रॅशनल बिल्डिङ्ग, अप्पासाहेब मराठे मार्ग:, मुम्बई २५
दूरवाणी 457388-39 400 025

दीपावली-शुभचिन्तनम्

सर्वप्रकारक-व्यावसायिक-विज्ञापन-मुद्रणादि-कार्यार्थम्।

शिल्पा अॅडव्हर्टायजर्स

१७१२-१-ब सदाशिव पेठ, पुण्यपत्तनम् 411 030

'शारदा' वर्धापनोत्सवे

शुभेच्छाः

पुण्यपत्तनम् – हितचिन्तकः

श्रीमतां ग्रन्थालये ग्रन्थरत्नं मासिकं वा अपेक्षते?
सर्वोत्कृष्ट ग्रन्थरत्नस्य नियतकालिकस्य वा कृते लिख्यताम्–

'कलाभारती'

१७१२-१-ब सदाशिव पेठ, पुणे ३०

CHIEF MINISTER
GOA, DAMAN AND DIU

SECRETARIAT
PANAJI

Date २१-११-१९७७

संदेश

भारतीय संस्कृतीमधील सर्व धर्म समभावाचे तत्त्व जोपासून वैदिक धर्माच्या थोर शिकवणुकीचा प्रचार व प्रसार करण्याचे महान् कार्य आद्य शंकराचार्यांनी स्थापन केलेल्या शृंगेरी-पीठामधून १४ व्या शतकापासून आजतागायत चालू आहे.

या पीठाला, वेदान्तपारंगत पूर्णयोगी, सदाचारी, विद्यावंत व सच्छील आचार्यांची सतत परंपरा लाभत गेली आहे. शृंगेरी-पीठाच्या तत्त्वज्ञानाचा प्रचार समाजात करणारी पीठाची पाक्षिक मुखपत्रिका 'शारदा' १९ व्या वर्षात पदार्पण करीत आहे, ही आनंदाची गोष्ट.

धार्मिक जागृतीबरोबरच भेदाभेदापासून अलिप्त राहून एकतेचा संदेश देण्याचे व भारतीय समाजात सदाचार रुजविण्याचे मंगलकार्य 'शारदा'-पाक्षिकाकडून अखंडित घडावे, हीच शुभ कामना.

सौ. शशिकला काकोडकर
मुख्यमन्त्री

श्री. वसंत अ. गाडगीळ,
संपादक,
"शारदा"
पुणे.

श्री श्री जगद्गुरु शङ्कराचार्य महासंस्थानम्, शारदापीठम्, शृङ्गेरी



श्री श्री जगद्गुरु अभिनवविद्यातीर्थ महास्वामिनः

Sri Sarada Seva Samiti
Bombay

सपर्या-पर्यायस्तव भवतु यन्मे विलसितम् ।

स्वस्तिप्रदं हस्तिमुखं प्रमुखं देवतागणे ।
गणेशाख्यं महाभिख्यं दद्याद् विद्यां महन्महः ॥

विश्वस्मिन्नस्मिन् क्षणमपि श्वसन्नवतिष्ठमानः पुरुषः लाभवानेव सर्वथेति निर्णयं प्रतिपन्नः किल कविकुलगुरुः। इत्थंगतेऽपि सन्त्येव भूयांसो दीर्घामायुषः सन्ततिं जुषाणाः पुरुषाः। कालः खलु परमकारुणिकः। स तावत् न किंचिदपि कुर्वाणं पुरुषं महत्तरं वर्षीयांसं संतनोति। परम् एतावच्चिन्तनीयं यत् नैसर्गिकोऽयं लोक-व्यवहारः। मानुष-प्रयत्न-विशेष-विभूषिता पुनः सुदीर्घा जीवन-यात्रा प्रतिष्ठाया आस्पदं भवति। मानस्थानेषु पुनर्विद्या पञ्चमी भवतीति श्रूयते। ये तावद् अत्र नक्तं दिवं नित्यानित्य-विवेक-परायणतया, जनता-हित-काम्यया, पर्याप्तया च परदेवता-सपर्यया, पूर्वेषां पथि वर्तमानाः ऋषि-कल्पाः अनल्प-तपोराशिं विरचयन्ति येषां च शास्त्रेष्वव्याहता गतिः बलवांश्च देवभाषायां पक्षपातः तेषाम् एव आयुर्वृद्धिं दिष्टिवृद्धिम् इव बहुमन्यते किल लोकः। त एते लोक-प्रबोध-कर्मणि भास्करायमाणाः नयनाह्लादकत्वे चन्द्रमसः, विचार-गाम्भीर्ये रत्नाकराः, व्याख्यान-सिंहासने वाचस्पतयः इदंप्रथमतया अभिनन्दनीयाः भवन्ति सर्वैः सर्वत्र सर्वदा पुरुषायुषाधिगमेन।

सोऽयं सकलोऽपि प्रस्तावः अविकलतया लोकसंग्रह-कला-कुशलान् **प. पू. शृङ्गेरी-श्रीचरणान्** स्पृशतीति वर्णनं पुनरुक्तभूतं तावत्। येषां किल आयुषा संप्रति प्रतिपन्ना विद्यते संवत्सरचक्रस्य एका प्रदक्षिणा षष्टि-वर्ष-लक्षणा, या खलु अक्षीणेन दाक्षिण्येन प्रमाणातीत-प्रणाम-पुरस्सरं भारताभिजनैः विद्याव्रत-विभूषितैः असंख्यैः संख्यावद्भिः अभिनन्द्यते। अस्मिन् पुनः नव-निधि-पुराण-(१८९९) प्रमिते शालिवाहन-शाके तपो-निधि-पुराण-मुनिकल्पाः एते सुगृहीत-नामधेयाः वयसा वृद्धा अपि मनसा सनत्कुमाराः वयसः एकषष्टितमीं समां स्पृशन्तीति एकान्ततः स्वान्त-सन्तोषकारी वृत्तान्तः। तेन एतद् उक्तं भवति—यद् रत्न-ग्राम-वसु-वसुधा-(१८३९) प्रमित-शक-वर्तिनि दीपावली-महोत्सवे किल भुवम् अवतीर्णाः **श्रीचरणाः**। दीपावलेरपि प्रकाशनं विधाय आविष्कृता तत्रभवद्भिः स्वप्रकाशता। अनेन च व्यतिकरेण सूचिता भवति **श्रीचरणानां** वैदिक-धर्म-मार्गे दीपस्तम्भायमानता।

सकल-कर्मन्दि-वृन्द-वन्दिता एते **श्रीचरणाः** संसारिषु करुणाशीलतां, तपसि कठोरतां, काव्यचर्चासु कोमलतां, तर्केषु कर्कशतां, छात्रेषु मित्रतां, पण्डितेषु प्रसन्नतां, बालकेषु वत्सलतां, संचारकर्मणि अनलसतां, व्याख्याने वाग्मितां, दोषाविष्कार-विषये वाचंयमतां शिष्यवर्ग-निर्माणे उत्साह-शालिताम्, भगवति नीललोहिते चैकान्तभक्तिम् आविष्कुर्वाणाः दर्शयन्ति आदर्शभूतं चरितम्।

उत्तुङ्गतपसां **श्रीचरणानां** तपश्चरण-भूमिः नृसिंहवनम् इति प्रथां भजते। नैमिषारण्यम् इव श्रूयमाण-शुक-शब्दः प्राचेतस-तपोवनम् इव प्रत्यासन्न-कुशलवः आश्रमोऽयं खलु—

"**यत्र च महाभारते शकुनिवधः पुराणे वायुप्रलपितम्**"— इत्यनया सरण्या बाणभट्टेनोपवर्णितस्य जाबालेराश्रमस्य अंशावतार एव साक्षात्। तथाहि— अस्मिन् पुनराश्रमपदे उत्तरपदाधिकार-चिन्ता पाणिनीय-नये, द्रव्य-चर्चा न्याय-परिष्कारे, मध्यमोत्तम-पुरुष-गणना व्याकरणे, घातचक्र-विचारः ज्योतिःशास्त्र-संदर्भे, विषमवृत्तादरः छन्दः-शास्त्र-प्रसंगेन, भाव-शबलता-पक्षपातः रसानुगुण-शास्त्रार्थे, विभूति-परिगणनं गीताभाष्य-व्याख्याने, वक्रतानुसन्धानं साहित्यचर्चायां, भक्ति-विरोधः शब्द-शक्ति-प्रस्तावे, आगम-निषेधः शब्दानुशासने, उपसर्ग-विचारः क्रियायोगानुषङ्गेण प्रवर्ततेऽनवरतं; नान्यत्र दैनन्दिने वर्तने।

चतुर्धाम-समान-मानं तुङ्गा-तरङ्गिणी-तरङ्ग-सङ्ग-परिपूत-गन्ध-वहाभिनन्दितं **श्रीशृङ्गेरी क्षेत्रं** क्षेत्रक्षेत्रज्ञ-विवेक-परायणानां श्रीचरणानां तपोभूमिः, आ प्रातरा दिवसावसानम् अनुष्ठान-सातत्यं किल व्यासङ्गः, अध्यात्म-विद्यानुसन्धानं व्यसनम्, अन्तरान्तरा अन्तेवासि-गण-विलोकनम् उद्योगः, समये समये प्रसादपूर्णव्याहारैः अभिनवागताभ्यागत-स्वागतं कुलक्रमागतं व्रतं, सभाद्वारा च विद्वज्जन-सभाजनं मनोविनोदनं सुखस्वाप आपद्धर्मः इत्थंभूतलक्षणप्राया विद्यते खलु **श्रीचरणानाम्** आचार-सरणिः।

आश्चर्यावह-तपश्चर्यालंकृतेषु संयमधनेष्वेतेषु सन्ति तावत् केचन विस्मयावहा विशेषाः। तथा त एते वेदान्तविदोऽपि उमाकान्त-परिचर्या-निमग्नाः, विरक्ता अपि परिहास-प्रचुर-भाषिणः, द्विजवृन्द-मुख्या अपि पक्षपातरहिताः, दण्डधारिणोऽपि अभयंकराः, प्रियसाहित्या अपि वक्रोक्ति-

विमुखाः, तर्काधिष्ठित-मतयोऽपि प्रसन्नालाप-निपुणाः पुराण-प्रवणा अपि अभिनवासक्ताः, स्वात्मानुभव-संपन्ना अपि विद्वदनुभव-श्रवण-प्रसिताः, विषमलोचनार्पित-चेतसोऽपि समदृष्टयः।

श्रीचरणैः समं सुखसंवादः दुर्लभप्रायः परं नितरां हृदयंगमः। तादृश-संवादे कथा-प्रसंगेन न किंचिन्नावतरति **आचार्यचरणानां** रसनाञ्चले। श्रवण-पुट-पेयाः खलु भवन्ति ते व्याहाराः। शारीरक-भाष्यं वा शाबर-भाष्यं वा महाभाष्यं वा अन्तरान्तरावकाशं लभते इति नात्याश्चर्यकारी विषयः। भामिनीविलासगतानि पद्यान्यपि तत्रावतरन्तीति महदेतत् कुतूहलम्। 'विललाप स बाष्पगद्गदम्' इत्येव प्रसंगोऽपि तत्र चरितार्थतां भजते। विशेषेण च यदा **भगवत्पाद-प्रणीत-सौन्दर्य-लहरी-**स्तोत्रगताः काश्चन पङ्क्तयः वाक्-पथम् अवगाहन्ते **श्रीचरणानां** तदा रसायत्त-चित्ता न ते आत्मनः प्रभवन्तीति स्वानुभवो निवेद्यते।

लोकसंग्रहाकाङ्क्षिणां पारिकाङ्क्षिणाम् एतेषां किल संवत्सरस्य कियन्तम् अपि कालं प्रवर्तमानः संचारः नैव तावत् तेषाम् अनुष्ठान-नित्यत्वं लेशतोऽप्यपकर्षति। "**गणना रुद्राक्ष-वलयेषु न शरीरेषु**" इत्येवंविधायां परंपरायां नायकायमानाः **श्रीचरणाः** शक्तिम् अतिक्रम्यापि निर्वर्तयन्ति पुनर् यथाकालं परदेवतोपासन-लक्षणं प्रणिधानम्-यत्सत्यम्—

'**व्रताभिरक्षा हि सतामलङ्क्रिया**' इति।

यथा राजासौ गच्छतीत्युक्ते सपरिवारस्य राज्ञो गमनमुक्तं भवति, एवमत्र शृङ्गेरी-**श्रीचरणानाम्** एकषष्टितमं वर्धापनमङ्गलम् इत्युक्तौ तत्-संप्रदायजुषां विश्वेषां विदुषां भारतान्तर्वर्तिनां च महदिदं हर्ष-प्रकर्ष-निदानम् इति आक्षेपतः सिद्ध्यति विनैव वाचां विस्तरेण।

वस्तुतस्तु **श्रीचरणानाम्** आजन्मविशुद्धं चरितमधिकृत्य लेखनीं प्रवर्तयितुं तावत् केषांचन 'लीला-लुठित-शारदापुर-धियाम्' विद्वद्वरेण्यानाम् अधिकारः। मादृशेन कृशमतिना **पूज्यचरणान्** उद्दिश्य किंवा लेखनीयम्? तेषां परिचयप्रदानं दिवसकर-नीराजन-विधि-कल्पं, चरित-लेखने प्रयत्नः आहोपुरुषिकामात्रम्, तपोनिष्ठा-वर्णनम् अयथाबलमारम्भः स्तुतिप्रस्तावः मुखरता, तूष्णींभावः पूज्यपूजाव्यतिक्रमः, अनभिज्ञोऽहं लेखने इति वदतो

॥ तान् अन्तरेण निपतेत् क्व नु नः प्रणामः ॥

शृङ्गेरी-शारदापीठ-सत्कृताः वैदिकोत्तमाः

मद्रास-नगरे शृङ्गेरी-शारदा-पीठ-'श्री'-चरणानां षष्टयब्दपूर्ति महोत्सवे दीपावली-शुभ-दिने प. पू. 'श्री'-चरणैः सत्कृताः निम्न लिखिताः वेद-विद्वांसः ।

ऋग्वेदे (प्रत्येकम् एक-सहस्र-रूप्यकाः)

१) ब्रह्मश्री गोडवर्ती वेङ्कटनरसा अवधानी

P.O.Pethunnarru Via Vemuru-Tenali (Andhra

२) ,, वेङ्कटकृष्णभट्टः ,, ,,

कृष्ण-यजुर्वेदे (प्रत्येकं सहस्रद्वय-रूप्यकाः)

१) ,, रामचन्द्रघनपाठी कोडलेकेरे, गोकर्ण (कर्णाटक)

२) ,, चिट्टी सुब्रह्मण्य-घनपाठी, अवनीगड्डा (आन्ध्र)

३) ,, शिवराम गणपति घनपाठी, मेलमङ्गलम् (मद्रास)

४) ,, कालटी सुब्रह्मण्यशास्त्री सलक्षणघनपाठी

16 1st Street Shripur, Madras-

सामवेदे (प्रत्येकं सहस्रद्वय-रूप्यकाः)

१) ,, राजारामः श्रौती, मद्रास

२) ,, सुब्रह्मण्यः श्रौती,

526 Cheluvamba Agraharam, Mysore

नव-छात्रेभ्यः २२५०–०० रूप्यकात्मकः पुरस्कारः प्रसादीकृतः ।

व्याघातः, नास्ति मे श्रीचरणैः समं पर्याप्तः परिचयः इति वस्तुगति विपर्यासः, शुभाशंसनोपक्रमः प्रक्रम-विरुद्धः । सत्यप्येवं मदीयम् इदं लेख नवनिर्माण-सामग्री-शून्यमपि कथमपि सपर्या-पर्याय-लक्षणत्वेन स्वीकरणी श्रीचरणैः प्रपन्न-शरणैरिति सविनयं प्रार्थयते कश्चिद्विधेयः —

वैदिक-संशोधन-मण्डलम् । आठलेकरोपना
पुण्यपत्तनम् – ९ लक्ष्मणात्मज
दि. ३०-१०-७७ श्रीपादशर्मा

श्रीशृङ्गेरी-शारदा-पीठाधीश्वराः
श्रीमदभिनवविद्यातीर्थस्वामिनः

श्रीमच्छङ्करभगवत्-पूज्यपादैः प्रतिष्ठापितेषु चतुर्षु आम्नाय-पीठेषु अन्यतमे श्रीदक्षिणाम्नाय-शृङ्गगिरि-शारदा-पीठे विराजमानाः श्रीमद्-अभिनवविद्यातीर्थ-स्वामिपादाः विस्मापयन्त्यहो स्वानुरक्तान् भक्त-गणान् वैदुष्येण, तपोमहिम्ना आर्त-त्राण-परायणतया बहुभाषा-वैदग्ध्येन सुधा-वधीरिण्या वाग्-धोरण्या च। जीवन्मुक्तानां **श्रीजगद्गुरु-चन्द्रशेखर-भारती-स्वामिनां** पूर्णानुग्रह-पात्र-भूताः "**प्रवर्तितो दीप इव प्रदीपात्**" इति न्यायेन सर्वेषु लोकोत्तर-गुणेषु तेषां प्रतिबिम्बं इव विराजन्ते इमे यति-प्रवराः।

स्वीये चतुर्दशे वयसि स्वीकृत-तुरीयाश्रमाः **श्रीचन्द्रशेखर-भारती-स्वामिभ्यः** प्राप्त-ब्रह्मविद्याः यति-पुङ्गवाः जीवन्मुक्तानां स्वगुरु-चरणानां शुश्रूषायां, शास्त्राध्ययने, तपोनुष्ठाने च रताः द्वाविंशति-वर्षाः शृङ्गगिरिं न्यवसन्। आस्तिक-लोक-दौर्भाग्येण काल-परिपाकेण वा तदानीं **श्रीचन्द्र-शेखर-भारतीस्वामिपादाः** ब्रह्मीभूताः। स्थितप्रज्ञाः अपि गुरु-चरणेषु भक्त्यतिशयेन इमे यतीन्द्राः कञ्चित् कालं नाशक्नुवन् नियन्तुं मुहुर्मुहुर् गुरूणां गुण-गण-स्मरणेन मनस्युद्वेलमानं दुःखार्णवम्।

परन्तु परम्परा-प्राप्त-कर्तव्य-भार-समर्पित-मनसः दुर्वहम् अपि कर्तव्यभारं स्वमहिमातिशये लीलयैव निर्वहन्तः आसेतु-शीताचलं विजय-यात्रा-व्याजेन वेद-विद्या-विदुषः शास्त्रज्ञान् कलाविदः आचार-निपुणान् अन्यान् अपि अलौकिक-प्रतिभावतः अनुगृह्णन्तः कैलासपतेश्चन्द्रचूडस्य पुनरुक्तमूर्तयः प्रतिभासन्ते।

लोकोत्तर-महिमातिशयैर् एभिर् भारतराष्ट्रम् एव नहि, किन्तु नेमि-पालदेशोऽपि स्वचरण-धूल्या परिपावितः। **आचार्यशंकरभगवत्पादाः** इव द्विवारं समग्रां भारतभुवं परिभ्रम्य सदुपदेश-सुधा-धारा-सारैर् ज्ञानपिपा-सून् अन्वगृह्णन्। नैकानि तीर्थस्थानानि तीर्थीकुर्वन्। गते च नलसंवत्सरे वाराणस्याम् अविमुक्तक्षेत्रे लोकजनन्याः अन्नपूर्णायाः पुनःप्रतिष्ठापनं

रॉय ॲण्ड कम्पनी

होमिओपाथ-औषध-क्षेत्रे भारतवर्षे अग्रेसराः ।

176 शामलदास गान्धीमार्गः (प्रिन्सेस स्ट्रीट) मुम्बई 400 002

स्वहस्ताम्बुजेन श्रीपुरी-जगद्गुरुचरणैः सह निर्वर्तयन्तः इमे यति-सार्वभौमाः समग्रं सनातन-धर्म-समाजम् एव अन्वगृह्णन् । अत्यपूर्व-शुभ-योगशालिनि कुम्भ-पुण्य-पर्व-काले प्रयाग-क्षेत्रे पदार्पणं कृतवन्तः त्रिवेणी-संगमे स्वप्रिय-शिष्यैः **श्रीभारतीतीर्थस्वामिभिः** सह स्नात्वा कोटिशः समवेतान् सनातन-धर्मावलम्बिनः भक्तगणान् दर्शनलिप्सून् अन्वगृह्णन् ।

अस्य भारत-राष्ट्रस्य स्वातन्त्र्योत्तर-काले प्रायेण धर्मग्लानिमति स्व-गुरु-परम्परा-प्राप्त-धर्म-धुरां वहन्तः महान्तः इमे गुरु-पुङ्गवाः स्व-कर्तव्य दाक्ष्येण निर्वहन्तो दरीदृश्यन्ते । आचार्येत्यन्वर्थपदाभिधेयैरेतैः नैकत्र पाठ-शालाः प्रतिष्ठापिताः । आपामरं तत्त्वबोध-प्रदया सरलया वाण्या प्रबोध-यन्ति जनान् मुहुर्मुहुः । प्रतिदिनं श्रीचन्द्रचूडार्चनादिभिः सांप्रदायिकैर्धर्मैः भगवद्-भक्तिपरायणान् कुर्वन्ति समान् लोकान् । राष्ट्रे बहुत्र अद्वैत-विद्या-प्रचारार्थं मठान् निरमापयन् । भारत-राष्ट्र-राजधान्यां श्रीशङ्कर-विद्या-केन्द्र-व्यपदेशेन संस्थाम् आरब्धवन्तः । तत्र चास्तिक-लोकानुग्रहार्थं श्रीचन्द्र-शेखर-लिङ्गं ,श्रीशारदामूर्तिं, श्रीशङ्कर-भगवत्पादमूर्तिं च प्रत्यस्थापयन् ।

प्रतिवर्षं विनायकचतुर्थ्यां विदुषाम् अनुग्रहाय शास्त्र-परम्परा-रक्षणाय च श्रीगणपति-वाक्यार्थ-सभां जिज्ञासूनाम् अनुग्रहाय श्रीशङ्करजयन्ती-सभां प्रतिभावतां प्रज्ञाभिवृद्धये शरदि शरदुत्सवं वसन्ते गानविद्याविदां प्रोत्साहनाय वसन्तोत्सवं वेदविदुषां कृते शरदि वेद-परीक्षा अपि श्रीशारदा-पीठात् प्रचालयन्ति गुरु-सार्वभौमाः ।

सनातन-धर्म-धुरन्धर-मूर्धन्याः स्व-परम्परा-गुणगरिमाभिज्ञाः यति-प्रवराः सर्वेषु लोकोत्तर-गुणेषु स्वसदृशम् उत्तराधिकारिणं शिष्यं श्रीशारदा-कटाक्ष-पात्रं शरणं प्रपन्नं शुक इव बाल्य एव वीतरागं मुमुक्षुम् आन्ध्रदेशे लब्ध-जनुषं **"श्रीसीतारामाञ्जनेय"**-नामाङ्कितं ब्रह्मचारिणं स्वसन्निधौ

निखिल-शास्त्राणि शिक्षयित्वा बोधयित्वा च अखिलान् स्वीय-संप्रदायान् आनन्द-वत्सरे शुभयोग-युतायाम् आश्विनकृष्ण-द्वादश्यां ब्रह्मविद्याम् उपदिश्य यत्याश्रमिणं "श्रीभारतीतीर्थनाम्ना" पर्यभूषयन् । अनेन जगन्मङ्गलकार्ये अन्वगृह्णन् निखिलान् शिष्य-गणान् ।

सत्य-संकल्पानां **श्रीमदभिनवविद्यातीर्थस्वामिपादानां** परिपूर्णानुग्रह-पात्र-भूताः **श्रीभारतीतीर्थयतिप्रवराः** शास्त्रचर्चायां व्यासः इव वैराग्ये शुकः इव वैदिक-धर्म-रक्षणे श्रीसुरेश्वराचार्याः इव च सर्वेषु गुणेषु स्वगुरुवर्यपदपद्धतिम् एव अनुसरन्तः दरीदृश्यन्ते ।



प. पू. श्रीभारतीतीर्थ-स्वामिनः

अहो धन्याः वयं श्रीशारदानुग्रह-पात्रीभूताः यस्मिन् शारदापीठे, अक्षुण्णा अनवद्या च गुरु-परम्परा जागर्ति । धिषणधिषणाः अपि पण्डिताः चमत्कुर्वन्ति चेतश्चोरिण्या वाग्-धोरण्या श्रीगुरुसार्वभौमानाम् । सर्वदा पश्यामः वयं हरिहरौ इव दर्शनाद् एव निखिल-कलुषापहारिणौ गुरूत्तमौ ।

पिङ्गलवत्सरे अस्मिन् आश्विनकृष्णचतुर्दश्यां श्रीचरणानां षष्टिपूर्तिमहोत्सवः प्रचाल्यते मद्र-पुरे शिष्य-गणैः । श्रीचरणानाम् आध्यक्ष्ये एतावन्तं कालं नैकानि धर्मकार्याणि अनुष्ठितानि । सुसंदर्भेऽस्मिन् लोकानुग्रहार्थं सहस्रचण्डीयागः अतिरुद्र-यागः संहिता-हवनम् इत्यादि-धर्मकार्याणि प्रचाल्यन्ते । एभिः सद्धर्मैः लोकाः श्रेयोभाजनानि भवेयुः । भगवान् चन्द्रचूडः चन्द्रकलावतंसा हंसगामिनी शरदिन्दु-समान-सुन्दरास्या च शारदाम्बा अस्मिन् शुभावसरे शश्वत् श्रीचरण-नलिन-सेवा-लोलुपान् भक्तालीन् सानन्दम् अनुगृह्णातु ।

श्रीशृङ्गगिरि-शारदापीठम् **एम्. व्ही. नरसिंहमूर्तिशास्त्री**
शृङ्गेरी आस्थान-विद्वान्

श्रीमदभिनवविद्यातीर्थ-गुरु-सुवर्णमाला-स्तोत्रम् ।

श्री शृङ्गेरी-पुराधीशः शारदापीठ-पूजकः ।
श्रीमदाचार्य-सदृशः विद्यातीर्थ-यतीश्वरः ॥
अव्याद् अव्याजकारुण्य-दिव्य-पाङ्ग-समुज्ज्वलः ।
नव्यो विद्यासुतीर्थो नो भव्यात्म-गुण-बृंहितः ॥
भिद्यते हृदय-ग्रन्थिः छिद्यन्ते सर्व-संशयाः ।
यस्मिन् दृष्टे परे तत्त्वे तस्मै श्रीगुरवे नमः ॥
नमः श्री शारदापीठ-माणिक्याय महात्मने ।
ब्रह्म-विद्याद्वितीयाय विद्यातीर्थाय योगिने ॥
वन्देऽहं संयमीन्द्रं तं सद्गुरुं करुणा-निधिम् ।
यत्कृपा-लव-मात्रेण मूको वाग्मी प्रजायते ॥
विद्यातीर्थैक-रसिक-राजहंस-शिखा-मणिम् ।
विद्यातीर्थ-गुरुं वन्दे सन्मानस-समाश्रयम् ॥
ध्यान-मूलं गुरोर्मूर्तिः पूजा-मूलं गुरोः पदम् ।
मन्त्रमूलं गुरोर्वाक्यं मोक्ष-मूलं गुरोः कृपा ॥
तीर्थ-प्रसाद-दातारः सन्त्वन्येऽपि मठाधिपाः ।
विद्यातीर्थ-प्रदाता तु केवलं नो जगद्गुरुः ॥
विद्यातीर्थो गुरुर्येषां विद्या च ब्रह्मविन्मता ।
पद्या च वैदिकी तेषां हृद्या च सफला जनिः ॥
जगद्गुरून् शान्त-मूर्तीन् सर्व-विद्यासु पण्डितान् ।
सदा योग-समाधिस्थान् तान् नमामि जितेन्द्रियान् ॥
यस्य दर्शन-मात्रेण पापं सर्वं प्रणश्यति ।
तं मे गुरूत्तमं वन्दे विद्यातीर्थ-यतीश्वरम् ।
तेजस्विनः स्फुरद्रूपाः धीराः विद्यासु पण्डिताः ।
औदार्यातिशयाच्चैते भासन्ते बालसूर्यवत् ॥

मुम्बापुरी

के. के. शंकरन्

विद्यातीर्थ-महेश्वर-चरण-सरोजयोः प्रार्थना ।

महद् इदं प्रमोद-स्थानं प्राचीनविद्या-परंपरा-बद्ध-श्रद्धानां वैदिक-धर्मानुष्ठान-निष्ठानाम् औपनिषदात्मतत्त्वावाप्तये उत्कमनसां विदुषां यद् दक्षिणाम्नाय-शृङ्गेरी-शारदा-पीठाधीश्वराः जगद्गुरु-श्रीमदभिनव-विद्यातीर्थ-स्वामिनः वयसः षष्टयब्दपूर्ति विधाय एकषष्टितमे वर्षे पदं निदधति। वस्तुतः **'तेजसां न हि वयः समीक्ष्यते।'** यतः तादृशाः अनितर-साधारण-महिमानः बाल्ये यौवने प्रौढतायां वार्धके वा सर्वदैव परिणत-बुद्धयः स्थिर-महिमानः विराजन्ते। **'तस्य धर्मरतेरासीत् वृद्धत्वं जरसा विना।' 'यो वै युवाप्यधीयानस्तं देवाः स्थविरं विदुः।'** एतादृशीः सत्योद्याः गिरः प्रमाणीकृत्य धर्मरतिः, अधीयानता च वृद्धत्वे प्रधानं निदानम् प्रचक्षते प्रेक्षावन्तः। तद् द्वयं येषां महामहिम-शालिनां सहजसिद्धं तेषां वयसः आधिक्येन शिरसः पलितत्वेन वा कः गुणः? तथाप्ययमेव अवसरः प्राकृतानां जनानां महिष्ठेषु स्वकीयम् आदरभाव-विशेषम् आविष्कर्तुम् इति ते प्राकृताः नैमित्तिकान् उत्सवविशेषान् सभाजयितुं महत्या अहमह-मिकया समीहन्ते, भक्त्युन्मेषेण च जीवित-साफल्यम् इव अधिगच्छन्ति।

महामहोपाध्याय-वासुदेवशास्त्रि-अभ्यंकराणां जन्म-शताब्दी-महोत्सवस्य प्रधानाङ्गरूपा पण्डित-सभा पुण्यपत्तने १९६६ संवत्सरे मार्चमासे आयोजिता आसीत्। तस्यां वेदान्तेषु पूर्वोत्तर-पक्ष-वादे माध्यस्थ्यम् आस्थिताः प.वे.सु. **रामचन्द्रशास्त्रिणः** पण्डितानां सत्कारावसरे अभाषिष्ट यत् 'अस्मिन् पुण्यपत्तने पेशवेकाले गणपतिमहोत्सवावसरे शास्त्रार्थचर्चा-सभा पेशवेमहाभागैः उपक्रान्ता, नैकानि संवत्सर-दशकानि सा अविरतं प्रचलिता आसीत्। भारतस्य सर्वाभ्यः दिग्भ्यः प्रदेशेभ्यः च नैकशास्त्र-निष्णाताः बहवः विद्वांसः तत्र समुपस्थाय स्व-पाण्डित्यं प्रदर्शयन्ति स्म। सा पण्डितसभा पाण्डित्य-सुवर्णस्य परीक्षा-निकषोपलः इति सर्वत्र प्रथिता आसीत्। तां सभाम् अनु दक्षिण-भारते **शृङ्गेरी-शारदा-पीठे** उपक्रान्ता गणपति-शास्त्रार्थ-सभा अद्यापि यथापूर्वं प्रचलिता वर्तते। बहवः पण्डिताः तां सभाम् आस्थाय प्रतिसंवत्सरं वेदशास्त्र-चर्चायां सहभागिनः भवन्ति।

श्रीजगद्गुरुचरणाः तत्र स्वयं समुपस्थाय माध्यस्थ्येन रसं परमम् अनुभाव्य विदुषः अनुगृह्णन्ति ' इति ।

तदिदं वेद-शास्त्र-चर्चा-सभायाः सामान्य-परिचायकं वचः श्रुत्वा कुतूहलिनी महती जिज्ञासा मम मनसि प्रादुरभूत् । चातकः मेघागमनमिव अहं तां सभाम् उत्सुकतया प्रतीक्षितवान् । सा च मम प्रतीक्षा अनतिचिरेणैव कालेन महता पुण्यपरिपाकेन इव साफल्यमापत् । डॉ. पं. विनायकशास्त्रि-नराञ्जपे महोदयैः साकं गणपतिशास्त्रार्थ-सभार्थम् अहं शृङ्गेरीमठं संप्राप्तः । एका क्रिया द्व्यर्थकरीव मम भाग्योत्कर्षवशात् श्रीमतां जगद्गुरूणाम् **अभिनवविद्यातीर्थ-स्वामिनाम्** परमानन्द-संदोह-प्रद - संदर्शनानुग्रहेण द्विगुणितम् आसादितं साफल्यं मया तस्मिन्नवसरे ।

तस्मिन् संवत्सरे वाराणसेय - संस्कृत - विश्वविद्यालयस्य तदात्वे कुलगुरुपदम् अलंकुर्वाणाः डॉ. गौरीनाथशास्त्रिणः पं.वे.सु.रामचन्द्रशास्त्रिणः अन्ये चापि बहवः वेद-निष्णाताः नैक-शास्त्र-पारंगताः तत्र समुपस्थिताः आसन् । येषु केचन केरलीयाः त्रैवर्णिकेतराः नव्य-न्याय-शास्त्र-निष्णाताः प्रतिसंवत्सरम् इव न्याय-शास्त्र-चर्चार्थम् उपस्थिताः आसन् ।

गणपत्युत्सव-दिनेषु प्रतिदिनम् अपराह्णे होरा-चतुष्टयं वेदपाठः तलस्पर्शिनी सूक्ष्मविषया शास्त्रचर्चा च प्रस्तुता अभवत् । तत्र चर्चावसरे श्रीजगद्गुरूणां श्रीमदभिनव - विद्यातीर्थ - स्वामिनां वादे माध्यस्थ्यम्, वाद-मर्यादापालने दक्षतां, शास्त्र-विषये परिणतां प्रज्ञां, प्राचीन-परंपरायां द्रढिष्ठां श्रद्धां च नैकेषु ग्रन्थि-जटिलेषु अवसरेषु साक्षात्कृत्य यत्सत्यं ' **तदा.... ज्वर इव मदो मे व्यपगतः** । इत्येवासीत् अबाधिता मतिः प्रायः समेषां विदुषाम् । विशिष्य नव्य-न्याय-चर्चायाम् अद्वैत-वेदान्तोपन्यासे च सूक्ष्मतम-पदार्थ-लक्षण-विवरणावसरे वादिनः क्षुण्णां वाद-पद्धतिं, रूढां तर्कसरणिं च रेखामात्रमपि मा परित्याक्षिषुः इति ते दक्षतमाः आसन् । तेन च सर्वेषु शास्त्रेषु समबुद्धयोऽपि ते न्याये वेदान्तेषु च अधिकारविशेषं प्रतिपन्ना इति इङ्गितज्ञैः एव अवधारणीयः विषयः ।

स्वामिचरणानां प्रसन्नगम्भीरा मूर्तिः, प्राचीनाचारानुष्ठाने द्रढिष्ठा मतिः, विदुषाम् आदरे दाक्षिण्य-महिष्ठा कृतिः, गरिष्ठा च शास्त्रसंस्कार-

नैव सुरक्षितं धर्मपावित्र्यं हिमालये ।

नमो नमः शारदाकारेभ्यः गार्ग्य-कुलोत्पन्न वसन्त-शर्मभ्यः ।

ह्य एव टॅक्सीयानेन बदरीविशालयात्रां संपाद्य प्रतिनिवृत्ताः वयम् । देवतात्मनः हिमालयस्य सौन्दर्यातिशयेन प्रसन्नम् अपि मनः मोहम्मदानां दुष्टप्रवृत्ति दृष्ट्वा विषण्णम् अभूत् ।

हृषिकेशतः बदरीविशालपर्यन्तम् अस्मद्वाहनस्य पृष्ठतः मुस्लिम-विश्वविद्यालय-वाहनम् आगच्छत् । करवालम् इदं सततं शिरःसनिधौ अस्मद्-अनुभवं भय-विषण्णम् अकरोत् । नगाधिराजस्य पावन-सुन्दर-सान्निध्यस्य आस्वादः दूषितोऽभूत् ।

ज्योतिर्मठे मोहम्मदाः पावित्र्य-भङ्गम् अकुर्वन् । विषण्णम् आसीत् मठस्य दर्शनम् । महामन्त्रिणां कथनेन च हिन्दुधर्मे पवित्रं शिवाम्बु यत्र-कुत्रापि विसृज्यन्त्येते । तेन च ज्योतिर्मठे सर्वत्रापि विषण्णतैव दृष्टा ।

बदरी-विशाल-देवस्थाने दुर्दशां ब्राह्मणानां च दुःस्थितिं दृष्ट्वा स्वभावतः एव मोहम्मद-धर्मगुरूणाम् ऐश्वर्यं स्मृतिपथम् आगतम् । हिन्दु-राष्ट्रेऽपि अस्मिन् मोहम्मदानां प्राबल्यं दृष्ट्वा नितरां खिन्नम् मे मनः ।

मार्गे सर्वत्रापि सेनास्थानानि सन्ति । तथापि नैव सुरक्षितं धर्म-पावित्र्यं हिमालये ।

तदेतत् सर्वथा विषादकारकम् । मन्युसूक्तावाहनम् पुनरप्यावश्यकम् इति मम मतिः । इति शम् ।

श्रीशिवानन्द-आश्रमः **सौ. सुलभा केळघे**
शिवानन्दनगरम् हृषिकेश (उ.प्र.) २९ ऑक्टोबर १९७७

परिणतिः अमुमेकसंस्थं गुणसमुच्चयं साक्षात्कृत्य 'प्रायेण सामग्र्य-विधौ गुणानां पराङ्मुखी विश्वसृजः प्रवृत्तिः ।'— इति कालिदासोक्तिः नूनं सापवादा इत्येव प्रतिभाति ।

अस्य गुण-समुच्चयस्य साक्षात्कारं, स्वामिचरणानामनुग्रह-विशेषं च इयं विद्यापरंपरा चिराय विन्दताम्, लभताम् च समुत्कर्ष-परंपरामिति विद्यातीर्थ-महेश्वरं परमेशमनवरतं को न प्रार्थयेत प्राचीन-विद्या-परंपरावशंवदो विपश्चित् ।

श्रीबालमुकुन्द संस्कृत-महाविद्यालयः **—प्रा. बा. बा. भागवत**
टिळक म. विद्यापीठम् पुण्यपत्तनम् 411 030 अधिपतिः

॥ श्रीगुरुराज-नवरत्न-मालिका ॥

श्रीमच्छङ्करदेशिकेन्द्र-कलित-व्याख्यान-सिंहासने
शृङ्गेर्यां शशिशेखरं गणपतिं श्रीशारदाम् अर्चयन् ।
पञ्चत्रिंश-समे लसन्नभिनवः श्रीमान् गुरुर्नो महान्
विद्यातीर्थ-यतीश्वरो विजयते षष्ट्यब्दपूर्ति गतः ॥

विद्यातीर्थ इति प्रथा तवगुरोर्याथार्थसंवादिनी
विद्या-दान-विशारदत्व-कलिता विद्योतमानानिशम् ।
सद्यःसिद्धिमभीप्सतां हृदयगाविद्याक्षतिं तत् क्षणात्
हृद्याधाय निरन्तरं श्रित-पदां सद्योविमुक्ति-प्रदा ॥

अज्ञानेन विचेष्टमान-जनता-प्रज्ञाभिमानोन्नता
विज्ञानाय कमाश्रयेत् सुविशद-प्रज्ञा-विशेषान्वितम् ।
सुज्ञानाय हितोपदेश-करणे विज्ञात् क्व चास्मद्गुरोः
जिज्ञासोरपरः समस्ति भुवने प्रज्ञा-प्रकृष्टः पुमान् ॥

विद्यातीर्थ-दिवाकरे समुदिते खद्योत-तुल्यां दशां
विद्यावन्त इहाश्रयन्त इति नावद्ये वृथा जल्पनम् ।
सद्यःस्फूर्तिकरी तदीय-धिषणाऽविद्या-विहीना यतः
तद्यः कश्चन नास्ति तत्-तुलनवान् अद्यापि विद्वान् भुवि ॥

विद्यातीर्थ-गुरौ सदा मनसि मे तिष्ठत्यहं नो बिभे-
म्यज्ञानाहित-काम-लोभ-मद-मोहाद्यारि-दुश्चेष्टितात् ।
अज्ञाने गुरुणा मदीय-मनसो निश्शेष-नष्टे कृते
नश्यन्ति स्वयमाश्रयेण रहिताः कामादयः शत्रवः ॥

काम-क्रोध-मुखा मृगा हृदयगा यद्यस्ति भीतिर्मृतेः
दूरं यात तदा न वोऽत्र वसतिर्युक्ता ब्रवीमि प्रियम् ।
विद्यातीर्थ-हरीश्वरस्य कलये स्थानं तु मन्मानसे
यो वः प्राण-हरो भविष्यति न चेत् सत्यं च वो वच्म्यहम् ॥

तावान् नृत्यति मान-मोह-निचयो यावद् गुरोर्दर्शनं
तावत्येव मदान्धता च विलसेद् यावद्-गुरोर्भाषणम् ।
तावान् एव विचेष्टतेऽघनिचयो यावद्गुरोः स्पर्शनं
तावच्चैव विलम्बनं शुभततेर्यावद्-गुरूक्तक्रिया ॥

द्रष्टव्यो मधुरो गुरोः सुरुचिरः कामातिगो विग्रहः
श्रोतव्यो वचसां चयो हृदयगाज्ञानातिविध्वंसकः ।
स्मर्तव्यः सततोपदेश-वचसां सारः सदा देहिभिः
कर्तव्यश्च यथोदितार्थ-निचयो वाञ्छा यदि श्रेयसि ॥ ८

यत्र स्याद् गुरुराज-वैभव-कथा तत्रास्तु मे श्रोत्रकं
यत्र त्वेव तदीय-मूर्तिरनघा तत्रास्तु चक्षुर्मम ।
यत्र स्याद् गुरुपाद-पङ्कज-युगं तत्रास्तु मे शीर्षकं
यत्राप्यस्य हितोपदेश-वचनं तत्रास्तु चेतो मम ॥ ९

श्रीमच्छङ्करदेशिकावतरण-क्षेत्रे पवित्रे वसन्
ख्यातः कालटि-नामके पुरवरे वेदान्त-विद्वान् इति ।
अद्रव्योऽर्थ-समर्पणानधिकृतः षष्ट्यब्दपूर्तौ गुरोः
मालां कामपि शब्द-रत्न-कलितां श्रीकृष्णशास्त्र्यर्पये ॥ १०

शृङ्गेरी-पाठशाला — एस. एन. श्रीकृष्णशास्त्री
कालटी (केरळ)

दीपज्योतिर् नमोऽस्तु ते

जनता सहकारी बँक लिमिटेड, पुणे २

१४४४ शुक्रवार पेठ, थोरले बाजीराव मार्गः, पुणे ४११ ००२
पञ्च-मण्डलेषु एकविंशति-शाखा-विस्तरेण
भवत्-सेवा-सिद्धः अधिकोषः ।
(तत्र शाखा-चतुष्टयं बृहन्मुम्बमध्ये)

द. शं. जमदग्निः
कार्यकारी-संचालकः

संस्कृत-सत्याग्रह-समर्थनम् ।

दिनांकः — गुरुवारः, ६ ऑक्टोबरः, १९७७ ।

समयः —- पूर्वाह्णः ११–१५

स्थानम् — बटतली कालुआ मोहन उच्चविद्यालय-गृहम् ।

अधस्तात् समुपस्थितानां शिक्षक-शिक्षिकानां नाम-हस्ताक्षराणि ।

१. श्रीभवेश लश्करः (प्रधान-शिक्षकः)
२. श्री हितेन्द्रनाथ रायः (सह-शिक्षकः)
३. श्री प्रदीपसिंह सरकारः (,,)
४. श्री हरनाथ चक्रवर्ती (,,)
५. श्री अशोककुमार अधिकारी (,,)
६. श्री मुक्ति भोमिकः (शिक्षिका)
७. श्री शुभमय रायः (शिक्षकः)
८. श्री बाबुलाल रायः (,,)

अत्र विद्यालयस्य प्रधान-शिक्षक-महाशयः श्रीभवेश लस्करः सर्वसंमतिक्रमात् सभापतेरासनम् अलंकृतवान् । ततः सभाकार्यं प्रारभते ।

प्रथमः प्रस्तावः —

भारतीय-भाषाणां जननी संस्कृतभाषा । सैषा भाषा भारतीय-संस्कृतेः प्राण-स्वरूपा । अस्याः संरक्षण-प्रसारणार्थं "शारदा"-पत्रिकायाः संपादक-महाशयाः पुरश्चा वर्तन्ते इति विज्ञाय तेभ्यः सादरं प्रणम्य तेषां च आन्दोलनं सभेयं दृढं समर्थयति । इति शम् ।

बटतली कालुअ मोहन उच्चविद्यालयः । स्वाक्षरी
पत्रालयः साप्टीबाडी (भवेश लश्करः)
जनपदम्–जलपाइगुडी । सभापतिः
(पश्चिम-वङ्ग-राज्यम्) प्रधानाध्यापकः

* *

स्मर्यताम् ! स्मर्यताम् ! स्मर्यताम् !

शारदा-मुद्रण-सिद्धि-मन्दिरम्, पुण्यपत्तनम् ३०

* *

सत्याग्रह-समर्थनम् —

जननि जगदम्बिके ! कुत्र त्वं शेषे ?

(संपादकीयम्, सूर्योदयः वाराणसी वर्षं ५४ अङ्कः ९ सितम्बर १९७७)

संस्कृत भाषा देव-भाषा, इयं सुर-भारती, गीर्वाण-वाणी, विश्व-वाङ्मयालंकारेश्वरी, सर्व - साहित्य - सौहित्य - संवर्धिनी, समग्र -ज्ञान-विज्ञान - कदम्ब- कादम्बिनी, श्रुति-स्मृति-शास्त्र-पुराणेतिहासादि-विश्व-विश्रुतार्थ-साहित्य-संपद्-अनुवर्तिनी इति बहुशः सगौरवम् उद्गिरन्तः राजनेतारः प्रख्यात-यशस्काः विभिन्नायोगेषु आयुक्त-रूपेण मनोनीताः विद्वन्मन्याः विद्वांसो विचारकाश्च चतुर्-दिक्षु दृश्यन्ते । प्रतिभाति यद् एते सहृदयाः संस्कृतानुरागिणः कियन्तश् चिन्तिताः सन्ति ! ... संस्कृत-विदुषां कष्टम् अपाकर्तुम् उद्विग्नाः सन्तः यथाकथम् अपि श्वसन्ति ! ... समाचार-पत्रेषु एतेषां समाचाराः स्थूलाक्षरैः मुद्रिताः दृश्यन्ते । ......

का नाम फलश्रुतिः ?

पृच्छति सूर्योदयः सर्वान् एतान् संस्कृत-समुन्नत्यै समुद्घोषयतः विचारक-वृन्दान् 'मनस्यन्यद् वचस्यन्यत्-प्रतीकान्' राजनेतॄन्, "सर्वस्य एतस्य सहानुभूति-सूचकस्य शब्द-कदम्बस्य किं फलम् अद्यावधि समुपलब्धम् ? शास्त्र-वचनेषु फलश्रुतयः दृश्यन्ते । भवद्-वचनानां का नाम फल-श्रुतिः ? " इति ।

अस्य प्रश्नस्य कारणं समुपस्थितं वर्तते संप्रति । प्रथमतः बहु प्रचलिते बहुत्र प्रचारिते च १०+२+३ शिक्षा-सूत्रे संस्कृतस्य समुपेक्षणम् । द्वितीयतः संस्कृतानुरागिणां यत्र तत्र सत्याग्रहानशनाय वैवश्यम् । किमिदम् अकारि दैवेन दुरभिसंधि-संधान-संधेन यत् सुरभारत्याः प्राक्तन-कालतः एव लीलास्थली इयं भरत-भूः सर्वात्मना कल्मष-कलुषित-आचार-प्रचारिकया वैदेशिक्या आङ्ग्ल-वाचा दुर्गति-ग्रस्ता संप्रति मेकॉले-मानस-पुत्रैर् अद्यापि त्रस्ता वर्तते ।

समक्षम् एव विद्यते 'शारदा'-पत्रिकायाः २३-८-७७ दिवसीयः विंशति-तमः अङ्कः । यत्र मुखपृष्ठे एव दिल्ली-सत्याग्रह-तीर्थे संस्कृत-रक्षणार्थं प्रयतमानानां, सत्याग्रह-मुखेन शासनस्य दृष्टि-निक्षेपं संस्कृत-समुन्नत्यै प्रत्यावर्तयितुकामानां संस्कृतानुरागिणां चित्रम् । अन्तिमे च पृष्ठे

पिबन्त्येवोदकं गावो मण्डूकेषु रटत्स्वपि !

संस्कृत-सत्याग्रह-वार्तया 'केषांचन विषकुम्भ-पयोमुखानां संस्कृत-निष्ठा-प्रदर्शन-मात्र-पराणां शिरःशूलः प्रारब्धः । उपेक्षया मिथ्या-प्रचारेण वा तैः सत्याग्रह-मूल्यं न्यूनीकर्तुं प्रयतितम् । वीरप्रसू-विषयिणीं वन्ध्या-व्रीडाम् एनां शूर-जनक-विषयकं षण्ढस्य नाभ्युदरशूलं वा एवं नास्त्यौषधम् इति मत्वा न स्पर्शविषयीकृतम् अस्माभिः । परं विद्या-वारिधि-वाराणसी-विभूषणैः 'सूर्योदय' कारैः सर्वोत्कृष्टया शैल्या स्वात्मा सम्यक् परिचायितः सत्याग्रह-विषये । पिबन्त्येवोदकं गावो मण्डूकेषु रटत्स्वपि इत्येव सत्यं नु ?

— संपादकः

हृदय-विदारकं 'शारदा'-संपादकानां वैदुष्य-वैराज्य-वीर्यवत्-तया दीप्त-मुख-मण्डलानां किंतु सत्याग्रह-नशनायास-कार्श्य - कषायित-कलेवराणां चित्रं, यत्र तान् शिक्षा-मन्त्रि-प्रातिनिध्यं कुर्वाणः संसत्-सदस्यः **डॉक्टर वसन्त कुमार पण्डितः** फल-रसं पाययति ।

जननि जगदम्बिके ! कुत्र त्वं शेषे ? अशेष-क्रियाणां लोक-कल्याणायैव कर्म-प्रसक्तानां संस्कृतानुरागिणाम् इयं दुर्दशा दृश्यते अस्मिन् तव हृदय-देशे भारतदेशे एव इति कथम् ? ... ...

संस्कृते एका कथा भवति ढपोरशंखस्य । शंखः कथयति 'वदाम्येव ददामि न ।' नैतद् उचितम् । **सूर्योदयः** विनिवेदयति वारं वारं संस्कृत-माहात्म्योद्घोषकान् वरेण्यान् विचारकान् शासकान् प्रति हृदः पुनर्-ईक्षणाय शिक्षायां संस्कृतस्य संस्कृतेः च समर्थतया संस्थापनाय । त्रिभाषा-सूत्रे च अनिवार्यतया संस्कृत-संप्रवेशाय इति शम् ।

शृङ्गेरी'श्री'चरण-कृपा-प्रसादेन मङ्गलीभूतम्

पुण्यपत्तने पुण्यं निवासस्थलम्

॥ हॉटेल स्वस्ति ॥

१२३४, आपटे-मार्गः (दूरवाणी ५५५००), पुण्यपत्तनम् ४

शारदा-गौरव-ग्रन्थ-माला...क्र. ४९

संस्कृत-पत्रिका-विश्वम्

★

संपादकः

पं. वसन्त अनन्त गाडगीळ

★

दीपावली १९७७

मूल्यम् एकरूप्यकः

प्रकाशकः
पं. वसन्त अनन्त गाडगीळ
शारदा-गौरव-ग्रन्थ-माला
४२५ सदाशिव पेठ, पुण्यपत्तनम् ४११ ०३०

卐

प्रकाशनम्– दीपावली १९७७

卐

सर्वाधिकाराः प्रकाशकायत्ताः

卐

मुद्रकः
पं. वसन्त अनन्त गाडगीळ
श्रीशारदा-मुद्रण-सिद्धि-मन्दिरम्
४२५ सदाशिव पेठ, पुण्यपत्तनम् ३०
यशवन्त-मुद्रणालयः
१८३५ सदाशिव पेठ, पुण्यपत्तनम् ३०

सांप्रतिकं संस्कृत-पत्रिका-विश्वम् ।

('शारदा'-कार्यालये प्राप्तानि नियतकालिकानि)

दै नि क म्

१ **सुधर्मा** — पं. वरदराजय्यङ्गार्यः (दूरवाणी २२८३५)
रामचन्द्र अग्रहारम्, मैसूरुः ५७० ००४ (वार्षिकम् रू. ३६)

सा प्ता हि क म्

२ **संस्कृत-भवितव्यम्** —
डॉ. के. रा जोशी, प्रा. गु. वा. पिम्पळापुरे, पं. श्रीधर घुशे.
२ पश्चिमउच्चन्यायालयमार्गः, नागपुरम् ४४० ००१ (रू. १०)

३ **गाण्डीवम्** — प. गोपालशास्त्री दर्शनकेसरी
संपूर्णानन्द-संस्कृत-विश्वविद्यालयः वाराणसी (रू. १०)

पा क्षि क म्

४ **शारदा** — पं. वसन्त अनन्त गाडगीळ. (दूरवाणी ४२१९७)
१७०।५।अ, सुमनागर, पर्वती, पुणें ४११ ००९ (रू. २०)

मा सि क म्

५ **संस्कृत-प्रचारकम्** — पं. रामचन्द्र भारती (दूरवाणी २६५३३५)
२५१८ चूडीवालान, दिल्ली ११० ००७ (रू. १०)

६ **सूर्योदयः** — पं. गो. न. वैजापुरकर
भारत-धर्म-महामण्डलम्-जगत्गंज-वाराणसी (रू. १०)

७ **संस्कृत-साहित्य-परिषत्-पत्रिका** —
१६८/९ राजा दीनेन्द्र स्ट्रीट, कलकत्ता ७०० ००४ (रू. १०)

८ **गैर्वाणी** — पं. एन्. रामनाथ अय्यर
संस्कृत-भाषा-प्रचारिणी-सभा चित्तूरु ५१७ ००१ (रू. ५)

९ **भारती** — पं. दीनानाथ त्रिवेदी 'मधुपः' (दूरवाणी ६१७६७)
भारतीभवन गोपालजी-मार्गः जयपुर ३०२ ००३ (रू. १०)

१० **दिव्यज्योतिः** — प्रा. केशवशर्मा
भारती विहारः, मशोबरा, सिमला – १७१ ००७ (रू. १२)

११ **स वि ता** — स्वामी विद्यानन्द विदेह, वेद संस्थान,
बाबू मोहल्ला, ब्यावर रोड अजमेर ३०५ ००१ (रू. ७)

१२ **सु प्र भा त म्** — पं रामकृष्णशास्त्री 'अव्ययः', श्रीरामप्रकाशनम्,
१२२, श्रीरघुनाथपुरम्, जम्मू १८०००१ (रू. १२)

१३ **सर्वगन्धा** — डॉ. वीरभद्र मिश्रः कुमारसदनम्,
बाबूगञ्जम्, लक्ष्मणपुरम् २२६ ००७ (रू. १०)

१४ **संस्कृतरत्नाकरः** — डॉ. सत्यव्रतशास्त्री (दूरवाणी ५२९८६४)
भूपेन्द्रभवन, कृष्णा मार्केट, पहाडगञ्ज, न. दिल्ली
११०।०५५ (रू. १०)

त्रै मा सि क म्

१५ **सागरिका** — डॉ. रामजी उपाध्यायः, सागर-विश्वविद्यालयः,
सागर (म. प्र.) ४४५ ७५३ (रू. १०)

१६ **सं वि त्** — पं. भाईशंकर पुरोहित,
भारतीय-विद्या-भवनम्, चौपाटी, मुम्बई ४०० ००७ (रू. १०)

१७ **गुञ्जारवः** — सनातन-धर्म-सभा नगर (महाराष्ट्र) ४१५ ३१४
(रू. १०)

१८ **पाटलश्रीः** — संस्कृत-नाट्य-परिषद् पाटणा (बिहार) ७१३५१६
(रू. १०)

१९ **परमार्थसुधा** — श्रीसत्यनारायण शर्मा-पं. वासुदेवशास्त्री द्विवेदी
सार्वभौम-संस्कृत-प्रचार-कार्यालयः (दूरवाणी ६६०२१)
डी. ३८/११० हौज कटोरा वाराणसी २२१ ००१ (रू. ८)

षा ण्मा सि क म्

२० **संस्कृत-प्रतिभा** — डॉ. वे. राघवन, साहित्य अकादमी,
रवीन्द्र भवन न. दिल्ली ११०००१ (रू. १०)

[एतदतिरिक्तानि बहूनि नियतकालिकानि आमासिक-वार्षिकान्तं भारतवर्षस्य विविधेषु भागेषु, विश्वविद्यालयेषु प्रकाश्यन्ते। परं तेषां दर्शनाभावे न शक्यम् अत्र तेषां ग्रथनम् इति खिन्नाः वयम्।

— संपादकः]

दशाधिक-शत-वर्षात्मकं संस्कृत-पत्रिका-विश्वम् ।

(संस्कृत-पत्रकारिताका इतिहास — डॉ. रामगोपाल मिश्र-सौजन्येन)

समयः	पत्रिकानाम	स्थलम्
१८६६	काशीविद्यासुधानिधिः	वाराणसी
१८६७	प्रत्नकम्रनन्दिनी	वाराणसी
१८६७	धर्मप्रकाशः	आगरा
१८७१	विद्योदयः	लाहोर
१८७५	सद्धर्मामृतवर्षिणी	आग्रा
१८७५	प्रयागधर्मप्रकाशः	प्रयाग
१८७५	षड्दर्शनचिन्तनिका	पुणे
१८७८	विद्यार्थी	पाटणा
१८७८	काव्येतिहाससंग्रहः	पुणे
१८७८	आर्षविद्यासुधानिधिः	कलकत्ता
१८७९	कामधेनुः	वाराणसी
१८८०	धर्मनीतितत्त्वम्	पाटणा
१८८२	काव्यनाटकादर्शः	धारवाड
१८८२	आर्यः	लाहोर
१८८३	धर्मोपदेशः	बरेली
१८८३	विज्ञानचिन्तामणिः	पट्टाम्बि
१८८५	ब्रह्मविद्या	नांदुकावेरी
१८८६	श्रुतप्रकाशिका	कलकत्ता
१८८७	आयुर्वेदोद्धारकः	मथुरा
१८८७	लोकानन्ददीपिका	मद्रास
१८८७	आर्यसिद्धान्तः	अलाहाबाद
१८८७	द्वैभाषिका	जैसोर

समयः	पत्रिकानाम	स्थलम्
१८८८	ग्रन्थरत्नमाला	मुंबई
१८८८	विद्यामार्तण्डः	प्रयाग
१८८९	उषा	कलकत्ता
१८९०	पीयूषवर्षिणी	फर्रुखाबाद
१८९०	अरुणोदयः	कलकत्ता
१८९१	मानवधर्मप्रकाशः	कलकत्ता
१८९२	सकलविद्याभिवर्धिनी	बिजगापट्टनम्
१८९३	संस्कृतचन्द्रिका	कोल्हापुर
१८९३	काव्याम्बुधिः	बेंगलोर
१८९३	श्रीपुष्टिमार्गप्रकाशः	मुम्बई
१८९५	आर्यावर्ततत्त्ववारिधिः	कलकत्ता
१८९५	संस्कृत टीचर	गिरगाव
१८९५	कविः	पुणे
१८९५	सहृदया	मद्रास
१८९६	श्रीवेंकटेश्वरपत्रिका	मद्रास
१८९६	काव्यकादम्बिनी	लश्कर
१८९६	संस्कृतपत्रिका	पदुकोटा
१८९७	काव्यकल्पद्रुमः	बेंगलोर
१८९७	भारतोपदेशकः	मेरठ
१८९७	काव्यमाला	मुम्बई
१८९८	पण्डितपत्रिका	वाराणसी
१८९८	चिकित्सासोपान	कलकत्ता

समयः	पत्रिकानाम	स्थलम्
१८९९	साहित्यरत्नावली	पट्टाम्बि
१८९९	शास्त्रमुक्तावली	कांची
१८९९	कथाकल्पद्रुम	कोल्हापुर
१९००	मञ्जुभाषिणी	कांचीवरम्
१९००	समस्यापूर्तिः	कोल्हापुर
१९००	विद्वत्कला	लश्कर
१९००	देवगोष्ठी	हरिद्वार
१९००	विद्यार्थिचिन्तामणिः	कुट्टर (केरल)
१९०१	ग्रंथप्रदर्शिनी	मद्रास
१९०१	श्रीकाशीपत्रिका	काशी
१९०१	भारतधर्मः	चिदम्बरम्
१९०२	ब्रह्मविद्या	चिदम्बरम्
१९०२	विचक्षणा	पेरुटुम्बूर
१९०२	रसिकरंजिनी	कोटिलिंगपुरम्
१९०३	सूक्तिसुधा	वाराणसी
१९०३	वैष्णवसन्दर्भः	वृन्दावन
१९०४	संस्कृतरत्नाकरः	जयपुर
१९०४	मित्रगोष्ठी	वाराणसी
१९०५	मिथिलामोदः	बिहार
१९०५	विद्वद्गोष्ठी	वाराणसी
१९०५	विशिष्टाद्वैतिनी	श्रीरंगम्
१९०६	केरलग्रन्थमाला	मलावार
१९०६	विद्याविनोदः	भरतपुर
१९०६	सद्धर्मः	मथुरा
१९०६	सहृदया	त्रिचनापल्ली
१९०६	सूनृतवादिनी	कोल्हापुर
१९०६	विश्वश्रितः	मद्रास
१९०६	वीरशैवप्रभाकरः	मद्रास
१९०६	विद्यावती	मद्रास
१९०६	मनोरंजिनी	मद्रास
१९०६	वीरशैवमतप्रकाशः	पुणे
१९०६	भारतदिवाकरः	अहमदाबाद
१९०७	जयन्ती	केरल
१९०७	विद्वन्मनोरंजिनी	कांचीवरम्
१९०७	षड्दर्शनी	श्रीरंगम्
१९०९	आर्यप्रभा	कलकत्ता
१९१०	पुरुषार्थः	नरंगुद
१९१०	साहित्यसरोवरः	काशी
१९१०	विद्यारत्नाकरः	काशी
१९१०	अमरभारती	केरल
१९१२	हिन्दूजनसंस्कारिणी	मद्रास
१९१३	आयुर्वेदपत्रिका	दिल्ली
१९१३	उषा	हरिद्वार
१९१३	शारदा	अलाहाबाद
१९१४	बहुश्रुतम्	वर्धा
१९१४	व्याकरणग्रन्थावली	तंजौर
१९१६	गीर्वाणभारती	अहमदाबाद
१९१८	संस्कृतभारती	वाराणसी
१९१८	मित्रम्	पाटणा

समयः	पत्रिकानाम	स्थलम्
१९१८	संस्कृतसाहित्यपरिषत्-पत्रिका	कलकत्ता
१९१९	संस्कृतमहामण्डलम्	कलकत्ता
१९१९	जिनमतप्रकाशिका	मैसूर
१९२०	संस्कृतसाकेतः	अयोध्या
१९२०	सरस्वतीभवनग्रन्थमाला	वाराणसी
१९२०	सरस्वतीभवनानुशीलनम्	वाराणसी
१९२०	संस्कृतम्	अयोध्या
१९२३	सुप्रभातम्	वाराणसी
१९२३	सरस्वती	मुक्त्याला
१९२३	आनंदचन्द्रिका	बेंगलोर
१९२३	द्वैतदुन्दुभिः	विजापुर
१९२४	सूर्योदयः	वाराणसी
१९२४	कामधेनुः	मद्रास
१९२५	श्रीमन्महाराजकॉलेज-पत्रिका	मैसूर
१९२६	संस्कृतपद्यगोष्ठी	कलकत्ता
१९२६	सुरभारती	वाराणसी
१९२६	उद्यानपत्रिका	तिरुपति
१९२६	सहस्रांशुः	वाराणसी
१९२८	ब्राह्मणमहासंमेलनम्	वाराणसी
१९२८	उद्योत	लाहोर
१९३०	भारतसुधा	पुणे

समयः	पत्रिकानाम	स्थलम्
१९३१	पीयूषपत्रिका	नडियाद
१९३३	श्रीः	श्रीनगर
१९३४	संस्कृतसाप्ताहिकपत्रिका	धुलजोडा (फरिदपुर)
१९३४	देववाणी	कलकत्ता
१९३४	अमरभारती	वाराणसी
१९३४	उषा	लाहोर
१९३४	संस्कृतपद्यवाणी	कलकत्ता
१९३५	मधुरवाणी	बेलगाव
१९३५	वल्लरी	वाराणसी
१९३५	मंजूषा	कलकत्ता
१९३६	दिवाकरः	हरिद्वार
१९३६	कालिन्दी	आग्रा
१९३६	मीमांसाप्रकाशः	पुणे
१९३६	ब्रह्मविद्या	मद्रास
१९३७	ग्वालियर-संस्कृत-ग्रन्थमाला	ग्वालियर
१९३७	भारतीविद्या	मुंबई
१९३८	शारदा	वाराणसी
१९३९	ज्योतिष्मती	वाराणसी
१९३९	शंकरगुरुकुलम्	श्रीरंगम्
१९४०	संस्कृतसंजीवनम्	पाटणा
१९४०	संस्कृतसंदेशः	वाराणसी
१९४०	भारतश्रीः	वाराणसी
१९४१	उच्छृंखलम्	वाराणसी
१९४१	अमृतवाणी	बेंगलोर
१९४२	सरस्वतीसुषमा	वाराणसी

समयः	पत्रिकानाम	स्थलम्
१९४२	श्रीचित्रा	त्रिवेन्द्रम्
१९४२	नृसिंहप्रिया	तिरुपति
१९४३	अमरभारती	वाराणसी
१९४४	कौमुदी	हैदराबाद
१९४५	सुरभारती	मुम्बई
१९४६	मालवमयूरः	मन्दसौर
१९४७	भारतीयविद्याभवन बुलेटिन	मुंबई
१९४७	वैदिकधर्मवर्धिनी	कोइम्बतूर
१९४८	ब्रह्मविद्या	कुम्भकोणम्
१९४८	वेदवाणी	वाराणसी
१९४९	बालसंस्कृतम्	मुम्बई
१९४९	मनोरमा	गंजाम
१९५०	भारतीविद्या	फतेहगड
१९५०	भारती	जयपुर
१९५०	संस्कृत-प्रचारकम्	दिल्ली
१९५१	विद्यालयपत्रिका	मथुरा
१९'५१	वैदिकमनोहरा	कांचीवरम्
१९५१	प्रतिभा	वाराणसी
१९५१	भवितव्यम्	नागपुर
१९५३	संस्कृतसंदेशः	काठमाण्डू
१९५३	श्रीरविवर्मग्रन्थावली	त्रिपुनतुरा
१९५३	पण्डितपत्रिका	वाराणसी
१९५३	वैजयन्ती	बागलकोट
१९५५	भाषा	गुण्टूर
१९५६	आराधना	हैदराबाद
१९५६	दिव्यज्योतिः	सिमला

समयः	पत्रिकानाम	स्थलम्
१९५६	अमरवाणी	श्रीगंगानगर
१९५६	विद्या	बेलगाव
१९५६	आनन्दकल्पतरुः	कोइम्बतूर
१९५८	गीता	उडुपी
१९५८	तरङ्गिणी	हैदराबाद
१९५८	प्रणवपारिजातः	कलकत्ता
१९५८	भारतवाणी	पुणे
१९५८	संस्कृतवाणी	राजमहेन्द्री
१९५८	मधुरवाणी	गदग
१९५९	ज्ञानवर्धिनी	लखनौ
१९५९	सुरभारती	वाराणसी
१९५९	संस्कृतप्रतिभा	दिल्ली
१९५९	शारदा	पुणे
१९५९	पुराणम्	रामनगर
१९६०	सरस्वतीसौरभम्	बडोदा
१९६०	देववाणी	मुंगेर
१९६०	गुरुकुलपत्रिका	हरिद्वार
१९६०	जयतु संस्कृतम्	काठमाण्डू
१९६०	संस्कृतप्रभा	मेरठ
१९६१	संस्कृतिः	पुणे
१९६२	मधुकरः	दिल्ली
१९६१	सागरिका	सागर
१९६२	मध्यभारती	जबलपुर
१९६२	गैर्वाणी	चित्तूर
१९६२	सुरभारती	बडोदा
१९६३	विश्वसंस्कृतम्	होशियारपुर
१९६३	कामेश्वरसिंहसंस्कृतविश्वविद्यालयपत्रिका	दरभंगा

समयः	पत्रिकानाम	स्थलम्
१९६४	संस्कृतसंमेलनम्	पाटणा
१९६४	देववाणी	मूंगेर
१९६४	अमृतलता	पारडी
१९६४	कल्याणी	जयपुर
१९६४	हितकारिणी	जबलपुर
१९६४	संगमनी	प्रयाग
१९६४	ऋतम्भरा	जबलपुर
१९६४	गाण्डीवम्	वाराणसी
१९६४	संविद्	मुंबई
१९६५	सनातनधर्मशास्त्रम्	कलकत्ता
१९६५	ऋतम्भरम्	अहमदाबाद
१९६५	मालविका	भोपाल
१९६५	संस्कृतस्रोतस्विनी	आग्रा
१९६६	पाटलश्रीः	पाटणा
१९६६	गुंजारवः	अहमदाबाद
१९६७	संस्कृतसमाजः	कलकत्ता
१९६७	मागधम्	आरा
१९६९	ऋतम्	लखनौ
१९७०	शिक्षाज्योतिः	दिल्ली
१९७०	प्राची	काशी
१९७०	मधुमती	उदयपुर
१९७०	सुधर्मा	मैसूर
१९७३	विमर्शः	दिल्ली
१९७६	प्रज्ञालोकः	बेङ्गलोर
१९७७	सर्वगन्धा	लक्ष्मणपुरम्

—•—

त्वर्यताम् स्मर्यताम् त्वर्यताम्

सागर-विश्वविद्यालयेन (Ph. d.) उपाधिकृते स्वीकृतः शोधप्रबन्धः

संस्कृत पत्रकारिता का इतिहास

डॉ. रामगोपाल मिश्र

पृष्ठसंख्या १९ + २३५ मूल्यम् रू. ५० = ००

'शारदा' पत्रमञ्जूषा ७५०, पुणे — 411 030

संस्कृत-पत्रिका-विश्वम्। (ख्रि. १८६६ तः १९७७)

१ अङ्कुरः
२ अञ्जलिः
३ अधिकमासनिर्णयपत्रिका
४ अध्यात्म-प्रकाशः
५ अनुग्रहः
६ अभ्युदयः
७ अमरभारती (अमृतसर)
८ अमरभारती (केरळ)
९ अमरभारती (कोचीन)
१० अमरभारती (वाराणसी)
११ अमरभारती (वाराणसी)
१२ अमरवाणी (इन्दौर)
१३ अमरवाणी (वाराणसी)
१४ अमरवाणी (श्रीगङ्गानगर)
१५ अमृतभारती
१६ अमृतलता
१७ अमृतलिङ्गम्
१८ अमृतवाणी (बेङ्गलूरु)
१९ अमृतवाणी (मैसूरु)
२० अमृतसंदेशः
२१ अमृतोदयः
२२ आनन्दकल्पतरुः
२३ आनन्दचन्द्रिका
२४ आन्ध्रमहाभारतम्
२५ आन्ध्रसंस्कृतसाहित्यपत्रिका
२६ आभा
२७ आयुः
२८ आयुर्वेद-भारती
२९ आयुर्वेद-महासंमेलन-पत्रिका
३० आयुर्वेद-संमेलनम्
३१ आयुर्वेदीय-ग्रन्थमाला
३२ आयुर्वेदोद्धारकम्
३३ अराती
३४ आराधना
३५ आरोग्यम्
३६ आरोग्यदर्पणः
३७ आर्यः
३८ आर्यप्रभा
३९ आर्यवाणी
४० आर्यसिद्धान्तः
४१ आर्यावर्त-स्तव-वारिधिः
४२ आस्तिकमतोज्जीविनी
४३ उच्छृङ्खलम्
४४ उत्थानम्
४५ उदयः
४६ उद्यान-पत्रिका
४७ उद्योतः
४८ उपासना
४९ उषा (कलकत्ता)
५० उषा (काङ्गडी हरिद्वार)
५१ उषा (लाहोर)
५२ ऋतम्
५३ ऋतम्भरम्
५४ ऋतम्भरा

५५ कथाकल्पद्रुमः
५६ कर्णाटकचन्द्रिका
५७ कल्पकम्
५८ कल्याणी
५९ कविः
६० कवित्वम्
६१ कामधेनुः (वाराणसी)
६२ कामेश्वरसिंह-विश्वविद्या-
लय-पत्रिका
६३ कालीकमली-क्षेत्र-पत्रिका
६४ काव्याम्बुधिः
६५ काव्यम्
६६ काव्यकल्पद्रुमः
६७ काव्यकादम्बिनी
६८ काव्यनाटकादर्शः
६९ काव्याम्बुधिः
७० काव्यालोकः
७१ काव्येतिहाससंग्रहः
७२ काशीविधासुधानिधिः।
(पण्डित-पत्रिका)-वाराणसी
७३ किरणः
७४ कुम्भकोण-कॉलेज-पत्रिका
७५ कृतान्तः
७६ केरल-ग्रन्थ-माला
७७ कौमुदी (कोल्हापूर)
७८ कौमुदी (हैद्राबाद-सिन्ध)
७९ खद्योतः
८० **गाण्डीवम् (काशी)**
८१ गायत्री
८२ गीता
८३ गीर्वाणम्
८४ गीर्वाणभारती
८५ गीर्वाणवाणी
८६ **गुञ्जारवः (नगर)**
८७ गुरुकुल-पत्रिका (काङ्गडी)
८८ **गैर्वाणी (चित्तूरु)**
८९ ग्रन्थप्रदर्शिनी
९० ग्रन्थरत्नमाला
९१ चिकित्सासोपानम्
९२ चित्रवाणी
९३ जनार्दनः
९४ जयतु-संस्कृतम् (काठमाडौ)
९५ जयन्ती
९६ जाह्नवी (कलकत्ता)
९७ जिनमत-प्रकाशिका
९८ ज्ञानवर्धिनी
९९ ज्योतिः
१०० ज्योतिष्मती
१०१ ज्योत्स्ना
१०२ तत्त्वबोधिनी
१०३ तरङ्गिणी
१०४ तरुणः
१०५ तिरुपति देवस्थानं जर्नल
१०६ तिरुमलै श्रीवेङ्कटेश्वरः
१०७ त्रैत-प्रभा
१०८ त्रैमासिकी संस्कृतपत्रिका
१०९ **दिव्यज्योतिः (सिमला)**

११० दिव्यगोष्ठी
१११ देवगोष्ठी
११२ देववाणी (कलकत्ता)
११३ देववाणी (मुङ्गेर)
११४ देववाणी (बीकानेर)
११५ देववाणी (हरिद्वार)
११६ द्विभाषिका
११७ द्वैतदुन्दुभिः
११८ द्वैभाषिकम्
११९ धर्मः
१२० धर्मचक्रम्
१२१ धर्मचन्द्रिका
१२२ धर्मप्रकाशः
१२३ धर्मोपदेशकः
१२४ नीहारिका
१२५ नृसिंहप्रिया
१२६ पण्डित-पत्रिका (वाराणसी)
१२७ पद्यवेणी
१२८ पद्यामृत-तरङ्गिणी
१२९ परमार्थसुधा (वाराणसी)
१३० परिमल
१३१ पाटलश्रीः (पाटलिपुत्रम्)
१३२ पारिजातः
१३३ पीयूषवल्लरी
१३४ पीयूषवर्षिणी
१३५ पुराणम्
१३६ पुराणादर्शः
१३७ पुरुषार्थः
१३८ पुष्टिमार्गप्रकाशः
१३९ प्रकटन-पत्रिका
१४० प्रज्ञा (कलकत्ता)
१४१ प्रज्ञा (वाराणसी)
१४२ प्रज्ञालोकः
१४३ प्रणवपारिजातः
१४४ प्रतिमा (कलकत्ता)
१४५ प्रतिमा (वाराणसी)
१४६ प्रतिमा (सुरत)
१४७ प्रत्नकम्रनन्दिनी
१४८ प्रभा
१४९ प्रयागपत्रिका
१५० प्रयागधर्मप्रकाशः
१५१ प्रवृत्तिपत्रिका
१५२ प्राची
१५३ प्राच्यभारती
१५४ प्रियालापिनी
१५५ बहुश्रुतम्
१५६ बालसंस्कृतम् (मुम्बई)
१५७ ब्रह्मविद्या (चिदम्बरम्)
१५८ ब्रह्मविद्या (कुम्भकोणम्)
१५९ ब्राह्मण-महासंमेलनम्
१६० भवन्स-जर्नल (तिरुपति)
१६१ भारत-दिवाकरः
१६२ भारतधर्मः
१६३ भारतवाणी (पुणे)
१६४ भारतश्रीः (प्रयाग)
१६५ भारतश्रीः (वाराणसी)
१६६ भारतसुधा

१६७ भारती (जयपुर)
१६८ भारती (तिरुव्यारु)
१६९ भारती (पुणे)
१७० भारती (रायपुर)
१७१ भारतीय-विद्या
१७२ भारतीयविद्या (फत्तेगड)
१७३ भारतीयविद्या (मकरन्दगढ)
१७४ भारतोदयः
१७५ भारतोपदेशकः
१७६ मङ्गलम्
१७७ मङ्गलचम्पू
१७८ मञ्जरी
१७९ मञ्जुभाषिणी
१८० मञ्जूषा (कलकत्ता)
१८१ मधुकरः
१८२ मधुमक्षिका
१८३ मधुरलोकः
१८४ मधुरवाणी (गदग)
१८५ मध्यभारती
१८६ मनोरञ्जिनी
१८७ मनोरमा
१८८ महीधरप्रभा
१८९ मागधम्
१९० मानवधर्मप्रकाशः
१९१ मालव-मयूरः
१९२ मालविका
१९३ मित्रम् (पटना)
१९४ मित्रम् (मुजफ्फरपुरम्)
१९५ मित्रगोष्ठी (कलकत्ता)
१९६ मित्रगोष्ठी (वाराणसी)
१९७ मित्रवाणी
१९८ मीमांसाप्रकाशः
१९९ मृत्युञ्जय आयुर्वेदः
२०० मेधा
२०१ मोदवृत्तम्
२०२ रत्नावली
२०३ रविवर्म-संस्कृत-ग्रन्थावली
२०४ रसिक-रञ्जिनी
२०५ राजधानी
२०६ राजहंसः
२०७ लोकानन्ददीपिका
२०८ लोकानां दीपिका
२०९ वङ्गविबुधवाणी
२१० वनौषधिः
२११ वल्लरी
२१२ वाग्देवी
२१३ वाङ्मयम्
२१४ वादिवृन्ददमनी
२१५ वासन्ती
२१६ विकासः
२१७ विचक्षणा
२१८ विनयः
२१९ विज्ञानचिन्तामणिः
२२० विज्ञानज्योतिः
२२१ विद्या (काशी)
२२२ विद्या (बेळगाव)
२२३ विद्यामार्तण्डः
२२४ विद्यारत्नाकरः
२२५ विद्यार्थी

२२६ विद्यावती
२२७ विद्योदयः (कलकत्ता)
२२८ विद्योदयः (भरतपूर)
२२९ विद्वत्-कला
२३० विद्वद्-गोष्ठी
२३१ विद्वन्मनोरञ्जिनी
२३२ विमर्शः (तिरुपति)
२३३ विराजप्रदीपः
२३४ विशिष्टाद्वैतिन्
२३५ विश्वज्योतिः (होशियारपूर)
२३६ विश्वनाथ-पत्रिका
२३७ विश्वभारती
२३८ विश्वम्भरा
२३९ विश्वाश्रितः
२४० विश्वसंस्कृतम्
२४१ वीरशैवप्रभाकरः
२४२ वीरशैवमतप्रकाशः
२४३ वेदवाणी
२४४ वैजयन्ती
२४५ वैदिकधर्मवर्धिनी
२४६ वैदिक-मनोहरा
२४७ वैष्णवसंदर्भः (वृन्दावनम्)
२४८ वैष्णवसुधा
२४९ व्याकरणग्रन्थावली
२५० शंकरकृपा
२५१ शंकरगुरुबलम्
२५२ शारदा (शृङ्गेरी)
२५३ शारदा (सातारा)
२५४ शारदा (प्रयाग)
२५५ शारदा (वाराणसी)

* * * * * * * * * * * *

२५६ शारदा (पुणे)

* * * * * * * * * * * *

२५७ श्रीः
२५८ श्रीकामकोटिप्रदीपम्
२५९ श्रीकाशी-पत्रिका
२६० श्रीविद्या
२६१ श्रीपीयूषपत्रिका
२६२ श्रीमन्महाराज-महापाठशाला-पत्रिका
२६३ श्रीरामकृष्णविनयम्
२६४ श्रीवेङ्कटेश्वर-पत्रिका
२६५ श्रीवैष्णवसुदर्शनम्
२६६ श्रीशारदा (शृङ्गेरी)
२६७ श्रीसज्जनतोषिणी
२६८ श्रुतप्रकाशिका
२६९ षड्दर्शनचिन्तनिका
२७० सकलविद्याभिवर्धिनी
२७१ सज्जनतोषिणी
२७२ संजीवनी
२७३ सत्यविद्या
२७४ सद्धर्मः
२७५ सद्धर्मामृतवर्षिणी
२७६ सनातनः
२७७ सनातन-शास्त्रम्
२७८ संदेशः
२७९ समस्यापूर्तिः

२८० समस्याकुसुमाकरः
२८१ सरयू-संदेशः (बहराइच्)
२८२ सरस्वती
२८३ सरस्वती-महाल-पत्रिका
२८४ सरस्वती-सौरभम्
२८५ सरस्वती-सरोजम्
२८६ **सविता (अजमेर)**
२८७ सहस्रांशुः
२८८ सहृदया (श्रीरङ्गम्)
२८९ सहृदया (त्रिचनापल्ली)
२९० संगमनी
२९१ **संवित् (मुम्बई)**
२९२ संस्कृतम् (अयोध्या)
२९३ संस्कृत-कादम्बिनी
२९४ संस्कृत-कादम्बरी
२९५ संस्कृत-कामधेनुः
२९६ Sk. Critical Journal
२९७ संस्कृत-गद्यवाणी
२९८ संस्कृत-चन्द्रिका
२९९ संस्कृत-चिन्तामणिः
३०० संस्कृत-जर्नल (कुम्भकोणम्)
३०१ संस्कृत-जर्नल (यदुकोटा)
३०२ संस्कृतपद्यगोष्ठी
३०३ संस्कृतपद्यमात्रपत्रिका
३०४ संस्कृतपद्यामृततरङ्गिणी
३०५ संस्कृतपद्यवाणी
३०६ संस्कृतप्रकाशिका
३०७ **संस्कृतप्रचारकम् (दिल्ली)**
३०८ संस्कृतप्रचारिणी पत्रिका
३०९ **संस्कृत-प्रतिभा (दिल्ली)**
३१० संस्कृतप्रतिभा (वाराणसी)
३११ **संस्कृतभवितव्यम् (नागपुर)**
३१२ संस्कृत-भारती (कलकत्ता)
३१३ संस्कृत-भारती (बरद्वान)
३१४ संस्कृत-भारती (वाराणसी)
३१५ संस्कृत-भास्करः
३१६ संस्कृत-महामण्डलम्
३१७ संस्कृत-तरङ्गः
३१८ संस्कृत-रत्नप्रभा
३१९ **संस्कृत-रत्नाकरः (दिल्ली)**
३२० संस्कृतवाणी
३२१ संस्कृत-समाजः
३२२ संस्कृतसंजीवनम्
३२३ संस्कृतसंमेलनम्
३२४ संस्कृत-संदेश (काठमाडौ)
३२५ संस्कृत-संदेशः (वाराणसी)
३२६ संस्कृत-संशोधः
३२७ संस्कृत-साकेतः
३२८ संस्कृतसाप्ताहिकपत्रिका
३२९ **संस्कृतसाहित्यपरिषत् पत्रिका (कलकत्ता)**
३३० संस्कृत-साहित्य-सुषमा
३३१ संस्कृत-स्रोतस्विनी
३३२ संस्कृता

३३३ संस्कृतिः (पण्ढरपुर)
३३४ सर्वगन्धा (लखनौ)
३३५ सागरिका (मध्यप्रदेश)
३३६ साप्ताहिक-पण्डित-पत्रिका
३३७ साप्ताहिक-वैजयन्ती
३३८ साप्ताहिक-देववाणी
३३९ सांमनस्यम्
३४० सारस्वती सुषमा
४४१ साहित्य-रत्नावली
४४२ साहित्य-वाटिका
४४३ साहित्य-सुषमा
३४४ सुदर्शनधर्मपताका
३४५ सुधा (ओरिसा)
३४६ सुधा (जयपुर)
३४७ सुधानिधिविज्ञापन-तरङ्गिणी
३४८ सुधालहरी
३४९ सुधर्मा (मैसूर)
३५० सुप्रभातम् (जम्मू)
३५१ सुरगीः
३५२ सुरभारती (दरभंगा)
३५३ सुरभारती (बडोदा)
३५४ सुरभारती (मुम्बई)
३५५ सुरभारती (वाराणसी)
३५६ सुरभारती (वाराणसी)
३५७ सुषमा
३५८ सुहृद्
३५९ सूक्तिसुधा
३६० सूक्तिसुधा
३६१ सूनृतवादिनी
३६२ सूर्योदयः (वाराणसी)
३६३ सौदामिनी
३६४ स्नेहनिष्यन्दिनी
३६५ स्वास्थ्यम्
३६६ हितकारिणी
३६७ हितभाषिणी
३६८ हिमालयः

१८६६ ख्रिस्ताब्दात् प्रारब्धस्य संस्कृत-पत्रिका-विश्वस्य इयं सूची प्रकाशन-वर्षानुसारिणी, अकारानुक्रमेण च प्रकाश्यते। 'शारदा'-कार्यालयं प्राप्तानां संस्कृत-पत्राणाम् अपि सूची सर्वप्रथमं स्थल-मूल्य-निर्देश-सहिता प्रकाशिता। इयं सूची कलकत्ता-राष्ट्रिय-ग्रन्थालयस्य पं. ना. बा. मराठे-महोदयस्य दिल्ली-भूषणस्य डॉ. रामगोपाल मिश्र महाभागस्य च सहकार्य-सौजन्येन सिद्धीकृत्य प्रकाशिता।

'संस्कृत-पत्रिका-विश्वम्' इति सुविस्तरं सचित्रं च इतिहासग्रन्थं सहस्रपृष्ठात्मकं संपाद्य प्रकाशयितुं कृतसंकल्पैः 'शारदा'कारैः प्रार्थ्यते सर्वेषाम् अस्मिन् प्रकल्प-साहसे सर्वविधं साहाय्य-सहकार्यम्।

'शारदा' पुणे ४११०३० — संपादकः

हमरें जान सदा सिव जोगी । अज अनवद्य अकाम अभोगी ।।
जौं मैं सिव सेये अस जानी । प्रीति समेत कर्म मन बानी ।।

अपण्डिताहं तु सदैव शंभुं जानाम्यजं भोगविकारशून्यम् ।
मत्वानवद्यं हि च योगिनं तं सेवे सदाऽहं खलु वाङमनोभ्याम् ।। १४

तौ हमार पन सुनहु मुनीसा । करिहहिं सत्य कृपानिधि ईसा ।।
तुम्ह जो कहा हर जारेउ मारा । सोइ अति बड़ अबिबेकु तुम्हारा ।।

करिष्यते सार्थमसौ पणं मे कृपानिधानं नियतं मुनीन्द्राः ।
ददाह शंभुर्मदनं मनुध्वे विवेकशून्यं प्रतिभाति तन्मे ।। १५

तात अनल कर सहज सुभाऊ । हिम तेहि निकट जाइ नहिं काऊ ।।
गएँ समीप सो अवसि नसाई । असि मन्मथ महेस की नाई ।।

औष्ण्यं हि यत् सा प्रकृतिः कृशानोर्हिमं न गच्छेन्निकटं कदाचित् ।
गत्वा समीपं नियतं प्रणश्येत् न्यायेन तेनैव च कामनाशः ।। " १६

-हियँ हरषे मुनि बचन सुनि देखि प्रीति बिस्वास ।
चले भवानिहि नाइ सिर गए हिमाचल पास ।।

श्रुत्वा वचस्तद् गिरिराजपुत्र्याः संतोषिता सप्तमुनीश्वरास्ते ।
प्रीतिं च तां वीक्ष्य तथा महेशे प्रणम्य चोमां प्रययुर्नगेन्द्रम् ।। १७

सबु प्रसंगु गिरिपतिहि सुनावा । मदन दहन सुनि अति दुखु पावा ।।
बहुरि कहेउ रति कर बरदाना । सुनि हिमवंत बहुत सुखु माना ।।

श्रुत्वा च तेभ्यः स्मरवृत्तमद्रिः सुदुःखितान्तःकरणो बभूव ।
श्रुत्वा रतिं प्राप्तवरप्रदानां बभूव दुःखप्रशमोऽपि चास्य ।। १८

हृदयँ बिचारि संभु प्रभुताई । सादर मुनिबर लिए बोलाई ।।
सुदिनु सुनखतु सुघरी सोचाई । बेगि बेदबिधि लगन धराई ।।

विज्ञाय शंभोर्महिमानमद्रिः पुरोहितानाजुहुवेऽति भक्त्या ।
विमृश्य नक्षत्रमुहूर्तवारान् वेदानुसारं चक्लृपे विवाहम् ।। १९

पत्री सप्तरिषिन्ह सोइ दीन्ही । गहि पद बिनय हिमाचल कीन्ही ॥

सप्तर्षिवर्गाय विवाहपत्रं दत्त्वा पदेषु प्रणिपत्य भूयः ।
विज्ञापयामास च तान् मुनीन्द्रान् दातुं ततस्तद् विधयेऽपि पत्रम् ॥२०

जाइ बिधिहि तिन्ह दीन्हि सो पाती । बाचत प्रीति न हृदयँ समाती ॥

सप्तर्षयश्चापि ददुस्ततस्तद् विरिञ्चये पर्वतराजपत्रम् ।
अथं विधिश्चाप्यधिगम्य पत्राद् हर्षं न धर्तुं प्रबभूव चित्ते ॥ २१

लगन बाचि अज सबहि सुनाई । हरषे मुनि सब सुर समुदाई ॥

विरिञ्चिरुच्चैरनुवाच्य पत्रं तत् श्रावयामास पुरश्च शंभोः ।
श्रुत्वा सुहृष्टा मुनिदेववृन्दाः विवाहवृत्तं चिरवाञ्छितार्थम् ॥ २२

सुमन बृष्टि नभ बाजन बाजे । मंगल कलस दसहुँ दिसि साजे ॥

बभूव वृष्टिर्गगनात् सुमानां भेरी-स्वनश्चाधिरुरोह नाकम् ।
विरेजिरे सर्वदिशश्च कुम्भैः सुमङ्गलैः सुष्ठु परिष्कृतैश्च ॥ २३

लगे सँवारन सकल सुर बाहन बिबिध बिमान ।
होहिं सगुन मंगल सुभद करहिं अपछरा गान ॥

विमानयानानि च देववृन्दैर्विचित्ररूपाणि परिष्कृतानि ।
दृष्टानि सर्वत्र सुलक्षणानि प्रवर्तितं नर्तनमप्सरोभिः ॥ २४

सिवहि संभु गन करहिं सिंगारा । जटा मुकुट अहि मौरु सँवारा ॥
कुंडल कंकन पहिरे ब्याला । तन बिभूति पट केहरि छाला ॥

जटा-मुकुट-मण्डनं भुजग-भोग-संपादितम्
कृतं च करकङ्कणं श्रवण-भूषणं भोगिभिः ।
विलेपनमभूद्विभूतिरथ सिंहचर्माम्बरम्
वरस्य शुभमण्डनं शिवगणैः सुसंपादितम् ॥ २५

ससि ललाट सुंदर सिर गंगा । नयन तीनि उपबीत भुजंगा ॥
गरल कंठ उर नर सिर माला । असिव वेष सिवधाम कृपाला ॥

शशी निटिलभूषणं सुरनदी धृता मस्तके
सुपूतमुपवीतमप्युरसि कल्पितं पन्नगैः ।

गले गरलनीलिमा नरकपालमालोरसि
त्रिलोचनधरोऽशिवोऽपि शिवधाम चैवं शिवः ॥ २६

कर त्रिसूल अरु डमरु बिराजा । चले बसहँ चढ़ि बाजहिं बाजा ॥

करे डमरुरेकतः स शुशुभे त्रिशूलोऽपरे
वृषेश्वरमथाधिरुह्य च पथा प्रतस्थे शिवः ।
ननाद सुषिरादि-वाद्य-तुमुलः सभेरीस्वनम्
बभूव च महोत्सवः शिव-विवाह-यात्रा-युतः ॥ २७

देखि सिवहि सुरत्रिय मुसुकाहीं । बर लायक दुलहिनि जग नाहीं ॥

विलक्षणं वीक्ष्य वरस्य रूपं देवाङ्गनाः स्मेरमुखास्तदोचुः ।
अन्विष्यमाणापि महीतलेऽस्मिन् वरानुरूपा न वधूः सुलभ्या ॥ २८

बिष्नु बिरंचि आदि सुरब्राता । चढ़ि चढ़ि बाहन चले बराता ॥
सुर समाज सब भाँति अनूपा । नहिं बरात दूलह अनुरूपा ॥

ब्रह्मारमेशादि च देवसंघाः यानानि चारुह्य तदानुजग्मुः ।
कामं सुराः सर्वविधं प्रशस्याः वरानुरूपा न तु यात्रिणस्ते ॥ २९

बिष्नु कहा अस बिहसि तब बोलि सकल दिसिराज ।
बिलग बिलग होइ चलहु सब निज निज सहित समाज ॥
बर अनुहारि बरात न भाई । हँसी करैहहु पर पुर जाई ॥

विहस्यैवं विष्णुः स्वयमभिदधे वाक्यमितरान्
"पृथक्भूत्वा यात स्वसमुदयसार्धं सुरवराः ।
विचित्रेयं यात्रा वरसमुचिता भाति न च मे
गमिष्यामः सर्वेऽप्युपहसनमेवं परपुरे ॥" ३०

बिष्नु बचन सुनि सुर मुसुकाने । निज निज सेन सहित बिलगाने ॥

साकूतमेतद्वचनं च विष्णोराकर्ण्य देवाः कृतमन्दहासाः ।
प्रस्तावमादृत्य हरेः ससेनं यात्राविलग्नाः प्रययुस्तदूर्ध्वम् ॥ ३१

मनहीं मन महेसु मुसुकाहीं । हरि के बिंग्य बचन नहिं जाहीं ॥

श्रुत्वातिवक्रं हरिवाक्यमेतत् सिस्माय शंभुर्न च किञ्चिदूचे ।
विचिन्तयामास तु मानसेऽसौ जिह्मस्वभावः खलु विष्णुरेषः ॥ ३२

अति प्रिय बचन सुनत प्रिय केरे। भृंगिहि प्रेरि सकल गन टेरे॥

मत्वा प्रियं तत्-परिहासवाक्यं संप्रेष्य भृत्यं स गणान् महेशः।
आहूय सर्वान् सपदि स्वकीयान् नियोजयामास विवाहयात्राम्॥ ३३

सिव अनुसासन सुनि सब आए। प्रभु पद जलज सीस तिन्ह नाए॥

धृत्वा शिरोभिरथ शंभुगणास्तदाज्ञाम्
आजग्मुरीशमतिनन्दित-मानसास्ते।
नत्वा च नाथ-पद-पद्म-युगं शिरोभि-
र्यात्रानुगाः सपदि नाथमथानुजग्मुः॥ ३४

नाना बाहन नाना बेषा। बिहसे सिव समाज निज देखा॥

नानानि यानानि समाधिरूढान् विचित्ररूपाभरणाँस्तथा तान्।
आज्ञाकरान् वीक्ष्य गणान् स्वकीयान् स्वयं महेशोऽपि जहास किंचित्।

कोउ मुखहीन बिपुल मुख काहू। बिनु पद कर कोउ बहु पद बाहू॥

बहूनि केषांचिदहो मुखानि नासीदथैकं च तथापराणाम्।
केचिच्च तेषां बहुपादवन्तः यात्रानुगानामथ केऽप्यपादाः॥ ३६

बिपुल नयन कोउ नयन बिहीना। रिष्टपुष्ट कोउ अति तनखीना॥

बहूनि चासन्नयनानि केषां केषांचिदासीन्न च चक्षुरेकम्।
एके गणानामथ पीवराङ्गाः केचित्तु तेषामतिकार्शिताङ्गाः॥ ३७

—तन खीन कोउ अति पीन पावन कोउ अपावन गति धरें।
भूषन कराल कपाल कर सब सद्य सोनित तन भरें।

स्थूलाः केचित् क्षीणाः केचिद् बह्वाकाराः शंभुगणाः।
मङ्गलवेषा केचित्तेषामन्येऽमङ्गल-वेषधराः॥ ३८
कराल-भूषण-भूषित-कायाः कपालहस्तास्तथापरे।
सद्यःशोणित-लिप्त-शरीराः घोराकाराः सर्वे ते॥ ३९

खर स्वान सुअर सृकाल मुख गन बेष अगनित को गनै।
बहु जिनस प्रेत पिसाच जोगि जमात बरनत नहिं बनै॥

गर्दभ-वदनाः श्वान-मुखा वा शृगाल-शूकर-तुण्ड-धराः।
नाना-वेष-विरूपित-रूपान्नालं कश्चिद्वर्णयितुम्॥ ४०

भूताः प्रेताः बहुविधभेदाः मायायोगयुताः केचित् ।
विचित्रवेषान् जातिविभेदान्नालं वाणी वर्णयितुम् ।। ४१

—नाचहिं गावहिं गीत परम तरंगी भूत सब ।
देखत अति बिपरीत बोलहिं बचन बिचित्र बिधि ।।
जस दूलहु तसि बनी बराता । कौतुक बिबिध होहिं मग जाता ।।

कश्चिद् गायन् कश्चिन्नृत्यन् स्वैरं विहरन्तः सर्वे ।
विचित्र-विस्वर-भाषोच्चारा विपरीता सा गणयात्रा ।। ४२
स्वच्छन्देनागच्छन्तस्ते नानालीलाः कुर्वन्तः ।
चित्रविचित्रा शिवगणयात्रा रराज नूनं वरोचिता ।। ४३

इति तुलसी-मानस-नलिने श्रीराम-चरित-मानस-भावानुवादे
शिवविवाहयात्रा नाम एकविंशस्तरङ्गः ।

तरङ्गः २२

इहाँ हिमाचल रचेउ बिताना । अति बिचित्र नहिं जाइ बखाना ।।

शैलेशः कल्पयामास मण्डपं सुमनोहरम् ।
न हि वर्णयितुं चालं सौन्दर्यं यस्य भारती ।। १

सैल सकल जहँ लगि जग माहीं । लघु बिसाल नहिं बरनि सिराहीं ।।
बन सागर सब नदीं तलावा । हिमगिरि सब कहुँ नेवत पठावा ।।

महान्तश्चामहान्तश्च समाहूतास्तदाद्रयः ।
समुद्राश्च तडागाश्च नद्यः सर्वा वनानि च ।। २

कामरूप सुंदर तन धारी । सहित समाज सहित बर नारी ।।

समागताश्च ते सर्वे कामरूपाः सुदर्शनाः ।
नारीभिः सुन्दरीभिश्च सेवकैः सहितं तथा ।। ३

गए सकल तुहिनाचल गेहा । गावहिं मंगल सहित सनेहा ।।

संप्राप्ताः सादरं सर्वे शैलराज-निकेतनम् ।
जगुः सर्वेऽपि सस्नेहं शुभगीतं मुदान्विताः ।। ४

प्रथमहिं गिरि बहु गृह सँवराए । जथाजोगु तहँ तहँ सब छाए ।।

निवासा बहवश्चासन् पूर्वमेव प्रकल्पिताः ।
तेषु तेषु तदा ते ते योग्या योग्येषु चावसन् ।। ५

पुर सोभा अवलोकि सुहाई । लागइ लघु बिरंचि निपुनाई ।।

नगेन्द्रनगरं चासीत्तथा सर्वं सुशोभितम् ।
कदर्थतां यथा यातं ब्रह्म-निर्माण-कौशलम् ।। ६

–लघु लाग बिधि की निपुनता अवलोकि पुर सोभा सही ।
बन बाग कूप तड़ाग सरिता सुभग सब सक को कही ।।

विरिञ्चिरचनापटुत्वमपि यत्-कदर्थीकृतम्
तथा हिमनगेन तत्-पटुतया पुरं मण्डितम् ।
तडागसरितस्तथा सुमनवाटिकाः दीर्घिका-
स्तथा शुशुभिरे पुरे कथयितुं न शक्यं यथा ।। ७

मंगल बिपुल तोरन पताका केतु गृह गृह सोहहीं ।
बनिता पुरुष सुंदर चतुर छबि देखि मुनि मन मोहहीं ।।
–जगदंबा जहँ अवतरी सो पुरु बरनि कि जाइ ।
रिद्धि सिद्धि संपत्ति सुख नित नूतन अधिकाइ ।।

गृहाणि सुविभूषितानि शुभतोरणैः केतुभिः
नराश्च वनितास्तथा मुनिमनोहराः सुन्दराः ।
चकार जननस्थलं स्वयमहो जगज्जन्मदा
समृद्धिसुखसंयुतं तदिदमद्रिगेहं सदा ।। ८

नगर निकट बरात सुनि आई । पुर खरभरु सोभा अधिकाई ।।

श्रुत्वा नगपुरनिकटं संप्राप्तां ताम् अपूर्ववरयात्राम् ।
प्रोत्साहिता पुरी सा रराज सविशेषमेव संभ्रान्ता ।। ९

करि बनाव सजि बाहन नाना । चले लेन सादर अगवाना ॥

सुपरिष्कृतसुखयाना नानालंकरणभूषिताः पौराः ।
हिमनगवचनात् केचित् प्रत्युज्जग्मुस्तदा वरं प्रीत्या ॥ १०

हियँ हरषे सुर सेन निहारी । हरिहि देखि अति भए सुखारी ॥

सुरवरपरिवारं तं दृष्ट्वापूर्वं पुरोगताः पौराः ।
श्रीहरिमपि सुरमध्ये सविशेषानन्दपुलकिताः जाताः ॥ ११

सिव समाज जब देखन लागे । बिडरि चले बाहन सब भागे ॥

अदृष्टपूर्वं च भयप्रदं च दृष्ट्वा तु शंभोर्गणमेलकं तम् ।
चतुष्पदाश्चाप्यवधीर्य यन्तॄन् इतस्ततो दुद्रुविरे भयार्ताः ॥ १२

धरि धीरजु तहँ रहे सयाने । बालक सब लै जीव पराने ॥

केचित्तु पौराः सविशेषधीराः तस्थुः कथंचित्पुरतः पुरारेः ।
पुरोगताः प्राणभयेन सर्वे बालाः सपद्येव पलायितास्ते ॥ १३

गएँ भवन पूछहिं पितु माता । कहहिं बचन भय कंपित गाता ॥
कहिअ काह कहि जाइ न बाता । जम कर धार किधौं बरिआता ॥
बरु बौराह बसहँ असवारा । ब्याल कपाल बिभूषन छारा ॥

मातापितृभ्यां परिप्रश्नितास्ते कथंचिदूचुर्भयकम्पिताङ्गाः ।
"यद् दृष्टमस्माभिरलोकपूर्वं न तद् वयं वर्णयितुं समर्थाः ॥ १४
विवाहयात्रा नु कृतान्तसेना निर्णेतुमेतन्न वयं समर्थाः ।
भ्रान्तो वरो भाति वृषाधिरूढो व्यालैः कपालैश्च विभूषिताङ्गः ॥ १५

-तन छार ब्याल कपाल भूषन नगन जटिल भयंकरा ।
सँग भूत प्रेत पिसाच जोगिनि बिकट मुख रजनीचरा ॥

भसित-निचित-तनु-वसन-रहित-
जटिल-भुजग-नद-रुण्ड-विभूषण-भीषणः ।
विकट-वदन-दनुज-निवह-बहुविध-
भय-जनन-पिशाच-निशाचर-संगतः ॥ १६

जो जिअत रहिहि बरात देखत पुन्य बड़ तेहि कर सही ।
देखिहि सो उमा बिबाहु घर घर बात असि लरिकन्ह कही ॥

शिव-परिणय-गण-नयन-विषय-
करण-पर-मनुज-जीवनमेव च पुण्यतः ।
हिमनग-दुहितृ-परिणय-विधि-
नयन-विषय-करण-भाग्यमिहास्ति च पुण्यतः ॥" १७

–समुझि महेस समाज सब जननि जनक मुसुकाहिं ।
बाल बुझाए बिबिध बिधि निडर होहु डरु नाहिं ॥

जहसुरथ विदित-शिव-गण-चरित-
गृह-गत-गुरुजनास्तु विश्रुत्य वचस्तदा ।
भय-चकित-निज-शिशु-जन-भय-
हरण-विविध-विधि-समाश्वसनं च हि चक्रिरे ॥ १८

लै अगवान बरातहि आए । दिए सबहि जनवास सुहाए ॥

ये तु धीराः पुरोयाता व्याहर्तुं स्वागतं तदा ।
सर्वे ते यात्रया सार्धं प्रत्यावव‍ृतिरे पुरम् ॥ १९
तेषु तेषु च वासेषु सुखसज्जीकृतेषु च ।
ते ते विश्रामिताः सद्यः सादरं वरयात्रिणः ॥ २०

मैनाँ सुभ आरती सँवारी । संग सुमंगल गावहिं नारी ॥
कंचन थार सोह बर पानी । परिछन चली हरहि हरषानी ॥

मङ्गलार्तिक्यमादाय मणिकाञ्चनभाजने ।
प्रतस्थे वरसंकाशं मेना मोदसमायुता ॥ २१
सौभाग्यालंकृताः सर्वा युवत्योऽपि प्रतस्थिरे ।
गायन्त्यो मङ्गलं गानं सहर्षं सह मेनया ॥ २२

बिकट बेष रुद्रहि जब देखा । अबलन्ह उर भय भयउ बिसेषा ॥

आलोक्य विकटं वेषं विरूपाक्षस्य संमुखम् ।
साध्वसोपहताः सर्वाः भ्रान्ता भीताश्चकम्पिरे ॥ २३

भागि भवन पैठीं अति त्रासा । गए महेसु जहाँ जनवासा ॥

देशकालं तथात्मानं विस्मृत्य भयसंकुलाः ।
उपचक्रमिरे सर्वाः प्रधावितुमितस्ततः ॥ २४

यानि यानि च वेश्मानि ददृशुः संनिधं तदा ।
तानि तानि च ताः सर्वाः विविशुश्चात्मरक्षणे ॥ २५

यातास्वदर्शनं तासु मुक्तसङ्गो महेश्वरः ।
उदासीनः प्रतस्थेऽसौ स्वावासं स्थितधीस्तदा ॥ २६

मैना हृदयँ भयउ दुखु भारी । लीन्ही बोलि गिरीसकुमारी ॥
अधिक सनेहँ गोद बैठारी । स्याम सरोज नयन भरे बारी ॥

आहूय तदा कन्यामुपवेश्याङ्के सुदुःखिता मेना ।
नीलोत्पलदलनयना सबाष्पमूचे वचः सवात्सल्यम् ॥ ७२

जेहिं बिधि तुम्हहि रूपु अस दीन्हा । तेहिं जड़ बरु बाउर कस कीन्हा ॥

"रुचिरमिदं यो रूपं ददौ विधाता सुलक्षणे तुभ्यम् ।
कथय कथं मतिमूढं सैव विधाता चकार ते कान्तम् ॥ २८

–कस कीन्ह बरु बौराह बिधि जेहिं तुम्हहि सुंदरता दई ।
जो फलु चहिअ सुरतरुहिं सो बरबस बबूरहिं लागई ॥

सुरतरुसमुचितरूपं सुरसमनोज्ञं फलं सुदिव्यमिदम् ।
बर्बुरतरुणा सार्धं संयोजयितुं कथं बलात् शक्यम् ॥ २९

तुम्ह सहित गिरि तें गिरौं पावक जरौं जलनिधि महुँ परौं ।

गिरिजे गिरिवरशिखरात्प्रपातयेऽहं त्वया सहात्मानम् ।
प्रविशाम्यथवा ज्वलनं प्रक्षुब्धाब्धौ निमज्जये वाऽहम् ॥ ३०

घरु जाउ अपजसु होउ जग जीवत बिबाहु न हौं करौं ॥

नश्यतु गृहमपि सर्वं भ्रश्यतु कीर्तिः कुलस्य वास्माकम् ।
नहि नहि नहि दास्येऽहं यावज्जीवं शिवाय वत्से त्वाम् ॥" ३१

–भई बिकल अबला सकल दुखित देखि गिरिनारि ।
करि बिलापु रोदति बदति सुता सनेहु सँभारि ॥

शोचन्तीमिति मेनां दृष्ट्वा दुःखाकुलः सखीवृन्दः ।
विललाप च सा विवशा रुदती तासां पुरः सुता-स्नेहात् ॥ ३२

नारद कर मैं काह बिगारा । भवनु मोर जिन्ह बसत उजारा ॥

"कथयत बत मे नूनं किमप्रियं सुरमुनेर्मयाचरितम् ।
यन्मे सुखमयगेहं प्रध्वस्तं तेन कारणेन बिना ॥ ३३

अस उपदेसु उमहि जिन्ह दीन्हा । बौरे बरहि लागि तपु कीन्हा ॥

ईदृग्वरलाभार्थं तप्तुं वा तत्तपस्तथा घोरम् ।
सुकुमारा मम कन्या कथमुपदिष्टा च तेन कथयध्वम् ॥ ३४

साँचेहुँ उन्ह कें मोह न माया । उदासीन धनु धामु न जाया ॥

नूनं सुरमुनिरेषो मायामोहादिबन्धनिर्मुक्तः ।
गृहदारापरिवारं न चास्य, विचरति यथैव निःसंगम् ॥ ३५

पर घर घालक लाज न भीरा । बाँझ कि जान प्रसव कै पीरा ॥

न हि भयलेशश्चित्ते न चास्य लज्जालवोऽपि देवर्षेः ।
नाशयतः परगेहं, वन्ध्या जानाति न प्रसूतिरुजम् ॥" ३६

जननिहि बिकल बिलोकि भवानी । बोली जुत बिबेक मृदु बानी ॥

दृष्ट्वैवं विलपन्तीं बहु विकलां वत्सलां तदा जननीम् ।
सविवेकं मृदुमन्दं स्वयमूचे ताम् उमा समाश्वास्य ॥ ३७

अस बिचारि सोचहि मति माता । सो न टरइ जो रचइ बिधाता ॥

"मातर् मा शुच मेवम् भवत्यवश्यं यदीहते दैवम् ॥
विद्धीदं विधिलिखितं प्रोज्झितुमेतद् बलं कुतोऽस्माकम् ॥ ३८

करम लिखा जौं बाउर नाहू । तौ कत दोसु लगाइअ काहू ॥

एतादृशवरलाभो नूनं मत्पूर्वकर्मणः फलितम् ।
व्यर्था सुरमुनिनिन्दा परदोषान्वेषणेन किं कार्यम् ॥ ३९

तुम्ह सन मिटहिं कि बिधि के अंका। मातु ब्यर्थ जनि लेहु कलंका॥

धर्षयसे किं मातर् ललाटलेखं प्रमार्ष्टुमत्रैवम्।
अविचारितकृतमेतद् जनयति ते व्यर्थमेव परिवादम्॥ ४०

–जनि लेहु मातु कलंकु करुना परिहरहु अवसर नहीं।
दुखु सुखु जो लिखा लिलार हमरें जाब जहँ पाउब तहीं॥

अनवसरोऽयं मातर् विषीदितुं संनिरोधयाश्रुरयम्।
अनुबध्नाति सदेदं सुखदुःखं मत्पदं पुरादिष्टम्॥" ४१

सुनि उमा बचन बिनीत कोमल सकल अबला सोचहीं।
बहु भाँति बिधिहि लगाइ दूषन नयन बारि बिमोचहीं॥

श्रुत्वेदं सुविनीतं गिरिजावचनं सुकोमलं धीरम्।
बाष्पपरिप्लुतनयनाः जगर्हिरे चाङ्गना विधातारम्॥ ४२

–तेहि अवसर नारद सहित अरु रिषि सप्त समेत।
समाचार सुनि तुहिनगिरि गवने तुरत निकेत॥

आकर्ण्य वृत्तं निखिलं तदेदं बभूव चिन्ताकुलितोऽचलेन्द्रः।
सनारदः सप्तमुनीन्द्रसार्धं जगाम शीघ्रं गृहमद्रिराजः॥ ४३

तब नारद सबही समुझावा। पूरुब कथाप्रसंगु सुनावा॥
मयना सत्य सुनहु मम बानी। जगदंबा तव सुता भवानी॥
अजा अनादि सक्ति अबिनासिनि। सदा संभु अरधंग निवासिनि॥

सर्वाः समाश्वास्य तदा सुरर्षिः प्राकीर्तयत्प्राक्तनजन्मवृत्तम्।
प्रबोधनार्थं विबुधर्षिरूपे मेनां मनोहारि वचस्तदैवम्॥ ४४

"जानीहि कन्यां परमार्थतस्ते साक्षाज्जगन्मातरमद्रिजाये।
जन्माविहीनां अविनाशिरूपां शंभोः सदार्धाङ्गनिवासिनीं ताम्॥ ४५

जग संभव पालन लय कारिनि। निज इच्छा लीला बपु धारिनि॥

जगत्प्रसूतिस्थितिनाशहेतुं सुतां त्वदीयामवगच्छ भद्रे।
स्वेच्छानुरूपं दधतीमिहैनां लीलाशरीरं खलु विद्धि मेने॥ ४६

जनमीं प्रथम दच्छ गृह जाई । नामु सती सुंदर तनु पाई ॥
तहँहुँ सती संकरहि बिबाहीं । कथा प्रसिद्ध सकल जग माहीं ॥

जाता सुता प्राक्तनजन्मनीयं गेहे प्रजेशस्य सतीति नाम्ना ।
तन्वी शिवस्यैव तदापि भार्या के वा न जानन्ति कथामपूर्वाम् ॥ ४७

एक बार आवत सिव संगा । देखेउ रघुकुल कमल पतंगा ॥
भयउ मोहु सिव कहा न कीन्हा । भ्रम बस बेषु सीय कर लीन्हा ॥

अथैकदैषा सभवा भवानी ददर्श मार्गे रघुवंशसूर्यम् ।
मोहादनादृत्य शिवोपदेशं दधार वेषं जनकात्मजायाः ॥ ४८

–सिय बेषु सतीं जो कीन्ह तेहिं अपराध संकर परिहरीं ।
हर बिरहँ जाइ बहोरि पितु कें जग्य जोगानल जरीं ॥

त्यक्तापराधादथ शंभुनैषा जगाम गेहं स्वपितुः सती सा ।
मखप्रसङ्गे शिवमानभङ्गात् तत्याज देहं निजयोगशक्त्या ॥ ४९

अब जनमि तुम्हरे भवन निज पति लागि दारुन तपु किया ।
अस जानि संसय तजहु गिरिजा सर्बदा संकर प्रिया ॥

जाता ततः सा युवयोरगारे तेपे तपः प्राप्तुमथात्मनाथम् ।
ज्ञात्वेतिहासं त्यज संशयं ते शिवप्रियां विद्धि सदा स्वकन्याम् ॥" ५०

–सुनि नारद के बचन तब सब कर मिटा बिषाद ।
छन महुँ ब्यापेउ सकल पुर घर घर यह संबाद ॥

आकर्ण्य सर्वाः मुनिभाषितं तद् मनोविषादं विजहुः स्त्रियस्ताः ।
क्षणात् पुरे तत् प्रससार-वृत्तं गृहे गृहे सैव कथाप्रसंगः ॥ ५१

तब मयना हिमवंतु अनंदे । पुनि पुनि पारबती पद बंदे ॥

आनन्दवृत्तश्रवणेन हृष्टं हिमाद्रि-मेना-युगलं च सद्यः ।
पुनः पुनस्तत्प्रणनाम पूज्यं रोमाञ्चिताङ्गं दुहितुः पदाब्जम् ॥ ५२

इति तुलसी-मानस-नलिने राम-चरित-मानस-भावानुबादे
मेनासमाश्वासनं नाम द्वाविंशस्तरङ्गः ।

नारि पुरुष सिसु जुबा सयाने । नगर लोग सब अति हरषाने ॥
लगे होन पुर मंगलगाना । सजे सबहिं हाटक घट नाना ॥

स्त्री-पुरुष-बाल-वृद्धाः पौराः सर्वे समुल्लसितचित्ताः ।
मङ्गल-गायन-नर्तन-शुभकाञ्चनघटनियोजनासक्ताः ॥ १

भाँति अनेक भई जेवनारा । सूपसास्त्र जस कछु ब्यवहारा ॥

नानाविधरुचिराणि षड्रसयुक्तानि खाद्यपेयानि ।
सिद्धीकृतानि चासन् परिणयपर्वणि सुशास्त्रविहितानि ॥ २

सो जेवनार कि जाइ बखानी । बसहिं भवन जेहिं मातु भवानी ॥

कस्तां प्रभवति नूनं सर्वां मिष्टान्नसिद्धिमाख्यातुम् ।
निवसति यस्मिन् गेहे सदान्नपूर्णा स्वयं जगन्माता ॥ ३

सादर बोले सकल बराती । बिष्नु बिरंचि देव सब जाती ॥

सादरमाहूयैनं विष्णुविरिञ्च्यादिदेवसमुदायम् ।
भोजनपङ्क्ति-महोत्सवमचलेशः संविधापयामास ॥ ४

बिबिध पाँति बैठी जेवनारा । लागे परुसन निपुन सुआरा ॥

पटुतमपरिवेष्टारः सुरवरसंघान् उपाचरन्निपुणम् ।
सुचतुरमद्रिकुलेशश्चकार संभोजनोत्सवं दिव्यम् ॥ ५

नारिबृंद सुर जेवँत जानी । लगीं दैन गारीं मृदु बानी ॥

सुरसंभोजनसमये स्त्रियः समारेभिरे सुसौम्यगिरा ।
परिहासोक्तिविदग्धाः सुरवरकृतकोपलम्भपरिवादम् ॥ ६

—गारीं मधुर स्वर देहिं सुन्दरि बिंग्य बचन सुनावहीं ॥
भोजनु करहिं सुर अति बिलंबु बिनोदु सुनि सचु पावहीं ॥

ऊचुर्वचनं वक्रं भाषणचतुराः स्त्रियः सपरिहासम् ।
श्रुत्वा सुराः सुदीर्घं मिष्टान्नास्वादने रताश्चासन् ॥ ७

जेवँत जो बढ़्यो अनंदु सो मुख कोटिहूँ न परै कह्यो ।
अचवाँइ दीन्हे पान गवने बास जहँ जाको रह्यो ॥

कोटिमुखान्यपि नालं वर्णयितुं भोजनोत्सवानन्दम् ।
आचम्य ततः सर्वे भुक्त्वा ताम्बूलमीयुरावासम् ॥

–बहुरि मुनिन्ह हिमवंत कहुँ लगन सुनाई आइ ।
समय बिलोकि बिबाह कर पठए देव बोलाइ ॥

गत्वा मुनयो भूयः शुभलग्नं हिमवते समाचख्युः ।
परिणयसुमुहूर्तं तं ज्ञात्वा सुरमण्डलाँश्च संदिदिशुः ॥

बोलि सकल सुर सादर लीन्हे । सबहि जथोचित आसन दीन्हे ॥

सस्नेहादरमेते सुरवरसंघास्तदा समाहूताः ।
विज्ञापिताश्च सर्वे यथोचितासनपरिग्रहं कर्तुम् ॥

बेदी बेद बिधान सँवारी । सुभग सुमंगल गावहिं नारी ॥

सुशोभिता शुभवेदी वेदविधानानुरूपमतिनिपुणम् ।
सुभगसुमङ्गलगानं सुवासिनीभिस्तदा समारब्धम् ॥

सिंघासनु अति दिब्य सुहावा । जाइ न बरनि बिरंचि बनावा ॥
बैठे सिव बिप्रन्ह सिरु नाई । हृदयँ सुमिरि निज प्रभु रघुराई ॥

सिंहासनमथ वेद्यां विरिञ्चि-रचितं व्यराजताप्रतिमम् ।
स्मृत्वा हृदि रघुनाथं नत्वा विप्रान् अलंचकार शिवः ॥

बहुरि मुनीसन्ह उमा बोलाई । करि सिंगारु सखीं लै आई ॥
देखत रूपु सकल सुर मोहे । बरनै छबि अस जग कबि को है ॥

द्विजेन्द्रवचनानुसारमथ सा तदा प्रापिता
सखीभिरचलात्मजाभरणमण्डिता मण्डपम् ।
सुरूपमवलोक्य यत्सुरवराश्च संमोहिताः
निरूपयितुमत्र तन्न सकलं गिरालं कविः ॥

जगदंबिका जानि भव भामा । सुरन्ह मनहिं मन कीन्ह प्रनामा ।।
सुंदरता मरजाद भवानी । जाइ न कोटिहुँ बदन बखानी ।।

ननाम मनसा तदा सुरगणः सतीं सादरम्
समुल्लसितमानसः शिववधूं जगन्मातरम् ।
सुरम्यतमचारुभावचरमावधिः शैलजा
न वर्णयितुमत्र कोटिवदनान्यलं रम्यताम् ।। १४

–कोटिहुँ बदन नहिं बनै बरनत जग जननि सोभा महा ।
सकुचहिं कहत श्रुति सेष सारद मंदमति तुलसी कहा ।।

श्रुतिर्न च सरस्वती कथयितुं गिरा पारयेत्
न पारयति वा सहस्ररसनोऽपि शेषः स्वयम् ।
निरूपयितुमद्रिजारुचिररूपमत्रापि मे
न किञ्चिदपि विद्यते जडमतेऽस्तु वाग्वैभवम् ।। १५

छबिखानि मातु भवानि गवनीं मध्य मंडप सिव जहाँ ।
अवलोकि सकहिं न सकुच पति पद कमल मनु मधुकरु तहाँ ।।

सुरूप-खनिरद्रिजा भववधूर्जगज्जन्मदा
जगाम शिवसंनिधौ च पटमण्डपे ह्रीयुता ।
विवृत्तवदना पतेश्चरणपङ्कजादानता
मनोमधुकरस्तु पद्ममधुपानलग्नस्तदा ।। १६

–मुनि अनुसासन गनपतिहि पूजेउ संभु भवानि ।
कोउ सुनि संसय करै जनि सुर अनादि जियँ जानि ।।

उमाभवयुगं चकार गणनाथपूजाविधिम्
पुरोहितवरैस्तथा समुपदिष्टमारम्भणे ।
न चाद्भुतमिहास्ति किंचिदपि संशयो मास्तु वः
जरा-जनन-मुक्तमत्र चरितं सुराणां सदा ।। १७

जसि बिबाह कै बिधि श्रुति गाई । महामुनिन्ह सो सब करवाई ।।
गहि गिरीस कुस कन्या पानी । भवहि समरपीं जानि भवानी ।।

पुरोहितपुरोगमैः सकलशास्त्रपारंगतैः
यथाश्रुति तदा विवाहविधिरेष निर्वर्तितः ।

हिमाद्रिरपि चैव दक्षिणकरे गृहीत्वा कुशं
दद‍ौ दुहितरं भवाय गतजन्मभार्यामुमाम् ॥ १८

पानिग्रहन जब कीन्ह महेसा । हियँ हरषे तब सकल सुरेसा ॥
बेदमंत्र मुनिबर उच्चरहीं । जय जय जय संकर सुर करहीं ॥

जग्राह शंभुरचलेश्वरजा-कराब्जम्
मोदाकुलं सकलदेवकुलं हि येन ।
चक्रुस्तदा मुनिबराः श्रुतिमन्त्रघोषं
शंभोर्जगर्जुरमरा जयशब्दमुच्चैः ॥ १९

बाजहिं बाजन बिबिध बिधाना । सुमनबृष्टी नभ भै बिधि नाना ॥
हर गिरिजा कर भयउ बिबाहू । सकल भुवन भरि रहा उछाहू ॥

भुवन-विवर-पूरं प्रोत्थितः सर्वदिक्षु
प्रहत-पटह-नादः शंख-वादित्र-घोषः ।
विविध-कुसुम-वृष्टि स्वर्गलोको ववर्ष
तुहिन-गिरि-कुमारी-शंकरोद्वाह-हृष्टः ॥ २०

दासीं दास तुरग रथ नागा । धेनु बसन मनि बस्तु बिभागा ॥
अन्न कनकभाजन भरि जाना । दाइज दीन्ह न जाइ बखाना ॥

गजाश्व-रथ-धेनवः कनक-रूप्य-पात्राणि च
महार्घ-मणि-भूषणानि वसनानि दिव्यानि च ।
विनीत-परिचारिकाः परिचराश्च नैके तथा
ददौ विपुल-यौतकं गिरिपतिः सुतायै तदा ॥ २१

–दाइज दियो बहु भाँति पुनि कर जोरि हिमभूधर कह्यो ।
का देउँ पूरनकाम संकर चरन पंकज गहि रह्यो ॥
सिवँ कृपासागर ससुर कर संतोषु सब भाँतिहिं कियो ।

"न दातुमलमस्मि किंचिदपि पूर्णकामाय ते ।"
हिमाद्रिरिति शंकरं सविनयं तदोक्त्वा वचः ।
पुरारि-पद-पङ्कज-प्रणत-मस्तकस्तस्थिवान्
दयानिधिरसौ शिवोऽपि च गिरिं समाश्वासयत् ॥ २२

शारदा-गौरव-ग्रन्थ-माला ... ५२

श्र म गी ता ।

लेखकः

महाकविः श्रीधर भास्कर वर्णेकर

★

गुरुपूर्णिमा, जुलै १९७७

मूल्यम् २ रूप्यकम्

प्रकाशकः

पं. वसन्त अनन्त गाडगीळ

शारदा-गौरव-ग्रन्थ-माला

४२५ सदाशिव पेठ, पुण्यपत्तनम् ३०

卐

सर्वाधिकाराः प्रकाशकायत्ताः

卐

मुद्रकः

पं. वसन्त अनन्त गाडगीळ

श्रीशारदा-मुद्रण-सिद्धि-मन्दिरम्

४२५ सदाशिव पेठ, पुण्यपत्तनम् ३०

यशवन्त-मुद्रणालयः

१८३५ सदाशिव पेठ, पुण्यपत्तनम् ३०

सरसंघचालकानां श्री. देवरसमहोदयानां पुरस्कारः ।

अखिल-भारतीय-कीर्तिमतां व्युत्पन्न-पण्डितानां सव्यसाचि-लेखकानां डॉ. श्री. भा. वर्णेकर-महोदयानां **"श्रमगीता"** इत्याख्यां नवीनां काव्यकृतिम् उद्दिश्य लेखनावसरे आनन्दातिशयः खलु मे जायते। मानवानां शाश्वत-कल्याण-मार्ग-प्रदर्शकेषु ग्रन्थेषु श्रीमद्-भगवद्गीतायाः अनन्यसाधारणं स्थानं वर्तते। अतः जीवनोद्धारक-सिद्धान्त-प्रवर्तकान् गौण-प्रमुखान् ग्रन्थान् "गीता" इति नाम्ना परंपरया निर्दिशन्ति। तामेव परंपराम् अनुसृत्य डॉ. वर्णेकराणाम् इयम् अल्पाकारा श्रेष्ठ-गुणा काव्यकृतिः **"श्रम-गीता"** इति अन्वर्थक-नाम्ना शोभते।

श्रम-प्रतिष्ठा हि वादातीतं जगन्मान्यं तत्त्वम् अस्ति। श्रमम् अनवलम्ब्य व्यक्तेः समानस्य वा उत्कर्षः अशक्यः एव। द्वयोः महा-युद्धयोः प्रचण्डाघातैः क्षत-विक्षतस्य जर्मन-देशस्य अद्यतनं वैभव-शालि-स्वरूपं, सर्वनाशिना अणु-स्फोटकेन भस्मीभूतस्य जपान-देशस्य रक्षातः संजीव्य उच्चैः आकाशे भ्रमतः फिनिक्स-पक्षिणः इव दुर्निवारं प्रगति-पथाक्रमणम् अथवा इस्रायल-देशे वालुकामय-प्रदेशस्य नन्दनवने रूपान्तरीकरणम् इत्येते चमत्काराः तद्देशीय-जनतायाः अश्रान्त-परिश्रमेणैव समपद्यन्त। सर्वेषां विकसितानां प्रगतानां च राष्ट्राणां विजये इदमेव वक्तुं युज्येत। वस्तुतः अस्माकं भारतीय-परंपरायाम् अपि श्रमस्य असाधारणं महत्त्वं दत्तम् अस्ति। अस्मदीय-शास्त्रेषु अपि श्रमं विना भुञ्जानस्य निषेधः कृतोऽस्ति। परम् अस्माकं समाज-जीवने कृतास्पदासु अनेक-विकृतिषु श्रमविषयिणी अनास्था किंबहुना घृणा वा कापि भयावहा विकृतिः स्पष्टतया दृश्यते। सर्वसामान्यस्य जनस्य तु श्रमं विना अन्यः तरणोपायः नास्ति। परं सुशिक्षितंमन्याः

सधन-ब्रुवाणाश्च शारीरिक-श्रम-करणं स्वप्रतिष्ठाया: शोभावहं नास्ति इति मन्यन्ते। शिक्षणस्य धनस्य वा वृद्ध्या सह श्रम-विषयिणी अनास्था तिरस्कारो वा वृद्धिं भजते इति सार्वत्रिको दु:ख-दायक: अनुभव: अस्ति। त्रिंशद-(३०) वर्षात्मके स्वातन्त्र्योत्तर-काले विविधा: योजना: अपेक्षितं यशो न प्राप्नुवन् इत्यत्र गुणवतां बहुसंख्याकानां परिश्रमानवलम्बनं खलु प्रधानं कारणम् अस्ति। अस्या: विकृते: विनाशनं तथा श्रम-विषयके प्रचलिते दृष्टिकोणे आमूलाग्रं परिवर्तनं खलु कालोऽयं समपेक्षते।

अत एव अहम् अस्या: श्रमगीताया: स्वागतं करोमि। डॉ. वर्णेकराणां संस्कृतभाषा सुबोधा प्रासादिकी च अस्ति तथा रचना च गीता-सदृशी अर्थवाहिनी अस्ति। **'श्रम एव मनुष्याणां कारणं हित-सौख्ययो:'** (मन एव मनुष्याणां कारणं बन्धमोक्षयो:। इतिवत्) किंवा—**साधुरेव स मन्तव्य: सम्यग् व्यवसितो हि स:।'** —इत्यादय: पङ्क्तय: वाचकानां स्मृतिम् उज्ज्वलयन्ति। आधुनिके काले श्रम-प्रतिष्ठाया: साक्षान्मूर्ति: खलु गान्धि-महात्मा! तस्य मुखेन श्रीगीताया: उद्गान-कारणेन डॉ. वर्णेकरै: नूनं समयज्ञता प्रकटीकृता। अस्या: श्रमगीताया: सार्वत्रिक: प्रचार: अत्यावश्यकोऽस्ति। ईदृश्या: उद्बोधिकाया: काव्यकृते: पठनेन चिन्तनेन च परिश्रम-प्रेरणां लोका: लभेरन् इति मे विश्वास:। एवंविधाया: अस्या: अमूल्य-काव्यकृते: रचयितु: **डॉ. श्री. भा. वर्णेकरमहाशयस्य** अहं हार्दिकम् अभिनन्दनं करोमि।

रा. स्व. संघ-केन्द्रकार्यालय:
डॉ. हेडगेवार-भवनम्
नागपुरम् ४४० ००२

म. द. देवरस
(सरसंघचालक:)
दि. ९ जून १९७७

श्रमगीता

महात्मा उवाच—
अथैकदा महात्मानम्
सर्वलोक-नमस्कृतम् ।
सत्याग्रह-प्रवक्तारम्
विश्वशान्ति-परायणम् ॥ १
स्वनामधन्यं तं गान्धी-
नामानम् अतिविश्रुतम् ।
प्रार्थना-समये प्राप्ताः
केऽपि लोक-धुरन्धराः ॥ २
श्रीराजेन्द्रप्रसादोऽसौ-
आद्यो राष्ट्रपतिर्महान् ।
उपराष्ट्रपती राधाकृष्णः
तत्त्वविदां वरः ॥ ३
वल्लभो राजनीतिज्ञो
महोत्साहो जवाहरः ।
मर्मज्ञो राजगोपाला-
चार्योऽन्येऽपि सुविश्रुताः ॥ ४
सर्वेऽपि भारतोद्धार-
संचिन्तन-परायणाः ।
दिक्पाला इव राष्ट्रेऽस्मिन्
लोकपाला जनप्रियाः ॥ ५

प्रार्थना-सुप्रसन्नं तम्
प्रणम्य गुरुमात्मनः ।
अन्तेवासीव सश्रद्धम्
निजगाद जवाहरः ।। ६

हे तात! तिलकादीनां
भवतश्च विशेषतः ।
म तपोभिः संप्राप्तं
स्वातन्त्र्यं हर्षकारणम् ।। ७

जवाहर उवाच—

नवोदित-स्वराज्यस्य धूरस्मासु निवेशिता ।
परम-श्रद्धया लोकैर् ऐकमत्येन सर्वथा ।। ८

चिरस्य पारतन्त्र्येण निर्धनं राष्ट्रमद्य नः ।
अन्न-वस्त्र-गृहैर्हीनाः कष्टं जीवन्ति बान्धवाः ।। ९

इदानीम् अर्थशास्त्रज्ञाः शिक्षा-शास्त्र-विशारदाः ।
वैज्ञानिकास्तान्त्रिकाश्च कला-साहित्य-कोविदाः ।। १०

सर्वाङ्गीणविकासार्थं राष्ट्रस्यास्य महीयसः ।
प्रकल्पयन्ति विविधा योजना भाग्य-भावनाः ।। ११

तासां साफल्य-सिद्धयर्थं नानादेशेभ्य आहृतम् ।
प्रभूतं धन-साहाय्यं मया तावद् अनिच्छता ।। १२

ऋण-कर्ता पिता शत्रू राष्ट्रनेता तु मित्रवत् ।
ऋणं कुलस्य घाताय राष्ट्रस्य तु हिताय तत् ॥ १३

न परं योजनाऽऽलेखैर् न पदार्थसहायतः ।
समुत्कर्षं प्रपश्यामि राष्ट्रस्यास्य कथंचन ॥ १४

क्रान्तदर्शी रहस्यज्ञस्तथ्यवाक् पथ्य-बोधकः ।
त्वादृग् जगद्गुरुर्लोके त्वमेव खलु सांप्रतम् ॥ १५

दारिद्र्य-दैन्य-मग्नस्य राष्ट्रस्यास्य महीयसः ।
सर्वंकषोत्कर्षमूलं महामन्त्रं निवेदय ॥ १६

श्रीजवाहरलालस्य प्रार्थना सा सुमन्त्रिणः ।
अनूदितेव सानन्दम् अन्यैं राष्ट्र-धुरंधरैः ॥ १७

ततः शृण्वन् इव स्वान्तः-स्वनन्तीं गिरमात्मनः ।
तमुवाच महात्माऽसौ भगवान् इव भारतम् ॥ १८

महात्मा प्रोवाच—

स्वागतं वो महाभागा ! राष्ट्रोद्धार-परायणाः ।
विजयोऽस्तु सदा लोके लोक-कल्याण-काङ्क्षिणाम् ॥ १९

राज्याधिकारो हि महान् भारो जगति मे मतः ।
किरीटः कण्टकाकीर्णः स नूनम् अधिकारिणाम् ॥ २०

प्रोत्साह्यन्ते सुखं लोकाः स्वातन्त्र्य-समरोद्यमे ।
निजोद्धारे पुनस्तेषां दुर्घटं हि प्रवर्तनम् ॥ २१

यथा लोका महोत्साहा परस्योत्साद-कर्मसु ।
हन्त ! स्वोद्धार-कार्येषु निरुत्साहा भवन्ति ते ॥ २२

रक्षणं भरणं ज्ञानम् आधि-व्याधि-निवारणम् ।
शासकीयानुदानैस्ते सर्वथेच्छन्ति सर्वदा ॥ २३

निरुद्यमं निरुत्साहं समाजं निष्परिश्रमम् ।
नैवोद्धारयितुं शक्तः साक्षाद् ब्रह्माण्ड-नायकः ॥ २४

आत्मैव ह्यात्मनो बन्धुः आत्मैव रिपुरात्मनः ।
भगवानपि लोकेऽस्मिन् बन्धुरात्मावलम्बिनाम् ॥ २५

महतोऽपि हि राष्ट्रस्य परराष्ट्रावलम्बिनः ।
रक्षणे भरणे ज्ञाने समुत्थानं न शक्यते ॥ २६

आलस्याभिभवाद् यानि न भजन्ते परिश्रमम् ।
तानि शीघ्रं विनश्यन्ति राष्ट्राणि सुमहान्त्यपि ॥ २७

अग्रेसराणि राष्ट्राणि सन्ति तान्येव भूतले ।
योगक्षेमकरो यत्र सेव्यते संततः श्रमः ॥ २८

ध्वस्तान्यपि महायुद्धे राष्ट्राण्युत्थापयन्ति ते ।
यैः समाराध्यते भक्त्या महान् देवः परिश्रमः ॥ २९

कृष्ण-कायः स्विन्न-गात्रो लाङ्गली धूलि-धूसरः ।
तपन् क्षेत्रे श्वसन् उच्चैः कोऽपि देवः परिश्रमः ॥ ३०

राधाकृष्ण उवाच—

अपूर्वः श्रम-देवोऽयं महात्मन् वर्णितस्त्वया ।
विश्व-दैवत-शास्त्रेषु कथितो यो न कुत्रचित् ॥ ३१

सुखैषिणो जना ह्यत्र परिश्रम-पराङ्मुखाः ।
त्वदुक्तं न विजानन्ति श्रम-माहात्म्यमद्भुतम् ॥ ३२

नवीन-युगधर्मस्य त्वमेवासि प्रवर्तकः ।
भूयः कथय भाग्यस्य रहस्यं ह्येतदुत्तमम् ॥ ३३

महात्मा उवाच —

आलस्यस्य परित्यागः श्रमस्य परिपूजनम् ।
नृणां विधिनिषेधात्मा धर्मोऽयं सार्वलौकिकः ॥ ३४

क्षीयन्ते यानि पापानि योग-याग-जपादिभिः ।
श्रम-संकल्पमात्रेण तानि नश्यन्ति तत्क्षणम् ॥ ३५

द्वयक्षरो हि मतः स्वर्गः त्र्यक्षरो नरको ध्रुवम् ।
श्रमोऽतोऽत्र मतः स्वर्ग आलस्यं नरकास्पदम् ॥ ३६

आलस्ये रममाणस्य श्रमाय समसूयतः ।
जनस्य गेहे राष्ट्रे वा दारिद्र्यं रमतेतराम् ॥ ३७

नाभूवन् न भविष्यन्ति न भवन्तीह भूतले ।
सुसमृद्धानि राष्ट्राणि विनाऽश्रान्त-परिश्रमम् ॥ ३८

आत्मोद्धाराय लोकेऽस्मिन् तथा सर्वोदयाय च ।
श्रमो विधात्रा विहितो गरीयान् राजदण्डतः ॥ ३९

श्रमो धत्ते जगत् सर्वं श्रमो राष्ट्रं सुरक्षति ।
श्रमो वर्धयते लोकान् नान्यो धर्मः श्रमं विना ॥ ४०

दण्डस्य हि भयाल्लोको भोगायात्र प्रवर्तते ।
श्रमस्य प्रणयात् किंतु भुङक्ते भोगान् विना भयम् ॥ ४१

विभवोत्कर्षयोर् दाता हन्ता दारिद्र्य-दैन्ययोः ।
न राजा नाऽथ वा देवो विनैकं तं परिश्रमम् ॥ ४२

भूमिरेनं निगिरति कालः कलयतेऽथ वा ।
भोगारक्तं सुखासक्तं समाजम् अपरिश्रमम् ॥ ४३

नाश्रमी वसुधां भुङक्ते नाश्रमी सुखमेधते ।
बिभर्ति नाश्रमी कश्चित् स्वात्मानं वा कुटुम्बकम् ॥ ४४

न श्वसन्ति न जीवन्ति नाश्नुवन्ति मनाक् सुखम् ।
विना श्रमेण केऽप्यत्र श्रमलोको ह्ययं ध्रुवम् ॥ ४५

श्रमश्चेन्न भवेत् लोके विनश्येयुरिमाः प्रजाः ।
आलस्येनाभिभूतास्ताः श्रेयः प्रेयश्च नाप्नुयुः ॥ ४६

संबिभर्ति सुसंपत्सु संरक्षति विपत्सु च ।
संवर्धयति सामर्थ्यं सर्वथा भगवान् श्रमः ॥ ४७

श्रम एव मनुष्याणां कारणं हित-सौख्ययोः ।
विभवोत्कर्षयोर्योग-क्षेमयोः स्वर्ग-मोक्षयोः ॥ ४८

न योगे नाऽथवा क्षेमः कस्याप्यत्र श्रमं विना ।
विना श्रमं प्रवर्धन्ते न श्रियो नाऽथवा धियः ॥ ४९

अकृष्ट्वा धान्यदं क्षेत्रम् अनुत्कीर्य तथाऽऽकरम् ।
अकृत्वा कौशलं कार्ये भवे न विभवाऽऽगमः ॥ ५०

न मन्त्रैर्नाथ वा तन्त्रैः न होमैर्न पुनर्जपैः ।
भाग्यं फलति कस्यापि विनैकं तं परिश्रमम् ॥ ५१

राजसूयाद् वाजपेयाद् ज्योतिष्टोमाच्च सर्वथा ।
भवेत्तोषाय देवानां श्रम-यज्ञो निरग्निकः ॥ ५२

न तपस्तत्त्वतो निद्रा-भोजनादि-नियन्त्रणम् ।
सन्तत-श्रम-निष्ठत्वं तपो हि परमोत्तमम् ॥ ५३

राजेन्द्र उवाच—

योऽयं श्रममयो धर्मस्त्वया तात निवेदितः ।
समर्थः स निराकर्तुं दैन्य-दुःखमयं तमः ॥ ५४

श्रोतुम् इच्छामि तद् भूयो धर्मम् एनम् अनुत्तमम् ।
तृप्येत् को नु जनः शृण्वन् सतां श्रेयस्करं वचः ॥ ५५

नव्ये श्रममये धर्मे तेषां
सदनुयायिनाम् ।
प्रवर्धमानां जिज्ञासाम्
ज्ञात्वा तुष्टोऽभवन्मुनिः ॥ ५६

क्षणम् आमील्य नयने
प्रसन्ने क्रान्त-दर्शिनि ।
भूयोऽप्यन्तर्गिरं शृण्वन्
महात्मा पुनरब्रवीत् ॥ ५७

महात्मा प्रोवाच —

गो-धान्य-धन-दानानि प्रशस्यान्यपि सर्वथा ।
शरीर-श्रम-दानस्य कलां नार्हन्ति षोडशीम् ॥ ५८

शमिनो दमिनस्तद्वद् यागिनो योगिनोऽपि च ।
तेऽजस्रं श्रमिणः क्षेत्रे तुलां नार्हन्ति कर्हिचित् ॥ ५९

प्रश्राम्यन् पङ्किले क्षेत्रे पङ्क-लिप्त-तनुर्हि यः ।
स वन्द्योऽश्रमिणः साधोर् भस्माङ्कित-तनोरपि ॥ ६०

श्रमिणो व्रण-चिह्नानि क्षेत्रेऽरण्ये रणेऽथ वा ।
तानि प्रवाल-मालाभ्यो रोचिष्मन्ति विभान्ति मे ॥ ६१

स्वश्रमोपार्जितं ह्यन्नं तत् नूनं परमामृतम् ।
न तत् क्षीराब्धि-संभूतं न वा यज्ञहुतं हविः ॥ ६२

श्राम्यन्ति गृहिणो यत्र सर्वेऽपि सततं गृहे ।
स्वच्छता सुव्यवस्था च राजते तत्र देवता ॥ ६३

न तद् बिभर्ति पावित्र्यं गाङ्गं वा यामुनं जलम् ।
कृषीवलस्य तप्तस्य कायोत्थं श्रमवारि यत् ॥ ६४

यदाज्याहुतिभिः पुण्यं दीर्घ-सत्रेष्ववाप्यते ।
नूनं शतगुणं तस्मात् क्षेत्रेषु जलसिञ्चनैः ॥ ६५
श्राम्यन्तः खलु यज्वानः श्राम्यन्तः खलु योगिनः ।
श्राम्यन्त एव दातारः श्रीमन्तो न कथंचन ॥ ६६
श्रीमन्तः श्रमवन्तश्च नैव तुल्या कदाचन ।
भान्ति रत्नोपलैरेके श्रमवारिकणैः परे ॥ ६७
श्रीमतां श्रम-हीनानां भारात् खिन्नां वसुन्धराम् ।
प्रीणयन्ति स्वकौशल्यैः श्राम्यन्तः कारुशिल्पिनः ॥ ६८
जयन्ति ते कलावन्तः सन्तत-श्रम-नैष्ठिकाः ।
येषाम् अद्भुतनिर्माणैर् जगदेतत् अलंकृतम् ॥ ६९
धिग् धिक् तं मांसलं देहं रूप-यौवन-शालिनः ।
यो न धत्ते श्रमाभावाद् गात्र-स्नायु-कठोरताम् ॥ ७०
न मुक्तासु न हीरेषु तत् तेजः खलु राजते ।
शिल्पिनः श्रम-तप्तस्य स्वेदाम्बु-कणिकासु यत् ॥ ७१
मांसलोऽपि हि कायोऽसौ नूनं पाषाण-निर्मितः ।
न यः परिश्रमैरेति प्रस्विन्नाखिल-गात्रताम् ॥ ७२
प्रियं पद्मादपीशस्य नीहारकणिकाचितात् ।
मुखं स्वेदाम्बु-संक्लिन्नं शिल्पिनः श्रमजीविनः ॥ ७३
अपरिश्राम्यतः साधोर् अपि काषाय-वाससः ।
चीरं श्रम-जल-क्लिन्नं पवित्रं श्रमजीविनः ॥ ७४
श्रमातिरेक-क्लान्तस्य या ग्लानिः श्रमिणो भवेत् ।
ध्यान-स्थितेरपि श्लाघ्या सा खल्वश्राम्यतो मुनेः ॥ ७५
निद्रालस्योत्थितं सौख्यं संमतं स्याद् दुरात्मनाम् ।
पुण्यात्मनां सतां तत् तु सन्तत-श्रम-संभवम् ॥ ७६

अधनेनापि जीयन्ते श्रमिणा धन-संपदः ।
सधनेन तु हीयन्तेऽश्रमिणा कुल-संपदः ॥ ७७

पद-वाक्यमयी वाणी जिह्वयैव निगीर्यते ।
सा तु श्रममयी वाणी सर्वैरङ्गैर् उदीर्यते ॥ ७८

श्रमेण दुःखं यत् किञ्चित् कार्यकालेऽनुभूयते ।
कालेन स्मर्यमाणं तत् प्रमोदायैव कल्पते ॥ ७९

युद्ध-दान-दया-धर्म-परा वीराश्चतुर्विधाः ।
ते सर्वे श्रमवीरस्य तुलनां यान्ति न क्वचित् ॥ ८०

तपस्विभ्योऽथ कर्मिभ्यो ज्ञानिभ्योऽपि च योऽधिकः ।
मतो योगी ततो नूनं सत्कार्येषु परिश्रमी ॥ ८१

पुष्पिण्यौ श्रमिणो जङ्घे गतिर्धीरोद्धता तथा ।
व्यूढं वक्षो दृढावंसौ वपुरारोग्यमन्दिरम् ॥ ८२

श्राम्यतः शुभकार्येषु जागरूकतयाऽनिशम् ।
श्रम-श्रान्तानि नियतं दैन्यानि खलु शेरते ॥ ८३

ज्ञान-भक्ति-विहीनोऽपि यः श्राम्यति सुकर्मसु ।
साधुरेव स मन्तव्यः सम्यग् व्यवसितो हि सः ॥ ८४

अपि पाप-ग्रहाः सर्वे पाप-राशिष्ववस्थिताः ।
न क्षमाः श्रमदेवस्य भावि-भाग्य-क्षयाय ते ॥ ८५

वल्लभ उवाच—

अपूर्वः श्रम-सिद्धान्तो यस्त्वया नो निवेदितः ।
उदर्क-भूति-कल्याणः स हि चिन्तामणिर्ध्रुवम् ॥ ८६

भूयः श्रावय तं नव्यं सिद्धान्तं सूक्ति-सुन्दरम् ।
अमृतं मर्त्यलोकेऽस्मिन् सदुक्तं हि महात्मनः ॥ ८७

ततो मित्रवदुद्वीक्ष्य क्षणं तं लोहपूरुषम् ।
उवाच सुस्मितां वाचं कोऽप्यसौ पुण्यपूरुषः ।। ८८

महात्मा प्रोवाच —

अप्युन्नत-पदारूढः श्रमं नैव परित्यजेत् ।
श्रमणः खलु राजाऽसौ यः सन्तत-परिश्रमी ।। ८९

स्वर्गता अपि जीवन्ति कीर्तिरूपेण ते भुवि ।
चमत्कृता हि यैर्लोका अविश्रान्त-परिश्रमैः ।। ९०

न क्रमागत-वित्तेन न जात्या सुप्रतिष्ठया ।
पुरुषः श्लाघ्यतां याति स श्लाध्यो यः परिश्रमी ।। ९१

दर्शनीयो हि लोकेऽस्मिन् दरिद्रोऽपि परिश्रमी ।
राजाऽप्यदर्शनीयोऽसौ यो न श्राम्यति कर्हिचित् ।। ९२

अखण्डितमविश्रान्तं यः श्रमं कुरुते नरः ।
श्रियो भूतेः सुकीर्तेश्च लोकेऽसावेव भाजनम् ।। ९३

स चापि महनीयोऽत्र श्राम्यति स्वहिताय यः ।
किं पुनर्हितसौख्याय परेषां यः परिश्रमी ।। ९४

श्रमो हि परमो धर्मः शाश्वतः सार्वलौकिकः ।
श्रमासक्तिः परा भक्तिः भुक्ति-मुक्ति-प्रदायिनी ।। ९५

श्रमदानं महादानं देवानामपि दुर्घटम् ।
श्रमवारि ब्रह्मवारि स्वर्लोकेऽपि सुदुर्लभम् ।। ९६

योगिनामपि सर्वेषां पूजनीयो हि सर्वथा ।
एकाकी प्रतपन् क्षेत्रे श्रमयोगी कृषीवलः ।। ९७

श्रमयोगी महायोगी श्रमिको धार्मिको महान् ।
श्रमाचारी ब्रह्मचारी श्रमशीलो हि शीलवान् ।। ९८

श्राम्यन्तोऽविरतं लोके श्रेयांसो वृषभा हि ते ।
अलसाः किन्तु न श्लाघ्या सिंहा गह्वर-शायिनः ।। ९९

ब्रह्मर्षीणां कुले जातो भूदेवो न हि तत्त्वतः ।
अकुलीनोऽपि भूदेवो यो भुवं संप्रसेवते ।। १००

पूजार्हो नरदेवानां भूदेवानां च सर्वथा ।
श्रमदेवो महात्माऽसौ निशि जाग्रन् दिवा तपन् ।। १०१

भूदेवानां नृदेवानां देवानां स्वर्गिणामपि ।
श्रमदेवो हि पूजार्हः प्राणिनां वृषभो यथा ।। १०२

वृषो हि भगवान् धर्मो मुनीनामिह संमतः ।।
परिश्राम्यत्यविश्रान्तं यदसौ लोकहेतवे ।। १०३

शोचनीयो यथा लोके पतितो निर्धनो जडः ।
श्रमात् पराजितो नूनं शोचनीयतरस्ततः ।। १०४

कृशोत्साहः कृशबलः कृशकर्मा कृशश्रमः
स एव हि कृशो नूनं न शरीरकृशः कृशः ।। १०५

ये शास्त्र-पण्डिता लोके येऽथवा शस्त्र-पण्डिताः ।
श्रमिकैरेव पाल्यन्ते देवैराराधका इव ।। १०६

श्रमिकं निर्धनं चापि भूदेवा भूभृतस्तथा ।
वणिजोऽप्युपजीवन्ति श्रमिको जीवनप्रदः ।। १०७

ब्रह्मचारी गृहस्थश्च वानप्रस्थोऽथ भिक्षुकः ।
सर्वेऽपि सुखमेधन्ते श्रमिकाणां श्रमैरिह ।। १०८

श्रमनीत्यां प्रणीतायां सर्वे सिद्धयन्त्युपक्रमाः ।
धर्मार्थ-काम-मोक्षार्था ऐहिकाः पारलौकिकाः ॥ १०९

दुःखोदर्कं सुखं नूनं विलासालस्य-संभवम् ।
दुःखं चापि सुखोदर्कं सत्कर्म-श्रम-संभवम् ॥ ११०

यद् यावल्लभ्यते ज्ञानं ग्रन्थ-संभार-वाचनैः ।
ततः शतगुणं तत्-तत्-क्षेत्रेषु सुपरिश्रमैः ॥ १११

श्राम्यन्ति स्वहितार्थाय परार्थाय विशेषतः ।
तेषां हि श्रम-निष्ठानां परमात्मा सहायकः ॥ ११२

तदलं बहु भाषित्वा श्रम-माहात्म्यमद्भुतम् ।
हृदये धार्यतां नित्यं तत्त्वमेतदनुत्तमम् ॥ ११३

श्रमो रामः श्रमः कृष्णः श्रमः शंभुः श्रमः प्रभुः ।
श्रमो बुद्धः श्रमः ख्रिस्तः श्रमः पैगम्बरोऽथ वा ॥ ११४

श्रमो दाता श्रमो नेता श्रमो माता पिता श्रमः ।
कर्ता कारयिता लोके ह्येको देवः परिश्रमः ॥ ११५

राजगोपालाचार्य उवाच —

महात्मना त्वया प्रोक्ता श्रमयोग-प्रशंसिनी ।
वाणीयं श्रमगीता हि नवीनोपनिषद् ध्रुवम् ॥ ११६

सुभाषितमयीम् एनां श्रमगीतां प्रमाणयन् ।
सर्व-लोकाग्र-पूज्योऽसौ श्रमयोगी भवेन्महान् ॥ ११७

श्रमधर्ममिमं पुण्यं श्रद्धया यः समाचरेत् ।
स भवेद् भगवन्मान्यो धार्मिकाणां शिरोमणिः ॥ ११८

॥ इति श्रीश्रीधर-विरचितासु नवोपनिषत्सु
महापुरुष-संवादे 'श्रमगीता' समाप्ता ॥

शारदा-गौरव-ग्रन्थ-माला ... ५४

परीक्षिन्नाटकचक्रम् ... १

सा वि त्री

रचयिता

पं. ओगेटि परीक्षित्शर्मा

★

मूल्यम् एक-रूप्यकः

प्रकाशक:
पं. वसन्त अनन्त गाडगीळ
शारदा-गौरव-ग्रन्थ-माला
४२५ सदाशिव पेठ, पुण्यपत्तनम् ४११ ०३०

卐

सर्वाधिकाराः प्रकाशकायत्ताः

卐

मुद्रक:
पं. वसन्त अनन्त गाडगीळ
श्रीशारदा-मुद्रण-सिद्धि-मन्दिरम्
४२५ सदाशिव पेठ, पुण्यपत्तनम् ३०
यशवन्त-मुद्रणालय:
१८३५ सदाशिव पेठ, पुण्यपत्तनम् ३०

॥ सावित्री ॥

सावित्री सूर्यसुषमा दद्याच्छर्क्ति धियं श्रियम् ।
सततं शुष्यमाणेभ्यः जीवनं च महीतले ॥

(नान्द्यन्ते)

सूत्रधारः — प्रिये चारुशीले ! इतः समेहि ।

नटी — एषाऽस्मि । को विशेषः ?

सूत्रधारः — पश्य ।

विभावरी शरच्चन्द्र-चन्द्रिका सागरे परम् ।
स्नात्वाम्बराभूषितासौ शारदेव विराजते ॥

नटी — कल्पनाविलसनम् इदं प्रियं भाति ।

सूत्रधारः — अद्य अस्मिन् शरदृतौ कार्तिक-पौर्णमास्यां भारतीय-स्त्रीणां कीदृशी शक्तिः विद्यते इति दर्शयितुम् अपि च स्त्रियः सर्व-शक्ति-संपन्नाः पुरुषेभ्यः समधिकतरं समाननीयाः इति प्राचीन-परम्परागत-भावनां प्रसन्नीकृत-मृत्युं सावित्री-नाटकरूपेण प्रदर्शयितुं समुत्सुकोऽस्मि । विषयेऽस्मिन् कस्ते अभिप्रायः।

नटी — अयं प्रपञ्चः पुरुष-प्रकृति-विलसितः । सहजतया स्त्री-पुरुषयोः समानता केवलं जन्मतः संक्रामति । स्त्रियः पुरुषाणाम् अपेक्षया अधिकतरं संमाननीयाः इत्येषा भावना सहजा नहि किंतु समानतया द्रष्टव्याः इति मे मनीषा । अपि च, कोऽयं कविः ? किं तस्याभिधानम् ?

सूत्रधारः — अस्य कवेर्नाम परीक्षित्शर्मा । अयं गीर्वाणान्ध्र-भाषा-प्रवीणः कलाभिमानी महाकविश्च ।

नटी — प्रशंसनीयः अस्य प्रयत्नः यतः भारत-जीवन-शक्ति-भूतां सुरभारतीं विस्मृत्य सर्वे भारतीयाः अर्थ-संग्रहणे सुखानुभवे च निरस्त-लोलुपाः भान्ति । किंतु अयं कविः काल-प्रवाहस्य प्रतिकूलो भूत्वा सुखार्थी-

भावनां संत्यज्य साधारण-जीवनं कुर्वन् सुरभारत्यां विलिखति। किमेत
आश्चर्यम् ? अयं भारत-सांप्रदायाभिलाषी देशभक्तः इव आभाति।

सूत्रधारः — अयं ललित-गीता-लहरी इति गेय-काव्यं यशोधरा
महाकाव्यं च विरचितवान् सुरभारत्याम् ।

नटी — अस्य भाषाभिमानः भाषाभिनिवेशश्च प्रशंसनीयौ।

सूत्रधारः — प्रिये देवतार्चन-घण्टारवः श्रूयते। सावित्री मृत्युं
जयम् अर्चयन्ती आस्ते । एहि गच्छावः ।

(इति निष्क्रान्तौ ।)

(ततः सावित्री मृत्युंजयम् अर्चयन्ती मङ्गलारतिं विदधती गायति।)

गीतम्

जय जय जय गौरीरमण !
भक्तजनावलि-संकट-हरण ! जय जय ॥ ध्रु.॥
पटुतर-भव-भय-निरत-विदूरण !
उडुपति-रेखा-पन्नग-भूषण !
सतत-भयंकर-मृत्युनिरासन !
कैलासाचल-शिखर-सुखासन ॥ जय जय
पतित-जनावलि-निरत-विरञ्जन
अहित-जनावलि-सतत-विभञ्जन
पापौघाखिल-जलद-प्रभञ्जन
सत्य-नयापर-सज्जन-रञ्जन ॥ जय जय
संध्या-ताण्डव-मधु-भीकर-रूप ।
सकल-धरातल-नेत्रायुध-भूप ।
त्रिगुणात्मक-काल-नियन्ता ।
धर्मारक्षण-भीकर-कालं हन्ता ॥ जय जय

(इति आरतिं नेत्राञ्जनं करोति। अन्ततः नमस्करोति ।)

सावित्री — (सविषादम्) प्रभो पशुपते। अद्य सत्यवतः सः दिव
-समागतः। त्वमेव रक्षकोऽसि। मृत्युंजयोऽसि । मया सभक्तिकं

आचरणीयं तत् सर्वं यथाविधि कृतम्।

अन्यथा शरणं नास्ति त्वमेव शरणं मम। (इति नमस्करोति)

(ततः प्रविशति सत्यवान्।)

सत्यवान् — (आगत्य आरतिं नेत्राञ्जनं कृत्वा नमस्करोति।) प्रिये! सावित्रि अतितीव्रोऽयम् आरम्भः। इदं व्रतं त्रिसृणां वसतीनां परम-दुश्चरं भवति। विरम। न युक्तं ते।

सावित्री — प्रिय ! मयि संतापः न कार्यः। अहम् इदं व्रतं पारयिष्यामि।

सत्यवान् — व्रतं भिन्धि इति वक्तुं न शक्तः। किंतु पारयस्वेति वक्तुं सुकरमेव।

सावित्री — (मनसि) अयं विचारणीयः दिवसः।

सत्यवान् — प्रिये व्रतं यथोपदिष्टं पारितं त्वया। संप्राप्तः आहारकालः। भुज्यताम्।

सावित्री — प्रिय ! आदित्ये अस्तंगते भोक्तव्यम् इति मम हृदि संकल्पः। एवमेव मया समयश्च कृतः।

सत्यवान् — यथा रोचते ते, तथैव कुरु।

सावित्री — भवत्कृते सर्वमहं विदधामि नाथ !

सत्यवान् — अधुना गन्तव्यं वनं समिदाहरणाय।

(इति पार्श्वस्थितं परशुम् आदाय सत्यवान् वनं प्रस्थितः भवति।)

सावित्री —प्रिय! अद्याहं व्रतलग्नास्मि। त्वयाद्य वनं न गन्तव्यम्।

सत्यवान् — समिदाहरणार्थम् अद्यैव गन्तव्यम्।

सावित्री — प्रिय ! एकाकी त्वं गन्तुं नार्हसि। त्वया सह आगमिष्याम्यहम्।

सत्यवान् — प्रिये ! त्वमपि मया सह वनं जिगमिषसि। न कदापि त्वया वनं गतम्। पन्थाः दुःखः भवति। भवती व्रतोपवास-क्षामासि। कथं पद्भ्यां गमिष्यसि ? स्त्रियः पुष्पहाराः। नहि कण्ठे गृहीत्वा भ्रमितुम्। जगति स्त्रीभिः प्रयाणमालस्यं भवति। अहम् इतो गत्वाऽनुपदमेव आगमिष्यामि।

सावित्री — प्रिय ! सत्यं यदुक्तं भवता। एतावत्-पर्यन्तं नापश्यं वनम्। अद्यैव द्रष्टुं प्रारभे। उपवासात् मे ग्लानिर्न भवति। न परिश्रमः। अहं गमने कृतोत्साहा मां निषिध्य न गमिष्यसि। अहं त्वया सार्धं फलान्याहर्तुम् इच्छामि। अहं किंचिदून-संवत्सरात् आश्रमात् न निष्क्रान्तास्मि।

सत्यवान् — प्रिये ! सुव्रते ! त्वं व्रत-लग्नासि। अपि च वने क्रूरेभ्यः सत्त्वेभ्यः भीतिर्भवति। स्त्रिया सार्धं प्रयाणम् अतिक्लेशदं दुःखदं भवति। नार्हसि तत्रागन्तुम् विरम तव निश्चयात्।

सावित्री — प्रिय ! जगत् सर्वं पुरुष-प्रकृति-विलसितम्। तस्मात् यत्र यत्र पुरुषः तत्र तत्र स्त्री। सर्वदा पुरुष-प्रकृत्योः समागमः अनिष्टापत्ति-नाशकः भवति। भवति कौतूहलं परं मे कुसुमितं वनं द्रष्टुम्। सर्वथा ते साहाय्यं करिष्यामि।

सत्यवान् — सावित्रि यथाभिलषितं भवतु। सज्जीभव गच्छावः।

सावित्री — प्रिय ! अनुगृहीतास्मि। (इति तेन सार्धं प्रस्थिता।)

* * *

॥ द्वितीयं दृश्यम् ॥

(सर्वमपि कान्तारं विविध-मृगैः निर्झर-परिवृत-पर्वतैः तटाकैः नदीभिः विहंगमैः चित्रितमिव भाति।)

सत्यवान् — देवि सावित्रि! शनैः शनैः पदविन्यासं कुरु। अत्र सर्वोऽपि मार्गः कण्टकाकीर्णः भवति।

सावित्री — प्रिय ! दृष्टैव विचरामि। तव सान्निध्ये कण्टकावृतः मार्गः पुष्पाकीर्ण इव प्रतिभाति। सर्वमिदं काननं गन्धिलितं भाति।

सत्यवान् — देवि ! अयं मार्गः तरु-गुल्म-लता-परीतः वर्तते। मे हस्तम् अवलम्ब्य प्रविचल। (इति हस्तं ददाति।)

सावित्री — प्रिय ! तव हस्तावलम्बनेन गहनं संसारं तरिष्यामि ।

सत्यवान् — प्रिये ! अत्र पश्य !

विचित्राणि वनान्यत्र रमणीयानि सर्वतः ।
मयूरगण-नृत्यानि पश्य त्वं विपुलेक्षणे ॥

अस्मिन् वने कोकिलानां मधुरालापाः तव कण्ठस्वरोपमिताः श्रूयन्ते ।

सावित्री — अत्र पश्यतु भवान् एताः निर्झरिण्यः ।

मधुर-सलिल-वाह्यः प्रांशु-शैलाग्र-पाताः
तरल-हसित-फेनाः कङ्कणैः सज्जिताङ्गाः ॥
त्रिदिवमधरयन्त्यश्चारुरम्भादिरामाः ।
धरणिवसनभावैराविशन्तीव भान्ति ॥

सत्यवान् — सावित्रि ! भवत्याः कल्पनेयम् असामान्या अन्येषाम् अनहृद्या च । अत्र पश्य देवि,

हरिणाः वायु-वेगेन धावमानाः परं भिया ।
प्लवन्ते मधुरं शून्ये पश्य त्वं हरिणेक्षणे ॥

एते हरिणाः नयन-चाञ्चल्यमपहृत्य पलायमानाः इव दृश्यन्ते समीक्षस्व ।

सावित्री (विहस्य) — प्रिय ! एते कोकनदाः सलिले सलीलम् आहिण्डमानाः प्रियाभिस्साकं नेत्रोत्सवं संजनयन्ति । मन्दवातेरितानि कुवलयदलानि आवां विलोक्य समुत्सुकानीव डोलायन्ते ।

सत्यवान् — देवि ! सत्यमेव त्वदीया कल्पना । इतः पश्य । इदं सरोवरम् । अस्मिन् नव कह्लाराः नवारविन्दाः अभिनव-कुवलयानि विराजन्ते । मधुपानार्थं तव कुन्तलोपमिताः भ्रमराः मञ्जु गुञ्जन्तः इतस्ततः धावन्ति मालिका-रूपेण । प्रिये इतः पश्य ।

नद्यः पुण्यप्रवाहश्च पुष्पितान् भूरुहोत्तमान् ।
मधुरं पश्य सावित्रि नेत्रोत्सवमिदं सरः ॥

अपि च नद्यः सवेगं स्वप्रियं समुद्रम् आलिङ्गितुं कङ्कणस्वनैः धावन्ति। अयं नगेन्द्रः महोन्नतः महापुरुष इव तिष्ठति। विस्फारित-लोचना समालोकय।

सावित्री — प्रिय ! पश्यामि सर्वाणि नदी-जलानि सर्वतः यथो-द्दिष्टानि अत्रभवता। सर्वाण्येतानि दर्शं दर्शं मे चेतः रसालवालं भवति।

सत्यवान् — प्रिये !

विचित्र-शोभा तरु-वल्लरीणां तनोति सर्वत्र मनोज्ञवर्णैः।
शोभाम् अनिन्द्यां प्रविलोकितुं च पर्याप्तमासीन्नहि नेत्र-युग्मम् ॥

अपि च रसालवालाः एते रसालाः काव्यात्मवत् निगूढं विराजन्ते। इतः पश्य इदं दाडिमीफलं शून्ये योग-पुरुषवत् शीर्षासनं कुर्वत् सुफलता-प्राप्त्यर्थं तपति। (इति तर्जन्या दर्शयति।)

सावित्री — नाथ, इदं शान्तम् अरण्यं विद्यते। सर्वमप्येतत् विधात्रा विचित्रितम्। इदं सौन्दर्याणाम् आयतनम्। अनेन वनदेवता-दर्शनेनैव मे मनोरथः फलति।

सत्यवान् — प्रिये ! सत्यमिदं वनं मनोरथान् साकारं करोति। यतः —

रम्यां विशालां प्रकृतिं विलोक्य दृग्णावृताश्शान्तिमवाप्नुवन्ति।
इयं सदा सर्व-कलाभिरामा रसार्द्र-चित्तं वितनोति नूनम् ॥

अत्र पश्य कामैकरूपिणी मृगी प्रेम्णा मृगं शृङ्गेण कण्डूयते। सर्वत्र गहनं भावैः परं कामायते प्रिय। इतः कारण्डव-चक्रवाकाः तटाक-सलिले मज्जनोन्मज्जनं कुर्वन्तः आरसन्ति। (सावित्रीं विलोक्य) देवि किमर्थं दूयमान-मानसा विचारयसि ? उक्तं खलु मया कुसुम-कोमल-कोमलाङ्गीनां कण्टकावृत-पाषाण-प्रस्तर - निम्नोन्नत - प्रदेशेषु चलनम् अतीव दुःखदं भविष्यतीति। त्वया तत् न श्रुतम्।

सावित्री — न कोऽपि विचारः विद्यते नाथ। भवदीय-सन्तोषा-नन्द-पारवश्यतां विलोक्य एतावत्कालं भवान् न किमपि उक्तवानासीत् मे। कथं भवतः हृदये रसात्मकतां गूढं निक्षिप्य मौनेन जोषमासीत् भवान् इति चिन्तयामि।

सत्यवान् — प्रिये! मा विचारय। अत्र पश्य। अयं शमी-वृक्षः। शमी **शमयते** पापम् इति लोकोक्तिः। अग्निरन्तर्हितोऽस्मिन् राजते। अस्य वृक्षस्य समिधः परमपवित्राः आह्वनाय। ताः मत्परशुना खण्डयित्वा आनयेयम्। त्वम् अत्रैव तिष्ठ। (**इति गत्वा पार्श्वे विद्यमानं शमी-वृक्षं परशुना छिनत्ति।) दक्षिण-हस्त-तर्जन्या ललाटोद्भूतं घर्मजालं संमार्जयन् बाधा-शब्दं करोति**)। प्रिये ! अनेन व्यायामेन मे शिरसि वेदना संजाता। (इति शनैश्शनैः चलितुम् अशक्य इव चलन् तत्रैव परशुं विसृज्य सावित्रीं गच्छति।) देवि ! अनेन व्यायामेन शिरसि वेदना जाता। हृदयं दूयते। आत्मानम् अस्वस्थमिव लक्षये। शिरः शूलैः विद्धः इव भाति। अहं स्वप्तुम् इच्छामि। स्थातुं मे शक्तिर्नास्ति। सीदन्ति मम गात्राणि।

सावित्री — प्रिय। एहि अत्र तव शिरः मे उत्सङ्गे निक्षिप्य स्वपस्व। (इति तस्य शिरः उत्सङ्गे निक्षिप्य उपविशति। चिन्ताक्रान्ता शून्ये पश्यति अश्रु स्रवन्ती।)

(ततः प्रविशति पाशहस्तः आदित्य-समतेजः यमः।)

सावित्री — प्रभो त्वां दैवतम् अभिजानामि। एतत् तव शरीरम् अमानुषम्। त्वं देवेशः इति मन्ये। ब्रूहि किं चिकीर्षसि ? कस्त्वम् ?

यमः — सावित्रि, त्वं पतिव्रताऽसि। तपसाऽन्विताऽसि। तस्मात् त्वयाभिभाषे। माम् आर्याः यम इति ब्रुवन्ति।

भर्ता ते सत्यवान् एषः क्षीणायुः पुण्यजीवनः।
नयामि तमहं बध्वा तदिदं मे चिकीर्षितम् ॥

सावित्री — भगवन् ! तव दूताः मानवान् नेतुम् आगच्छन्ति इति लोके कथयन्ति। भवान् स्वयं कस्मात् समागतवान् अस्ति ? वदतु ! प्रभो !

यमः — सावित्रि ! अयं सत्यवान् धर्मवान्, रूपवान्, सद्गुणसागरः मत्पुरुषैर्नेतुम् अयं नहि। तस्माद् एनं नेतुं स्वयमागतोऽस्मि (इति अङ्गुष्ठमात्रपुरुषं पाशैर्बध्नाति।) गच्छाम्यहम्। (इति यमः गच्छति।) (**दुःखार्ता सावित्री यमम् अनुगच्छति**)। ★ ★ ★

तृतीयं दृश्यम् ।

सावित्री — देवेश तिष्ठ! अत्र भवता प्रोक्तम् 'अयं सत्यवान् धर्मवान्, रूपवान्' इति किमर्थं अस्य प्राणान् नयसि। (इति विलपति।)

यमः — सावित्रि किमर्थं विलपसि। जगति मरणम् अवश्यमेव जन्तोः। किमिति मुधा कुरुषे विलम्बम्? कुरुष्वापरकर्म।

सावित्री — देवेश! किं प्रयोजनं सत्त्व-धर्म-रूपादिगुणैः।

यमः — (विहस्य) एते गुणाः केवलं महापुरुषगुणाः। महापुरुषा अपि पञ्चत्वं प्राप्नुवन्ति। सावित्रि! किं वृथालापैः प्रयोजनम्। निवर्तस्व और्ध्वदेहिकं कुरुष्व।

सावित्री — प्रभो! कुत्र गच्छेयम् अहम् एकाकिनी। कथं गच्छेयं विसृज्य पतिम् एनम्।

> **नीयते यत्र मे भर्ता स्वयं यत्रैव गच्छति।**
> **गन्तव्यं च मया तत्र धर्मोऽयं च सनातनः॥**

यमः — सावित्रि! आमरणमन्योन्यमनुगमनं सहवासश्च कर्तव्यः। इयं लोकरीतिः। मरणानन्तरं शरीरधारिणाम् अनुगमनम् असंभवम्।

सावित्री — यमराट्! अहं ममात्मना तमनुगच्छेयम्। बन्धनम् एतत् अच्छेद्यं समवर्ति। अहं पतिव्रताऽस्मि।

यमः — अनेन शरीरेण त्वं नागन्तुमर्हसि। निवर्तस्व सावित्रि।

सावित्री — प्रभो परेतराट्। तपसा, भक्त्या, भर्तुः स्नेहात् व्रतेन च तव प्रसादेन मे गतिः न प्रतिहता भवेत्।

यमः — सावित्रि! मेऽत्र स्थातुं समयो नास्ति। अतीव विलम्बः भवति। सत्वरं मया गन्तव्यं, निर्वतस्व। (इति गर्जति।)

सावित्री — प्रभो, मैत्रं साप्तपदमाहुः बुधाः। मित्रतां पुरस्कृत्य किंचिद् वक्ष्यामि तत् शृणु। सर्वेषामपि धर्मः प्रधानः इति सन्तः कथयन्ति। तस्माद् धर्मम् आचर।

यमः — सावित्रि! तव अनया गिरा अतीव तुष्टोस्मि। निवर्तस्व।

ते वाणी स्वराक्षर-व्यञ्जन-करुण-रस-हेतु-युक्ता। वरं वृणीष्व। विनास्य जीवितं ददानि ते।

सावित्री — प्रभो ! तव प्रसादात् मे श्वशुरः लब्ध-चक्षुः बलवान् भवेत्।

यम — अनिन्दिते! ददानि तेऽहं वरं यथाभिलषितम्। निवर्तस्व। न ते श्रमो भवेत्।

सावित्री — मे भर्तुसमीपतः श्रमः कुतः। यत्र पतिं नेष्यसि तत्र मे गतिः।

यमः — सावित्रि ! यद् इदं बुध-बुद्धि-वर्धनं वचनं त्वयोक्तं तत् मनोऽनुकूलं हिताश्रयं पुनः सत्यव्रत-जीवितं विना द्वितीयं वरं वरयस्व भामिनि।

सावित्री — मे श्वशुरः हृतं राज्यं लभतु इति द्वितीयं वरं वरयामि।

यमः — स्वयमेव नचिरात् राज्यं प्रतिपत्स्यते। निवर्तस्व ते श्रमो न भवेत्।

सावित्री — शमन ! मे न कोऽपि श्रमः। मम पृथिवीपतिः अनपत्यः पिता भवेत्। पितुः पुत्रशतं तथौरसं भवेत्। कुलस्य संतान-करं च यद् भवेत् तत् तृतीयमेतत् वरयामि ते वरम्।

यमः — पतिव्रते ! त्वं दूरं पथः समागतासि। ते पितुः कुलस्य संतानकरं सुवर्चसं सुतानां शतं भवतु। निवर्तस्व।

सावित्री — प्रभो न दूरमेतत्। मम भर्तुः सन्निधौ मे मनः अस्ति मयोच्यमानं भूयः श्रृणु।

विश्वासो जायते तत्र सौहृदं यत्र विद्यते।
विश्वासं कुरुते तस्मात् जनः सत्सु विशेषतः॥

यमः — अङ्गने ! उदाहृतं ते वचनं मया न श्रुतं त्वदृते। तस्मात् तुष्टोऽस्मि। विनाऽस्य जीवितं वरं चतुर्थं वरयस्व। गच्छ।

सावित्री — समवर्ति ! ममात्मजस्य सत्यव्रतः औरसस्य बल-वीर्य-शालिनां कुलोद्वहं सुतानां शतं भवेत् इति चतुर्थं वरं वरयामि।

यमः — अबले !

शतं सुतानां बल-वीर्य-शालिनां तवाबले प्रीतिकरं भविष्यति ।
नृपात्मजे ते न परिश्रमोऽस्तु दूरं निवर्तस्व पथस्त्वमागता ॥

सावित्री — यम !

सन्तः सूर्यं सत्येन नयन्ति । भूमिं तपसा धारयन्ति । भूत-भव्यस्य ते गति-कारकाः भवन्ति ।

यमः — सर्व-मङ्गले !

सुपदं महार्थवन्तं मनोनुकूलं धर्म-सहितं यथा भाषसे तथा त्वयि मे भक्तिः उत्तमा भाति । तस्मात् पतिव्रते अप्रतिमं वरं वृणीष्व ।

सावित्री — प्रभो !

भर्तारं बिना सुखं, दिवं, श्रियं च न कामये । भर्तृहीना जीवितुं न व्यवसामि । दयान्तरङ्ग ! शतपुत्रता मम त्वयैव दत्ता । मे पतिः ह्रीयते । तस्मात् सत्यवान् अयं जीवतु इति वरं वृणे । तव वचनं सत्यं भविष्यति ।

यमः — भद्रे !

भर्ता तेऽयं मया मुक्तः यास्यतामिह शोभने ।
वाक्यैर्धर्मार्थ-संभूतैस् तोषितोऽहं त्वया भुवि ॥

ते सर्व-मङ्गलानि भवन्तु । (इति यमः प्रतिनिवृत्तः ।)

* * *

चतुर्थं दृश्यम् ।

(सावित्री प्रतिनिवृत्य भर्तारम् उपसृत्य उपगृह्य च उत्सङ्गे शिरः आरोप्य भूमावुपविशति ।)

सावित्री — प्रिय! उत्तिष्ठ । किं चिरं स्वपिषि । अपगत-श्रमः न भूतोऽसि ? (इति हस्तेन शिरः स्पृशति ।)

सत्यवान् — प्रिये सुप्तोऽस्म्यहो । सुचिरं नावबोधितः । किमर्थं पुरुषोऽसौ शयानं मां चकर्ष ।

सावित्री — प्रिय ! किं त्वं स्वप्नं दृष्टवानसि ? उत सत्यं ब्रवीषि?

सत्यवान् — देवि ! मम नाम सत्यवान् । सत्यं ब्रवीमि ! एषः स्वप्नः नहि । अतिभीकरं स्पृहणीय-रूपिणं पुरुषं सूर्य-प्रभा-भास्वरं श्यामाकृतिं समक्षम् अपश्यम् ।

सावित्री — पुरुषर्षभ ! ममाङ्के सुचिरं त्वं प्रसुप्तोऽसि । सः प्रजा-संयमनः यमः देवः । सः महाभागः गतः । विगाढां शर्वरीं पश्य ।

सत्यवान् — देवि, सुमध्यमे ! त्वया सह फलाहारार्थं निष्क्रान्तः । काष्ठं पाटयतः मे शिरसः रुजाऽभवत् । शिरोभिताप-संतप्तः चिरमशक्नुवन् तवोत्सङ्गे प्रसुप्तोऽस्मि । जानाम्यहं सर्वम् । त्वया उपगूढस्य मे मनः निद्रापहृतम् । ततः अपश्यं तमोघोरं पुरुषं महौजसम् । देवि यदि त्वं जानासि, किं तद् ब्रूहि मे । दृष्टः यदि स्वप्नः?नो चेत् सत्यमेव तत् ।

सावित्री— अनघ! श्वः ते सर्वं यथावृत्तम् आख्यास्यामि । उत्तिष्ठ । भद्रं पितरौ ते पश्य । रजनी विगाढा । दिवाकरः निवृत्तः । नक्तंचराः चरन्ति । मृगाः विचरन्ति । दक्षिणस्यां दिशि उग्राः शिवाः घोरं विरुवन्ति । मे मनः कम्पते ।

सत्यवान् — देवि ! इदं वनं घनेन तमसा वृतम् । पन्थानं न विज्ञास्यावः । न शक्ष्यावः गन्तुम् ।

सावित्री — नाथ ! श्वः प्रभाते गच्छावः । इह वसावः । यदि रुचितं वनमिदं ते, क्षपाम् एकां यापयावः ।

सत्यवान् — सावित्रि! मे शिरोबाधा निवृत्ता। मेऽङ्गानि स्वस्थानि लक्ष्यन्ते। अधुना माता-पितृभ्यां मिलितुमिच्छामि। अत्रैकं क्षणम् अपि न स्थास्यामि। माता वृद्धा। पिता वृद्धः। अहमेव तयोः यष्टिः। यदि तौ मामपश्यन्तौ कामवस्थां गमिष्यतः। मातापितृभ्यां विना नाहं जीवितुमुत्सहे। तौ द्वौ मया भर्तव्यौ। तयोः प्रियं कर्तव्यमिति जानामि सावित्रि! पित्रोः दर्शनं कामये। गच्छावः आश्रमान्तिकम्।

सावित्री — (उत्थाय केशान् संयम्य पतिं बाहुभ्याम् उत्थापयति। सत्यवान् उत्थाय पाणिना अङ्गानि प्रमृज्य सर्वाः दिशः समालोकयति।) प्रिय! श्वः फलानि आहरिष्यसि? ते योगक्षेमार्थम्। एतं ते परशुम् अहं नेष्यामि। (इति परशुं गृहीत्वा पुनः भर्तुः सकाशमागत्य वामस्कन्धे भर्तुः बाहुं निवेश्य दक्षिणेन तं परिष्वज्य प्रस्थिता।)

सत्यवान् — देवि! अहं स्वस्थोऽस्मि। बलवानस्मि। उभौ पितरौ दिदृक्षुः अस्मि।

(इति प्रस्थितौ।)

शारदा-गौरव-ग्रन्थमाला, 'शारदा', पुणे ३०

१. डॉ. राजेन्द्रप्रसादचरितम	वा. आ. लाटकर	३.००
२. वात्सल्यरसायनम्	डॉ. श्री. भा. वर्णेकर	१.००
४. श्रीरामकृष्णपरमहंसीयम्	डॉ. श्री. भा. वर्णेकर	१.२५
५. बालकानां जवाहरः	पं. विघ्नहरि भा. देव	१.००
६. श्रीमान् विन्स्टनः चर्चिलः	पं.वा.ना.ओदुम्बरकरशास्त्री	१.००
७. अप्पाशास्त्री : साहित्यसमीक्षा	प्रा. अशोक अकलूजकर	२.००
८. श्रीशिवराज्योदयम्	डॉ. श्री. भा. वर्णेकर	४०.००
(साहित्य अकादमी पारितोषिकम् १९७५)		
९. 'समानमस्तु वो मनः'	डॉ. ग. बा. पळसुले	३.००
१०. मराठी-संस्कृत-शब्दकोषः	जोशी-परांजपे-गाडगीळ	२५.००
११. भूपो भिषक्त्वं गतः	पं. ग. पां. लोण्ढेशास्त्री	१.००
१२. विनायक-वीर-गाथा	डॉ. ग. बा. पळसुले	३.००
१३. आङ्ग्ल-लघु-काव्यानुवादमाला	पं. ल. ज. खरे	२.००
१४. श्रीराजयोगभाष्यम्	डॉ. चि. त्र्यं. केङ्घे	५.०५
१५. मुक्तक-मञ्जूषा	पं. दि. दा. बहुलीकर	२.००
१६. ललित-गीता-लहरी	पं. ओगेटि परीक्षितशर्मा	१.००
१९. संस्कृत-प्रगति-पथे कः तिष्ठति ?	पं. ल. म. चक्रदेव	२.००
२०. शाङ्कर-दिग्विजयः	श्रीविद्यारण्यः	८.००
२१. शिष्यलेखः (चन्द्रगोमिपादः)	डॉ. प. ल. वैद्य	५.००
२२. महात्म-चरितम्	पं. पं. ना. पाठक	२.००
२३. स्तोत्र-पञ्चदशी	पं. म. स. आपटीकर	१.००
२४. धन्येयं गायनी कला	डॉ. ग. बा. पळसुले	१.००
२५. विवेकानन्द-चरितम्	डॉ. ग. बा. पळसुले	१०.००
२६. शारदा-प्रसादः	पं. दत्तात्रेयशास्त्री दाणी	२.००
२७. अरविन्दचरितम्	पं. यज्ञेश्वरशास्त्री	३.००
२८. धन्योऽहं धन्योऽहम्	डॉ. ग. बा. पळसुले	५.००
२९. खेटग्रामस्य चक्रोद्भवः	डॉ. ग. बा. पळसुले	१.००
३०. अप्पाशास्त्रि-चरितम्	पं. वा. ना. ओदुम्बरकर	४०.००

३१. शिवराजाभिषेकम्	डॉ. श्री. भा. वर्णेकरः	१०.००
(महाराष्ट्रशासनस्य पुरस्कारेण प्रकाशितम्)		
३२. श्रीगणपति-वाक्यार्थ-महासभा	पं. वसन्त अनन्त गाडगीळ	५.००
३३. अमरनाथकथा	ना. रा. बोडस	५.००
३४. आचार्यचरितम्	पं. कुंभघोणं नारायणशास्त्री	२.००
३५. श्रीगणपतिवाक्यार्थमहासभा	पं. वसन्त अ. गाडगीळ	५.००
३६. श्रीविष्णु-सहस्र-नाम-स्तोत्रम्	पं.भीमाशंकर त्र्यम्बक केण्ढे	२५.००
३७. यशोधरा-महाकाव्यम्	पं. ओगेटि परीक्षितशर्मा	१५.००
३८. श्रीविष्णुसहस्रनामावलिः।	पं. वसन्त अ. गाडगीळ	२.००
३९. मनोबोधः।	श्रीरामदासानुदासः	१.२५
४० उपनिषन्मधु	मनोहर दिवाण	५.००
४१. संशयरत्नमाला	प्रा. नलिनी पराडकर	१.५०
४२. स्तोत्राष्टकम्	विद्वान् बालगणपतिभट्टः	१.५०
४३. गणयज्ञ्छागः	प्रा. कमलारत्नम्	१.००
४४. स्तोत्ररत्नमाला	प्रा. ह. त्र्यं. देसाई	१.५०
४५. श्रीशरन्नवरात्रचम्पूः	को. कृष्ण जोयसर्	५.००
४६. भारतीय-राजनीति-प्रकाशः	पं. राजेश्वरशास्त्री द्रवीड	१५.००
४७. हरिपाठः।	पं. म. स. आपटीकर	२.५०
४८. ते वयं पारसीकाः	डॉ. त्रि. ना. धर्माधिकारी	२.५०
४९. संस्कृत-नियतकालिक-सूची	पं. वसन्त अनन्त गाडगीळ	१.००
५०. श्रीगणपति-वाक्यार्थ-महासभा	पं. वसन्त अनन्त गाडगीळ	५.००
५१. श्रीतुलसी-मानस-नलिनम्	नलिनी साधले (पराडकर)	४०.००
५२. श्रमगीता	डॉ. श्री. भा. वर्णेकर	२.००
५३. ध्रुवचरितम्	पं. के. सीतारामशर्मा	३.००
५४. सावित्री	पं. ओ. परीक्षित्शर्मा	१.००

प्राप्तिस्थानम् –

'शारदा'-कार्यालयः, पत्रमञ्जूषा 750, **पुण्यपत्तनम्** 411 030

शारदा-गौरव-ग्रन्थमाला ... ५५

श्रीगणपति-वाक्यार्थ-महासभा

[१८९८–१९७६]

संपादकः

पं. वसन्त अ. गाडगीळ

★

मूल्यम् पञ्च रूप्यकाः

प्रकाशक:
पं. वसन्त अनन्त गाडगीळ
शारदा-गौरव-ग्रन्थ-माला
४२५ सदाशिव पेठ, पुण्यपत्तनम् ४११ ०३०

卐

प्रकाशनोत्सवः —
श्रीशृङ्गेरीमठः, भाग्यनगरम् (हद्राबाद)
भाद्रपदपूर्णिमा १८९० (२७-९-१९७७)

卐

सर्वाधिकाराः प्रकाशकायत्ताः

卐

मुद्रक:
पं. वसन्त अनन्त गाडगीळ
श्रीशारदा-मुद्रण-सिद्धि-मन्दिरम्
४२५ सदाशिव पेठ, पुण्यपत्तनम् ३०
यशवन्त-मुद्रणालय:
१८३५ सदाशिव पेठ, पुण्यपत्तनम् ३०
(शासनदत्त युक्त-मूल्य-कर्गजे मुद्रणम् १६००)

प्रकाशकीयम्

श्रीशृङ्गेरी-जगद्गुरु-महासंस्थाने प्रतिसंवत्सरं प्रवर्तमाना श्रीगणपति-वाक्यार्थ-महासभा विद्या-श्रीः 'संस्कृत'-हृदयस्य ,धर्म-प्राणस्य भारत-वर्षस्य । प. पू. श्रीमत्-जगद्गुरु-श्रीमद्-अभिनव-विद्यातीर्थ-महास्वामिवर्याणाम् आध्यक्ष्ये प्रवर्तमानां महासभाम् एनाम् अलंकर्तुं भारत-ख्याताः पण्डित-पुण्डरीकाः सश्रद्धं समुपस्थाय श्रीमज्जगद्गुरु-श्री-चरणानाम् अनुग्रहपात्रतां प्रपद्यन्ते । पू. जगद्गुरू-शंकराचार्य-श्रीभारतीतीर्थस्वामिचरणानां संनिधाने शृङ्गेरी-पीठस्य आस्थान-पण्डित-श्रेष्ठानां विद्यानिधि पं. व्ही. रामचन्द्रशास्त्रिणां संचालकत्वेन विविध-शास्त्रगतपूर्वोत्तर-पक्ष-रूप-दूर्वाङ्कुरान् श्रीमहागणपति-चरणारविन्दयोः समर्पयन्ती इयं विद्वत्-सभा आसेतु-हिमाचल भारत-वर्षात् सश्रद्धं समुपस्थितान् विद्याधनान् विद्या-विभव-साक्षात्कारेण तोषयति ।

इयं वाक्यार्थमहासभा प. पू. 'श्री'चरणानां कृपाप्रसादेन विदुषां सहयोगेन च अक्षरीकृत्य ग्रन्थमाला-पुष्पत्वेन प्रतिवर्षं प्रकाशनीया इति कृत-संकल्पाः वयम् । तत्र सातत्येन चतुर्थवर्षे प्राप्त-प्रकाशन-भाग्या शारदा-गौरव-ग्रन्थमाला । ग्रन्थरत्नस्य अस्य प्रकाशने मुद्रणे च यथापूर्वं मुद्रित-शोधनादि-सहकार्यं कुर्वाणाय शारदोपासक-मित्र-परिवाराय श्रीमती सुधा वि. अर्जुनवाडकर-डॉ. पराञ्जपे विनायकशास्त्रि-प्रमुखाय धन्यवाद-साहस्रीं वितीर्य एनाम् महासभाम् अक्षरीकृत्य ग्रन्थ-पुष्पम् इदं श्रीमहागण-पति-प्रीत्यर्थं समर्पयितुं लब्धावसराः वयं स्वात्मानं धन्यं मन्यामहे । शारदोपासकाः स्वयम् अभ्यस्य ग्रन्थरत्नम् इदं स्वात्मानं कृतार्थयन्तु इति सादरं विज्ञापयामः । परम-कारुणिकैः प. पू. 'श्री'चरणैः इत्थम् एव यथापूर्वं सेवा-स्वीकारेण अनुग्राह्या शारदा-गौरव-ग्रन्थ-माला इत्येव साभिवादनं संप्रार्थ्य विरमामः प्रकाशकीय-विस्तरात् । इति शम् ।

पुण्यपत्तनम्
411 030

वसन्त अनन्त गाडगीळ
शारदा-गौरव-ग्रन्थमाला

निबन्धानुपूर्वी

निबन्धः	लेखकः	पृष्ठाङ्कः
वेदान्त-शास्त्रम्		
१. जिज्ञासासूत्रे प्रथमवर्णके—	पं. मल्लवझल वेङ्कटसुब्बराशास्त्री	१
२. 'यतो वा इमानि भूतानि जायन्ते ।'	वं. विश्वनाथशास्त्री	७
न्याय-शास्त्रम्		
१. मिथ्यात्वानुमाने सोपाधिकत्व-शङ्का-तन्निरासश्च ।	होसकेरे अनन्तमूर्तिशास्त्री	९
२. सिद्धान्त-व्याप्तिः ।	पं. सीतारामशर्मा कुरुंदकर	११
३. अत्र वदन्ति कल्प-परिष्कारः ।	पं. टी. रामवारियर्	१२
मीमांसा-शास्त्रम्		
१. विलक्षणत्वाधिकरणम् ।	पं. रामचन्द्रशास्त्री सूरिः	१४
२. शेषः परार्थत्वात् ।	बी. रामभट्टः	१७
३. कपालेषु श्रपयति ।	बी. गणेशभट्टः	१९
४. दहराधिकरणम् ।	शास्त्रुल विश्वनाथशर्मा	२३
व्याकरण-शास्त्रम्		
१. स्थानिवदादेशोऽनल्विधौ	शिष्ट साम्बमूर्तिशास्त्री	२६
२. अन्तादिवच्च	शालिग्राममिश्रः	२९
३. कर्तुरीप्सिततमं कर्म	पेरि सूर्यनारायणशास्त्री	३०
४. यदागमपरिभाषा अवतारिका	पिशुपाटी सुब्रह्मण्यशास्त्री	३२
५. सार्वधातुकार्धधातुकयोः	के. एम्. एन्. दिवाकरन् नम्पूतिरि	३३
६. कालाध्वनोरत्यन्तसंयोगे	पं. दामोदर पिशारकः	३५
७. समर्थः पदविधिः	के. गोविन्दन् नम्बियार	३६
८. हलन्त्यम्	माधवशरण उपाध्यायः	३८
९. उत्तरपदत्वपदार्थविचारः	नर्मदेश्वर त्रिपाठी	३९

१. जिज्ञासासूत्रे प्रथमवर्णके — वाचस्पतिमतम् अनुसृत्य विचारः ।

अथातो ब्रह्मजिज्ञासा — त्रिपदमिदं सूत्रम् । अत्र जिज्ञासापदेन संशय-प्रयोजने सूच्येते। साक्षादिच्छाव्याप्यत्वाद् ब्रह्मज्ञानं परमं प्रयोजनम्। यतः कर्मज्ञानानन्तरमिव ब्रह्मज्ञानानन्तरम् अनुष्ठानं नास्ति । जिज्ञासा तु संशयकार्यभूता सती स्वकारणं संशयं सूचयति । संशयश्च ब्रह्मणि । अत्र जिज्ञासा-प्रकृति-भूत-ब्रह्मज्ञान-पदेन वृत्त्यभिव्यक्त-चैतन्यम् अभिप्रेतम् । वृत्तिश्च तदभिव्यक्त-चैतन्यं चेति द्वन्द्वैकवद्-भावः । तथा च वृत्ति-पदेन विचार-साध्यं ब्रह्मनिर्णयात्मकं ज्ञानम् अभिप्रेतम् । तथा च वृत्ति-ज्ञान-विषयीभूते ब्रह्मणि संशयः । सूत्राणाम् अनेकार्थत्वस्यालंकार-भूतत्वात् एकमेव ब्रह्मजिज्ञासा-प्रकृतिभूतं ब्रह्मज्ञान-पदं विषय-प्रयोजन-रूपम् अर्थद्वयम् अभिधत्ते ।

अत्राथशब्दस्यानन्तर्यार्थत्वम् अभिप्रेतम् । अशाद्वस्य मङ्गलार्थस्य वाक्यार्थे समन्वयाभावात्, ब्रह्मजिज्ञासाया अनारभ्यमाणत्वाच्च मङ्गला-रम्भरूपार्थद्वय-परित्यागः कृतः । अत्रायं कश्चनाक्षेपः — प्रधानप्रत्ययार्थ-भूतेच्छायाः आरम्भार्थकाथशब्देनान्वयासम्भवेऽपि तद्विशेषणीभूतब्रह्मज्ञान-स्यैव दण्डिन्यायेनारम्भार्थकाथशब्देनैवान्वयः अस्तु इति । तथाहि — दण्डी प्रैषानन्वाह इत्यत्र प्रैषानुवचनात्मक-कार्यद्वयकर्तृत्वं मैत्रावरुणस्य प्रतीयते। तच्च "मैत्रावरुणः प्रेष्यति अन्वाह च।" —इति वाक्यान्तर-प्राप्तत्वात् प्राप्तस्य पुनर्विधानं न संभवतीति तत् परित्यज्य तद्विशे-षणीभूत-दण्डग्रहणस्यैव विध्यन्वयित्वमाश्रितम् । एतादृश-दण्डग्रहणस्य क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छति इत्यनेनार्थात् सिद्धत्वेऽपि तस्य सिद्धस्य दण्डग्रहणस्य मैत्रावरुणकर्तृक-रात्रिसञ्चारादावपि विनियोगसंभवे उच्चैः स्थित्वा प्रैषानुवचनात्मककार्य एवेदं दण्डग्रहणं विनियोक्तव्यम् इति कार्यान्तरनिवृत्तिफलकत्वरूप-परिसंख्यायाः तेन वाक्येनाप्राप्तत्वात् । तदर्थं दण्डी प्रैषानन्वाह इत्यादिना दण्डग्रहणस्य विधानं संभवत्येव । अतः अनेन न्यायेनात्रापि ब्रह्मज्ञानम् आरम्भार्थकाथ-शब्देन साकम् अन्वेतु नाम। तथाच ब्रह्मज्ञानमारभ्यते इत्यर्थः युज्यत एव।

ब्रह्मज्ञानमित्यत्र ब्रह्मतज्ज्ञानमित्यर्थः तत्र ब्रह्म तावत् जन्मादिसूत्रेण स्वरूपतः फलाध्यायेन च प्रयोजनरूपतया च प्रतिपाद्यते। ब्रह्मविषये प्रमाणयुक्ती तु ब्रह्मज्ञानेत्यत्र करणव्युत्पत्तिमता ज्ञानपदेन संगृहीते भवतः। ते च समन्वय-विरोधलक्षणाभ्यामध्यायाभ्यां प्रतिपाद्येते। मुक्तिसाधनब्रह्मज्ञानं तु भाव-व्युत्पत्तिमता तेनैव ज्ञानपदेन संगृहीतं सत् साधनाध्यायेन प्रतिपाद्यते। तस्मात् अथशब्दस्य ब्रह्मतज्ज्ञानप्रतिप्रादनप्रारम्भार्थत्वं वक्तुं शक्यम्। इत्याक्षेप्तुराशयः।

अत्रेदं समाधानम् :— यद्यप्यत्र दण्डिन्यायेन ब्रह्मज्ञानस्यारम्भा-र्थकाथशब्देनान्वयो वक्तुं शक्यते एव। अथापि अस्ति काचिदत्रानुपपत्तिः। ब्रह्मज्ञानस्य प्रारम्भार्थकाथ-शब्देनान्वये प्रारभ्यमाणं ब्रह्मज्ञानं वृत्तिरूपमेव भवितुम् अर्हति। तेन विषय एव लभ्यते। वृत्त्यभिव्यक्तनिरतिशयानन्दरूप-स्वरूपज्ञानस्येच्छाविषयत्वेनाग्रहणात् परमपुरुषार्थः सूत्रेण साक्षात् दर्शितो न स्यात्। अतः स्वरूप-ज्ञान-प्रेप्साप्रतिपादनेन तस्य स्वरूपज्ञानस्य परम-पुरुषार्थत्वं कर्मं ब्रह्मविषयकनिर्णयेच्छाप्रतिपादनेन ब्रह्मणः प्राक् अविज्ञात-तया संदिग्धत्वेन च विषयत्वमपि सूचयितुं पूर्वप्रदर्शितरीत्या जिज्ञासा-पदस्य स्वरूपज्ञान-निर्णय-ज्ञानेच्छा-द्वय-प्राधान्यमेवाभ्युपेयं भवति।

एवं विषयप्रयोजनयोः सूचितयोस्सतोः पूर्वपक्षी पुनराक्षिपति—ज्येष्ठप्रमाणप्रत्यक्ष-विरोधात् आम्नायस्यैव तदपेक्षस्याप्रामाण्यमुपचरि-तार्थत्वं चास्तु इति। अयं हि पूर्वपक्षिण आशयः — प्रमाणानां मध्ये प्रत्यक्षस्य प्रथमोत्पन्नत्वात् ज्येष्ठत्वम्। आगम-प्रमाणस्य तु तदनन्तर-वर्तित्वात् कनिष्ठत्वम्। अतः जघन्यस्यागमस्य ज्येष्ठानुवर्तित्वस्य युक्त-त्वात् लोकसिद्धत्वाच्च प्रत्यक्षप्रमाणविरुद्धं जीवब्रह्मैक्यरूपमर्थं आगमप्रमाणं न वक्तुं शक्नोति। अपि चागमो नाम शब्दात्मकः। शब्दस्तु श्रवणेन्द्रियेणा-गृहीतस्सन् अर्थम् अवबोधयितुं न शक्नोति। अतः आगमेनार्थे अवबोधनीये अस्ति प्रत्यक्षप्रमाणापेक्षा आगमस्य। अतः प्रत्यक्षमुपजीव्य प्रवृत्तस्यागमस्य तद्विरुद्धार्थबोधनमसमञ्जसम् उपजीव्यविरोधात् इति पूर्वपक्षस्याशयः। अत्रेदं विकल्प्य समाधीयते सिद्धान्तिना :—

किं प्रत्यक्षस्य ज्येष्ठत्वं प्राबल्यप्रयोजकमभिप्रेयते त्वया अथवा सापेक्षत्वम् (उपजीव्यत्वं) प्राबल्यप्रयोजकमभिप्रेयते। आद्ये अपच्छेदा-

धिकरणन्यायविरोधः । तत्र हि प्रतिहर्तृकर्तृकापच्छेदनिमित्तक-सर्वस्व-दक्षिणाक-प्रायश्चित्तेन कनिष्ठेन, उद्गातृकर्तृकापच्छेद-निमित्तकादाक्षिण्य-पूर्वक-पुनःप्रयोगात्मक-प्रायश्चितस्य ज्येष्ठस्यापि बाधोऽङ्गीकृतः। अपि च लोकेऽपि इदं रजतमिति भ्रामकज्ञानस्य ज्येष्ठस्यापि समनन्तरोत्पन्नेन कनिष्ठेन इयं शुक्तिरिति ज्ञानेन बाधदर्शनाच्च।

द्वितीये किमागमस्य प्रत्यक्षप्रमाणापेक्षा दोषापनयार्थं वा प्रामाण्य-संपादनार्थं वा अथवा प्रमित्युत्पत्त्यर्थं वा ? आद्यद्वयं न घटते। दोषाणां पुरुषबुद्धि-प्रभवत्वात् अपौरुषेये वेदे पुरुषबुद्धिप्रभवाणां दोषाणां प्रसक्ते-रेवाभावात् न तदर्थं प्रत्यक्षापेक्षा आगमस्य। एवमेव स्वतःप्रमाणभूतस्य वेदस्य अन्यतःप्रामाण्य-संपादनापेक्षैव नास्तीति न तदर्थमपि प्रत्याक्षापेक्षा आगमस्य।

अथ प्रमित्युत्पत्त्यर्थमिति तृतीयकल्पो यदि समाश्रीयेत तदापि न ह्यागमस्योपजीव्यभूतप्रत्यक्षप्रमाण-विरोधः। कुत इति चेत् यद्यप्यागमः अर्थं बोधयितुं प्रत्यक्षमपेक्षते अथापि तद्गतव्यावहारिकप्रामाण्यमेवापेक्षते। न तेन आगमस्य विरोधः। प्रत्यक्षगत-तात्त्विक-प्रामाण्येन तु अस्ति आगमस्य विरोधः। न तदुपजीव्यत्वमागमस्य। अतः यदुपजीव्यं न तेन विरोधः, येन विरोधः न तदुपजीव्यम्। इत्यतः आगमप्रमाणस्याप्रामा-ण्यप्रसक्तिः सुतरां नास्ति, अतः न तस्योपचरितार्थत्वम्।

एवं स्थिते वाचस्पतिमिश्रैः "न परम् वाक्यम् स्वार्थे उपचरितार्थम् कर्तुं युक्तम्।" "न विधौ परःशब्दार्थः" इति न्यायात् इति पुनरप्युप-चरितार्थत्व-शंका उद्घाटिता आगमस्य। किमत्र तात्पर्यम् इति चेत् इदम् वाचस्पतिमिश्राणां तात्पर्यम्। "उपजीव्योपजीवकयोस्स्ति विरोधे उपजीव्योपमर्दात् उपजीवकोपमर्दो वरम्" इत्यस्ति औत्सर्गिको न्यायः। अधुना तु उपजीव्यम् प्रत्यक्षमुपमृद्यैव उपजीव्यविरोधः परिहृतः। स च नि-रुक्त न्याय-विरुद्धः। अतः उपजीवकस्य आगमस्य उपचरितार्थत्वम् परिक-ल्प्य अपि विरोधः परिहर्तुं शक्यते। अतः तथा क्रियताम्, यथा उपजीव्य-विरोधः परिहृतो भवति। न्यायानुकूल्यमपि भवितुमर्हति, इति पूर्वपक्षिणः आशयः। तस्याशयं गृहीत्वा तत्र प्रातिबन्द्यासमाधानं वक्तुम् पुनरपि आगमस्य उपचरितार्थत्वाशङ्का उद्घाटिता मिश्रैः। अत एवोक्तम् नविधौ

परश्शब्दार्थ इति समाधानम्। विधिवाक्यं तत्तुल्यं वा तात्पर्यवद्वाक्यम् यत्किंचिदनुग्रहार्थम् अन्यार्थं नेतुं न युक्तम् इति तदभिप्रायः। "अत्र पूर्वतन्त्रन्यायं कंचन उद्घाटच समाधीयते। तथाहि" जैमिनीयतन्त्रे दशमाध्याये तृतीयपादे एकमधिकरणम्। हिरण्यगर्भाधिकरणमिति। तत्र एवं चिन्तितम्– विकृतिभूते वायव्यपशुयागे श्रूयमाणः—

"हिरण्यगर्भस्समवर्तताग्रे।
भूतस्य जातः पतिरेक आसीत्॥"

—इत्यादि मन्त्रः किममन्त्रके प्रकृतितः अतिदिष्टे प्राजापत्याघारे विधीयते? अथवा मन्त्रवति इन्द्रदैवत्ये द्वितीयाघारे प्रकृतमन्त्रापवादकतया विधीयते? इति संदिह्य हिरण्यगर्भशब्दस्य प्रजापतिनामत्वप्रसिद्धेः "प्रजापतिर्वै हिरण्यगर्भः।" इति वाक्यशेषाच्च विनियुज्यमानमन्त्र-स्वारस्यमनुसृत्य प्रथमाघार एव विनियोगम् अर्हत्ययम् मन्त्रः इति पूर्वपक्षं कृत्वा, द्वितीयाघारे नाम ऐन्द्राघारे मन्त्रोच्चारण-जन्य-नियमादृष्टस्य प्रकृतौ क्लृप्तत्वात्, प्रथमे प्राजापत्याघारे अक्लृप्तत्वाच्च। अधुना एतन्मन्त्र-विनियोगे एतन्मन्त्रोच्चारणजन्यनियमादृष्टस्य कल्प्यत्वात्, कल्प्योपकारापेक्षया, क्लृप्तोपकारस्य प्राबल्यात्। प्रबलक्लृप्तोपकारसहायप्रयुक्तम् प्राबल्यम् अवलम्ब्य द्वितीयाघारे एवास्य मन्त्रस्य विनियोग इति निर्णीतम्।

अत्र मन्त्रः उपजीव्यः विधिस्तु उपजीवकः। उपजीवकस्य द्वितीयाघारविधेः विद्यमानं क्लृप्तोकार-प्रयुक्तम् प्राबल्यमाश्रित्य उपजीव्यः मन्त्रः एव इन्द्रपरतया अन्यथा नीतः। अतः अत्र यथा उपजीव्यकस्य मन्त्रस्यैव बाधः त्वया समाश्रितः तथा मयापि तात्पर्यनिर्णायक-षड्विधलिङ्ग-प्रमाणसहाय-प्रयुक्तम् प्राबल्यम् अवलम्ब्य उपजीवकस्य आगमस्यैव उपजीव्यभूत-प्रत्यक्षबाधकत्वम् अङ्गीक्रियते। औत्सर्गिक-न्यायस्य अपवादः त्वयैव प्रदर्शितः। मयापि स एव पन्थाः आश्रीयते इति अत्र प्रतिबन्द्या समाधानम्। तदेतत् सर्वं भामत्याम् "न विधौ परः शब्दार्थः" इति न्यायप्रदर्शनेन सूचितम्। तादृश-न्याय-स्वरूपम् अवलम्ब्य सम्यग्विवृतम् परिमलकारैः अप्पय्यदीक्षितमहाशयैः।

अत्रायम् कश्चिद् विशयः । किम् मन्त्रस्य ब्राह्मणमुपजीव्यम् उत ब्राह्मणस्य मन्त्रः उपजीव्यः इति । यद्यपि कर्माणि सर्वाणि ब्राह्मणेन विधीयन्ते विहितेषु कर्मसु अनुष्ठीयमान-पदार्थ-स्मारका मन्त्राः भवन्ति । एतेन ब्राह्मणमुपजीव्यैव मन्त्राः प्रवर्तन्त इति ज्ञायते । अस्ति च तादृशः प्रवादः । अथापि नैतत् समीचीनम् भवति ।

यदि ब्राह्मणमेव उपजीव्यं स्यात् तदा प्रतिबन्द्या समाधातुम् वाचस्पतिमिश्राः आगमस्य उपचारितार्थत्वाशङ्काम् नोद्घाटयेयुः । नापि परिमलकाराः मन्त्रः उपजीव्यः इति लिखेयुः नापि विवृणुयुश्च । अतः मन्त्र उपजीव्य इति एका युक्तिः । तदेतत् सत्यम् " मन्त्रेषु कर्माणि कवयो यान्यपश्यन्" इति मुण्डकोपनिषत्प्रमाणमपि मन्त्राणाम् उपजीव्यत्वम् द्रढयति । छान्दोग्ये सप्तमाध्यायोऽपि अस्मिन्विषये प्रमाणम् भवतिः । तथाहि ब्रह्मोपदेशार्थं सनत्कुमारस्य निकटमागतः नारदः सनत्कुमारेण पृष्टः सन्, स्वाधीतं वेदचतुष्टयं षडङ्गानि इतिहासपुराणादिकं सर्वमपि, सनत्कुमाराय गुरवे विनिवेद्य अन्ते एवमवोचत्— " **सोऽहम् भगवो मन्त्रविदेवास्मि नात्मवित्** " इति । अत्र शांकरम् भाष्यम् " **मन्त्रवित् कर्मविदित्यर्थः** इति । एतेन च ज्ञायते मन्त्राः कर्म-प्रकाशका इति । ततश्च मन्त्राणाम् उपजीव्यत्वमेव स्याद् ब्राह्मणम् प्रति ।

अपि च अस्मिन्नेवाध्याये चतुर्थे खण्डे "**संकल्पो वाव मनसो भूयान्**' इत्यादिना काचित् श्रुतिः प्रवृत्ता । तस्याम् अन्ते इदम् वाक्यं वर्तते— " **नाम्नि मन्त्रा एकम् भवन्ति मन्त्रेषु कर्माणि**" इति । अत्रेदं शंकरभाष्यम् वरीवर्ति—" मन्त्रेषु कर्माणि एकम् भवन्ति । मन्त्रप्रकाशितानि कर्माणि क्रियन्ते । न अमन्त्रमस्ति कर्म । यद्धि मन्त्र-प्रकाशनेन लब्धसत्ताकम् सत् कर्म ब्राह्मणेन इदम् कर्तव्यमस्मै फलायेति विधीयते । याप्युत्पत्तिः ब्राह्मणेषु कर्मणां दृश्यते सापि मन्त्रेषु लब्धसत्ताकानामेव कर्मणाम् स्पष्टीकरणम् । नहि मन्त्राप्रकाशितम् कर्म किंचित् ब्राह्मणे उत्पन्नं दृश्यते । त्रयीविहितं कर्मेति प्रसिद्धं लोके । त्रयीशब्दश्च ऋग्जुःसामाख्या । " मन्त्रेषु कर्माणि कवयो यान्यपश्यन् इति चाथर्वणे ।" एतेषाम् भाष्यवाक्यानाम् परिशीलने मन्त्रमुपजीव्यैव ब्राह्मणम् प्रवर्तत इति स्पष्टमवगम्यते । अपि चात्र आनन्दगिरिरप्येवम् लिखति— "ब्राह्मणस्य मन्त्र-व्याख्यान-

रूपत्वात् अतिस्पष्टमन्त्रानुपलम्भेऽपि कल्प्यते मन्त्रोक्तत्वमित्यर्थः" इति। अतो हेतोः उपजीव्योपजीवकभावप्रयुक्तं प्राबल्यं परं मन्त्राणामेवेति निर्विवादं भवति। अपि चान्यत् प्रबलं प्रमाणं यद् ऋग्वेदसंहिताभाष्ये विद्यारण्यस्वामिभिः लिखितं "मन्त्रव्याख्यानरूपत्वात् ब्राह्मणानाम्" इति। अतः मन्त्राणाम् उपजीव्यत्वस्य अप्रकल्प्यत्वात् वाचस्पतिमिश्रैर्दत्तम् प्रतिबन्द्या समाधानं सर्वथा समञ्जसमेवेत्यत्र न कोऽपि संदेहलेशोऽपि।

यत्तु पूर्वतन्त्रे प्रवर्तकत्वेन विधीनां प्राबल्यं प्रवृत्ते कर्मणि अनुष्ठीयमान-पदार्थानां स्मारकतया मन्त्राणां दौर्बल्यं च अभिहितं तदन्यत्, न प्रकृतविषयसंबद्धम्।

अतो हेतोः आगमस्य प्रमाणत्वात् विषयप्रयोजन-सिद्धिरिति सिद्धान्तः।

वरङ्गल (आन्ध्र) पं. मल्लवझल वेङ्कटसुब्बरामशास्त्री



२. " यतो वा इमानि भूतानि जायन्ते । " — इति श्रुतौ तसिल्-प्रत्ययार्थ विचारः

तैत्तिरीयोपनिषदि ब्रह्मलक्षण-प्रतिपादन-प्रकरणे इदं वाक्यम् आम्नायते–" यतो वा इमानि भूतानि जायन्ते " इति। अस्य वाक्यस्य उपनिषद्भाष्ये श्रीशङ्कराचार्यैरेवं विवरणं कृतम्–इमानि भूतानि ब्रह्मादिस्तम्बपर्यन्तानि यतो यस्मात् जायन्ते इति। ननु भूतपदस्य पृथिव्यादि-पञ्चभूतेष्वपि रूढेः सत्त्वात् तद्ग्रहणम् आचार्यः कुतो न कृतमिति शंकायाम् इदं समाधानम्। उत्तरवाक्ये " येन जातानि जीवन्ति। " इत्यत्र जीवन्ति इति पदं वर्तते। तत्र जीवधातोः प्राण-धारणार्थकत्वाद् अचेतनानां ग्रहणं न कृतमिति। जीवानां स्वरूपतो नित्यत्वेपि, उपाधिविशिष्टत्वेन जन्यत्वव्यवहारः। अत्र यत इत्यत्र **पञ्चम्यास्तसिल्** इति सूत्रेण तसिल्-प्रत्यय-पञ्चमी तु **'जनिकर्तुः प्रकृतिः'** इति सूत्रेण प्राप्ता। अत्र जनिरिति **जनिघसिभ्यामिण्** इत्यौणादिक-सूत्रेण भावे इणन्तमुत्पत्त्यर्थकं पदम्। ननु इक् धातु-निर्देशः। तेन अङ्गादङ्गात् संभवति इत्यादावुत्पत्त्यर्थक-धात्वन्तरयोगेऽपि पञ्चमी भवतो। तथा च जायमानस्य प्रकृतिरपादानं स्यात् इति सूत्रार्थः। तत्र प्रकृति-पदेन किं कारण-सामान्यस्य ग्रहणम्, उत उपादानरूप-कारण-विशेषस्येति विचार्यते। तत्र " प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् " इति सूत्रे श्रीशंकरभगवत्पादाचार्यैः भाष्ये एवमुक्तम् यत इतीयं पञ्चमी जनिकर्तुः प्रकृतिरिति विशेष-स्मरणात् प्रकृति-लक्षण एवापादाने द्रष्टव्या न कारणमात्रे इति तदुपरि पूर्वपक्षः। अत्र सूत्रे प्रकृतिपदं कारण सामान्यपरम् नतु उपादान-रूप-कारण-विशेषपरम्। तदर्थं विकृतेः प्रकृतौ इति सूत्र-निर्देशात् तथाहि विकृति-वाचकाच्चतुर्थ्यन्तात् तदर्थायां प्रकृतौ वाच्यायां यथाविहितः प्रत्ययः स्याद् इति सूत्रार्थः। प्राकारेभ्य इमाः प्राकारीया इष्टकाः इत्युदाहरणम्। अत्र न्यासपदमञ्जरी-ग्रन्थयोः ननु–प्रकृतिः विकृतिरिति नियत-संबन्धिनावेतौ। तथा चान्यतरस्योपादानेप्यन्यतर-प्रतीति-पद-द्वयोपादानं व्यर्थम् इति शंकां कृत्वा इत्थं समाहितम्। प्रकृतिपदं विकृतिपदं च नानार्थकम्। विकृतिपदं तावत् दैवं मे विकरोति इत्यत्रापकारे, छात्रा विकुर्वते इत्यत्र चेष्टा-नानात्वे, बालानां

स्वातन्त्र्यं विकृतिरित्यत्रानौचित्ये तन्तूनां विकार: पट इत्यत्र कार्ये च वर्तते। एवं प्रकृतिपदमपि प्रकृतिस्थं मन इत्यादौ दोषापगमे, प्रकृत्याऽभिरूप इत्यत्र स्वभावे, तन्तव: प्रकृतिरित्यत्रोपादाने च वर्तते। अत: प्रकृति-विकृतिपदद्वयोपादाने सत्येव विवक्षित: प्रकृति-विकृति-भावो लभ्यते। विकृति-ग्रहणेऽक्रियमाणे तु कारण-सामान्यस्य प्रतीति: इति। एवं च जनिकर्तु: प्रकृतिरिति सूत्रे विकृतिपदाभावात् कारण-सामान्यस्य ग्रहणम्। अत एव काशिकायामपि प्रकृति: कारणं हेतुरित्युक्तम्। तस्मात् प्रकृतिपदं ोपादानपरम्। किंतु कारण-सामान्य-परमिति पूर्वपक्ष:।

सिद्धान्तस्तु—

प्रकृति-विकृति-पदद्वयोपादान एव विवक्षित: प्रकृतिविकारभावो लभ्यते इति नियमो न युक्त:। "तस्य विकार:" इत्यत्र व्यभिचारात्। अत्र विकृतिपदं नास्ति। तथापि काशिकायां विकार-पदस्य प्रकृतेरवस्थान्तरं विकार इति विवरणं कृतम्। प्रकृतिपदाभावेपि विवक्षितविकार-प्रतीति: कथमिति शंकाया: समाधानं न्यासे इत्थं प्रतिपादितम्।

आचार्यस्येयं शैली क्वचिदभिधानमाश्रयति-क्वचिन्न्यायम् इति। तेन विकृतिपदस्य नानार्थकत्वेऽप्यभिधान-प्रसिद्धि-बलेन प्रकृतेरवस्थान्तर-रूपस्य विकारार्थस्य ग्रहणमिति सिद्धम्। तथा च, तदर्थं विकृते: प्रकृताविति सूत्रेपि, लोकप्रसिध्या, प्रकृतिश्च प्रतिज्ञा-दृष्टान्तानुपरोधात् इति व्याससूत्रप्रसिद्धया मायां तु प्रकृतिं विद्यादिति वेद-प्रसिद्धया च, उपादान-रूप-विकृतेरेव ग्रहणम्, न कारण-सामान्यस्य इति सिद्धान्त:।

श्रीसिद्धगंगा-संस्कृत-महापाठशाला
तुमकुरु (कर्नाटक)

वै. विश्वनाथशास्त्री
प्रधानाध्यापक:

१. मिथ्यात्वानुमाने सोपाधिकत्व-शङ्का तन्निरासश्च ।

'विमतं मिथ्या दृश्यत्वात्' इत्याद्यनुमाने परैः उपाधिः दोषः उद्भाव्यते। उद्भावन-प्रकारः तन्निरासश्च निरूप्यते। यद्यपि उपाधि-शब्दस्य अनेके अर्थाः सन्ति। तथापि शास्त्रे उपाधि व्युत्पादनं न लौकिक-व्यवहारार्थम्। किंतु अनुमानदूषणार्थम्। अतः तान्त्रिक-संकेतित एव अर्थो ग्राह्यः। तान्त्रिक-संकेतश्च इत्थम् — साध्य-व्यापकत्वे सति साधनाव्यापको यः सः उपाधिरिति उच्यते। उक्तलक्षणं च प्रतियोगि-वैयधिकरण्य-घटनया सदल-कृत्यम् उपाधिवादे गदाधरभट्टाचार्येण प्रदर्शितम्।

प्रकृतानुमाने स्व-बाधकाभिमताबाध्य-दोष-प्रयुक्त-विषयताकत्वं स्व-बाधकाभिमताबाध्य-बाधकं प्रति निषेध्यतया विषयत्वं च उपाधी। शुक्ति-रूपाद्यन्तर्भाविण साध्य-व्यापकत्वं पक्षान्तर्भाविण साधनाव्यापकत्वं च। अत्र स्वत्वम् अननुगतम्। एवं स्वबाधकमित्यस्य स्वजनकाज्ञान-निवर्तकम् इत्यर्थः। तत्र शुक्त्याद्यवच्छिन्न-चिद्विषयकाज्ञानत्वेन जनकत्वात् इदं विशेष्यक-शुक्तित्व-प्रकारक-ज्ञानत्वेन निवर्तकत्वात् अवच्छेदक-घटितत्वेन अननुगमः। अतः स्वत्वादीन् संबन्धकोटौ प्रवेश्य अनुगमः क्रियते। स्वबाधकाभिमत-बाध्यत्व-संबन्धावच्छिन्न-स्वनिष्ठावच्छेदकताक-प्रतियोगिताक-भेदवद्दोषप्रयुक्त-विषयताकत्व-संबन्धेन किंचिद्-विशिष्टत्वम् इति अनुगमः। शुक्तिरूप्य-विशिष्टत्वं शुक्तिरूप्य इति साध्य-व्यापकत्वम् उपाधेः। अत्र संबन्धस्य अननुगमेऽपि क्षति-विरहः। संबन्धाननुगमस्य अदोषत्वात्।

उक्तोपाधि-प्रदर्शनं तुलाज्ञानमङ्गीकृत्य। तदनङ्गीकारे—स्वनिष्ठ-विषयता-प्रयोजकदोषप्रयोज्य-विषयताश्रयान्यदोषप्रयोज्य-विषयताकत्वम् उपाधिः। शुक्तिरूप्यनिष्ठ-विषयता चाकचक्यादि-दोष-प्रयोज्या। दोष-निष्ठ-विषयता तु न तथा। इति उपाधिः उपपादनीयः।

अत्र सिद्धान्तः — उक्तोपाध्योः साध्य-व्यापकता न संभवति। देहात्मैक्ये व्यभिचारात्।

अत्र पूर्ववादी एवं वदेत् । व्यभिचारपरिहारः अन्यथा क्रियते । स्वविषयकमिथ्यात्व-निश्चयानिश्चित-मिथ्यात्वकत्वम् उपाधिः । शुक्ति-रूप्य-मिथ्यात्व-निश्चयेन दोषमिथ्यात्वं न निश्चितं भवति । अतः तादृश-दोष-प्रयोज्य-विषयताकत्वं शुक्तिरूप्ये आगतम् । यद्यपि महावाक्यजन्य-बोधस्य ईश्वरीय-मिथ्यात्व-निश्चयस्य च ग्रहणे तस्य सर्वदृश्य-मिथ्यात्व-विषयकत्वेन तदनिश्चित-मिथ्यात्वक-दोषस्य अप्रसिद्धिरिति साध्यव्याप-कताभङ्गः । अतः स्वभिन्नाविशेष्यकत्वं मिथ्यात्वनिश्चये विशेषणं देयम् । अतः उक्तश्रुतिजन्यबोधस्य ईश्वरीय-मिथ्यात्व-निश्चयस्य च वारणं भवति। साधनाव्यापकत्व-सिद्धये दोषभिन्नत्वमपि स्वभिन्ने विशेषणं देयम् । इदानीं घटाविद्ये मिथ्या इति निश्चयस्य संग्रहात् तदनिश्चित-मिथ्यात्वकदोषस्य अप्रसिद्धत्वात् स्वपदेन घटादीनां धर्तुम् अशक्यत्वेन साधनाव्यापकत्व-सिद्धिः । यद्यपि उक्तप्रणाल्या शुक्तिरूप्य-तज्ज्ञापकदोषौ मिथ्या इति मिथ्यात्व-निश्चयस्य ग्रहणे यद्यपि साध्य-व्यापकता-भङ्गः शक्यप्रदर्शनः, तथापि सर्वांशे प्रमात्वेन उभयमतसिद्धत्वम् उक्तनिश्चये विशेषणं देयम् । प्रातीतिक-मिथ्यात्ववादिना दोषमिथ्यात्वानङ्गीकारात् तदंशे भ्रमत्वस्यैव तेन अङ्गीकारात् उक्तनिश्चय-व्यावृत्त्या शुक्तिरूप्यं मिथ्या इत्येव निश्चयम् आदाय साध्य-व्यापकता-निर्वाहः । घटाविद्ये मिथ्या इत्यस्य पूर्वपक्षमते भ्रमत्वात् स्वपदेन घटादीनां धर्तुम् अशक्यत्वात् साधनाव्या-पकत्वम् ।

अत्र सिद्धान्तः इत्थम् — व्यापकताग्राहक-तर्काभावो दोषः । स्व-बाधकेत्यादिकं यदि मिथ्यात्वव्यापकं न भवेत् तर्हि मिथ्यात्वाभावव्याप्य-स्वाभावकं न स्यादिति तर्को वाच्यः । तत्र इष्टापत्तिरेव उच्यते । व्यति-रेके व्यर्थविशेषणत्वात् दोषप्रयुक्तभानत्वं तु भवदपि व्यापकं साधन-व्यापकमपि इति उपाधिरहितोऽयं दृश्यत्वादिहेतुः इति सिद्धम् ।

निवृत्त-न्यायशास्त्र-प्राध्यापकः
बेङ्गलूरु

होसकेरे अनन्तमूर्तिशास्त्री
न्याय-वेदान्त-विद्वान्

२. सिद्धान्त-व्याप्तिः ।

प्रतियोग्यसमानाधिकरण-हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगि साध्यसामानाधिकरण्यम् —व्याप्तिः ।

—अस्मिन् लक्षणे प्रतियोग्यसामानाधिकरण्यं विशेषणम् अभावे दत्तम् । अस्यार्थः प्रतियोगिनः यद् अधिकरणं तदवृत्तिः अभावः ग्राह्यः। प्रतियोगिनः अधिकरणं संबन्धसामान्येन निविष्टं स्यात् तदा ज्ञानवान् द्रव्यत्वात्, विशेषगुणवान् मनोन्यद्रव्यत्वात्, जातिमान् भावत्वात् अत्र अतिव्याप्तिः । अतः प्रतियोगितावच्छेदकसंबन्धेन अधिकरणं विवक्षणीयम् । तेन नातिव्याप्तिः।

प्रश्नः यत्किंचित् प्रतियोगितावच्छेदकसंबन्धेन अधिकरणं विवक्षितं चेत् तर्हि वह्निमान्, धूमात् इत्यत्र अव्याप्तिः। हेत्वधिकरणवृत्तिः अभावः संयोगसंबन्धावच्छिन्न-वह्नित्वावच्छिन्न-प्रतियोगिताकः अभावः लभ्यते । तस्य प्रतियोगितावच्छेदकसंबन्धः संयोगः। यत् किंचित् प्रतियोगितावच्छेदकसंयोगः महानुयोगिकसंयोगः तेन, प्रतियोगिनः वह्नेः अधिकरणं महानसं तदवृत्तिः वह्न्यभावः जातः। हेतुसमानाधिकरणोऽपि जातः। तत्-प्रतियोगितावच्छेदकं साध्यतावच्छेदकं जातम्। अतः अव्याप्तिः यदि प्रतियोगितावच्छेदकसंबन्धेन, सामान्ये विवक्षितं चेत् तर्हि संयोगोऽपि लभ्यते। तेन प्रतियोगिनः वह्नेः अधिकरणं पर्वतः तद्वृत्तिः। अतः वह्न्यभावः प्रतियोग्यसमानाधिकः न जातः नाव्याप्तिः प्रश्नः। तदा जातिमान् जातित्वात् अत्र अतिव्याप्तिः। हेतुसमानाधिकरणाभावः समवायेन जात्यभावः। तस्य प्रतियोगितावच्छेदकसंबन्धः यथा समवायः तथा तादात्म्य-संबन्धः। तेन प्रतियोगिनः जातेः अधिकरणम् जातिः। तद्वृत्तिः जात्यभावः। अतः प्रतियोग्यसमानाधिकरणः न जातः। घटाभावं गृहीत्वा अतिव्याप्तिः

तदा सिद्धान्तिना उक्तम् । यत् किंचित् स्वप्रतियोगित्वं यादृशसंबन्धावच्छिन्नं तादृश-संबन्धेन, यत् प्रतियोगि-संबन्धि, तदवृत्तित्वं विवक्षितम् । अतः नातिव्याप्तिः । अस्यानुगमः प्रतियोगिता-विशिष्टसाध्यतावच्छेदकतात्वावच्छिन्न- प्रतियोगिताक-पर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति- प्रतियोगितानवच्छेदक - साध्यतावच्छेदकावच्छिन्न - सामानाधि-

करण्यं व्याप्तिः । प्रतियोगिता-वैशिष्ट्यं च प्रतियोगितायां, स्वतात्म्य-स्वावच्छेदकधर्मावच्छिन्न, स्वावच्छेदकसंसर्गतावच्छेदकतात्वावच्छिन्नप्रति-योगिताक - पर्याप्त्यनुयोगितावच्छेदकरूपवृत्ति- आधेयतानिरूपित-अधिक-रणतावन्निरूपितवृत्तित्वाभावविशिष्ट - हेत्वधिकरणनिरूपितवृत्यभावि-यत्व - एतदुभयसंबन्धेन, उभयत्र स्ववृत्तित्वं च, स्वावच्छेदक-संसर्गतावच्छेदकतात्वावच्छिन्नप्रतियोगिता - पर्याप्त्यनुयोगितावच्छेदकत्व-संबन्धेन ।

पुण्यपत्तनम् ३० पं. सीतारामशर्मा कुरुंदकर

३. अत्र वदन्ति कल्प-परिष्कारः ।

यद्-रूपावच्छिन्न-विषयक-निश्चयाव्यवहितोत्तरानुमितित्वव्यापको विरोधि-विषयता-प्रयुक्तः पक्षे साध्य-वैशिष्टयावगाहित्व-साध्य-व्याप्य-हेतु-वैशिष्ट्यावगाहित्वोभयाभावस्तद्रूपावच्छिन्नत्वं दोषत्वम् । 'निर्वह्निः पर्वतो वह्निमान्' इत्यत्र पर्वतत्वावच्छेदेन वह्न्यभावस्य पक्षतावच्छेदक-त्वे वह्निमत्-पर्वत-रूपाश्रय-सिद्धि-विषयक-निश्चयोत्तरं जायमाना सुघटा-द्यनुमितिषु आहार्यादिमात्र-प्रसिद्ध -पक्षतावच्छेदकावच्छिन्न - विशेष्यता-निरूपित - साध्यतावच्छेदकावच्छिन्न - प्रकारताकत्वघटितोभयाभाववत्वं वर्तते । तच्च वह्निमत्-पर्वत-विषयता-प्रयुक्तम् । स्वनिष्ठ-प्रति-बन्धकतावच्छेदक-धर्मस्य स्वानन्तरोत्पन्न-ज्ञाननिष्ठ-प्रतिबध्यतावच्छेदक-धर्माभाव-प्रयोजकत्वात् न चाहार्यज्ञानमात्रे प्रसिद्धस्य निर्वह्नि-पर्वतत्वावच्छिन्न-विशेष्यक-वह्निप्रकारक-ज्ञानत्वस्य कस्यापि प्रतिबध्य-तानवच्छेदकतया तादृश-धर्मावच्छिन्ने वह्न्यादि-प्रकारकत्वस्याभावे विरोधि-विषयताप्रयुक्तत्वम् अप्रामाणिकम् इति वाच्यम् । तादृश-ज्ञानत्वस्य प्रतिबध्यतानवच्छेदकत्वेऽपि तद्व्यापकस्य पर्वतत्वावच्छिन्ने वह्नित्वावच्छिन्नाभाव-प्रकारक-ज्ञानत्वस्य वह्नि-विशिष्ट-पर्वतविषयक-ज्ञानप्रतिबध्यतावच्छेदकतयाव्यापकाभाव-प्रयोजकस्य सुतरां व्याप्याभाव-

प्रयोजकतया च तादृश - विशिष्ट - विशेष्यकत्वावच्छिन्न - वह्न्यादि - प्रकारकत्वाभावस्य तादृश-दोष-विषयता-प्रयुक्तत्वस्यावश्यकत्वात् ।

न च विरोधिज्ञानस्यासत्वेऽपि निर्वह्निः पर्वतो वह्निमानिति ज्ञानस्यानाहार्यस्यानुत्पत्त्या इच्छाघटित - तादृशाहार्य - ज्ञान - सामग्र्य-भावस्यैव निर्वह्नित्वादि-विशिष्टे वह्न्यादि-वैशिष्ट्यावगाहित्वाभाव-प्रयोजकत्वं न विरोधि-विषयकत्वस्य क्वचिदप्यक्लृप्तत्वाद् इति वाच्यम् । अभावाधिकरणतायाम् एव विरोधि-विषयता-प्रयुक्तत्वस्य निवेश्यतया विरोधिज्ञानानन्तरोत्पन्न-ज्ञान-निष्ठ-तादृश-वैशिष्ट्यावगाहित्वाभावाधि-करणतायां पूर्वज्ञानीय-विरोधि-विषयताया अपि प्रयोजकत्वात् निर्वह्निः पर्वतो वह्निमान् इत्यत्र घटादावतिव्याप्तिवारणाय विरोधि-विषयता-प्रयुक्त इति सिद्धि-विषये अतिव्याप्ति-वारणाय विरोधीति विषयता-विशेषणं साध्यतावच्छेदकावच्छिन्न-प्रकारता-निरूपित-पक्षतावच्छेदकाव-च्छिन्नविषयत्वावच्छिन्न-प्रतियोगिताक-भेद-प्रतियोगितावच्छेदकार्थकम् । ह्रदो वह्न्यभाववान् वह्नेरित्यत्र वह्न्यभाववद् ह्रदरूप-स्वरूपासि-द्धावव्याप्तिवारणाय अनुमितित्वाभावप्रयोजकतानवच्छेदकरूपावच्छिन्न-विषयतेति परिष्करणीयम् । निर्वह्निः पर्वतो वह्निमान् इत्यत्र आश्रया-सिद्धिः बाधश्चेति दोषद्वयं भवेद् वा न वेति विचार अपरिपूर्ण-सिद्धान्तः ।

पूर्णवेदपुरी
त्रिपुणियुरा (केरळ)

पण्डितराजः टी. रामवारियर्

१. विलक्षणत्वाधिकरणम् ।

शारीरक-मीमाँसायां द्वितीयाध्याये प्रथम-पादे तृतीयम् इदम् अधिकरणम् । अत्र अष्टौ सूत्राणि सन्ति । तेषु प्रथम-द्वितीय-पञ्चमसूत्राणि पूर्व पक्षीयाणि ।। चतुथ, अष्टमे च अंशतः पूर्वपक्षोऽस्ति ।

प्रथमाध्याय-निर्णीतार्थस्य विरोध परिहाराय प्रवृत्तेऽस्मिन्नध्याये, इतः पूर्वतनाधिकरणयोः — कपिलादिस्मृतीनां मूलाभावेन दौर्बल्यात् चेतन-ब्रह्मकारणबाधः न ताभिः संभाव्यः । तर्काणां पुनः व्याप्ति-पक्ष-धर्मतावतां प्राबल्यात् तैः बाधः संभवतीति प्रत्युदाहरणेन पुनः पूर्व-पक्षोत्थानम् ।।

"यद् यत्प्रकृतिकं, न तत् तद्-विलक्षणं, मृत्प्रकृतिक-घटवत्, सुवर्ण-प्रकृतिक-रुचकादिवच्च, इति सामान्यतो गृहीत-व्याप्तिमता तर्केण "जगत् न ब्रह्मप्रकृतिकं, विलक्षणत्वात् ।"—इत्यनेन चेतनब्रह्म-कारणता बाध्यताम् । अस्य जगतः तथात्वं-विलक्षणत्वं शब्दात् । "विज्ञानं चाविज्ञानं च, इत्यादि-श्रुतितः लोकतश्चावगम्यते इति प्रथमसूत्रार्थः ।।

ननु "ब्रह्म वेदैक-समधिगम्यं प्रमाणान्तरागम्यत्वात्; धर्मवत् । इत्यनेन स तर्को बाध्यताम् इति चेत् न हेत्वसिद्धेः । ब्रह्म प्रमाणान्तर-गम्यं, परिनिष्पन्नत्वात् पृथिव्यादिवत् इति सत्प्रतिपक्षाच्च ।।

परन्तु परिनिष्पन्नत्वं प्रमाणान्तर-गम्यत्वे न प्रयोजकं, कार्य-भूतस्यापि पाकादेः प्रमाणान्तर-गम्यत्वस्य दर्शनेन "ब्रह्म कार्यं प्रमाणान्तर-गम्यत्वात् पाकवत् इत्यपि प्राप्त्याः तद्-व्यतिरेकेण ब्रह्म प्रमाणान्तरागम्यम् अकार्यत्वात् इति च सत्प्रतिपक्षसंभवेन, रूपाद्यभावेन लिङ्गाभावेन सादृश्याभावेन च प्रत्यक्षादि-प्रमाणागोचरत्वं ब्रह्मणि सेद्धुमर्हतीति — वेदैक-समधिगम्ये तत्र विलक्षणजगत्कारणत्वमात्रं तर्केण बाधनमर्हति इति पूर्वपक्षार्थोऽवगन्तव्यः । लोके सलक्षणानामेव प्रकृति-विकारभाव-दर्शनात् इत्यर्थं सूत्रस्थ-च-कारेण बोधितः ।।

किञ्च श्रुतिबाधने न भेतव्यम् । निरवकाश-श्रुत्या सावकाश-श्रुतीनां बाधनम् अभिमतम् । तद्वत् निरवकाशेन तर्केण प्रबलेन लक्षणादिना जगत्कारणत्व-वादिनीनां सावकाशानां श्रुतीनां बाधनं युक्तम् ॥

ब्रह्म-साक्षात्कारस्य अनुभवात्मकस्य अविद्या-निवर्तकस्य, दृष्ट-साम्येन आदृष्टं कल्पयन् तर्कः अन्तरङ्गत्वं भजते । परोक्ष-शाब्द-ज्ञान-जनक-श्रुतिस्तु बहिरङ्गा भवति ॥

अपि च श्रोतव्यो मन्तव्यो निदिध्यासितव्यः, इति श्रुतिरेव युक्ति-भिरनुचिन्तनात्मकं मननं तर्क-रूपं ब्रह्म-दर्शन-साधनं ब्रवीति । तस्मात् ब्रह्म नाचेतनस्य जगतः कारणमिति ।

"मृदब्रवीत्, 'आपोऽब्रुवन्, ते हे मे प्राणा अहं श्रेयसे विवदमानाः इत्यादि-श्रुतिभिः सर्वस्यापि जगतः चेतनत्ववर्णनेन प्राप्तां वैलक्षण्याभाव-शङ्कां द्वितीयेन सूत्रेण निराकरोति — अभिमानिव्यपदेशादित्यादिना । उक्त-श्रुतिषु मृदाद्यभिमानिन्य एव देवताः चेतनत्वेन व्यवहृताः; न तु मृदादयः। तत्र हेतुः विशेषः अनुगतिश्च। भूतानाम् इन्द्रियाणां भोक्तृणां च चेतनाचेतन-विभागः; लोकवेदयोः प्रसिद्धः। "ता एता ह वै देवता अहं श्रेयसे।" देवता-शब्देन विशेषणं च कृतम् । "अग्निर्वाग्भूत्वा मुखं प्राविशत्" इत्यादौ तेषु तेषु अग्न्यादि-देवतानाम् अनुगमनं च मन्त्रार्थ-वादेषु दृश्यते । इतिहासपुराणेष्वपि तद् बहुधा पठ्यते । अतः ब्रह्म-वैलक्षण्यं जगतः सिद्धम् ।

किं च पञ्चमेन — अपीतौ तद्वत्-प्रसंगादित्यादिना ब्रह्मकारणवादे पञ्चधा असामञ्जस्यं स्थापितम् । — यथा १. यथा लवणं जले लीनं सत् स्वगुणेन जलं दूषयति तथा जगत् प्रलये लीयमानं ब्रह्मणि स्वप्नकृतौ अचैतन्य - स्थौल्य - सावयवत्वं परिच्छिन्नत्वाशुद्ध्यादि - धर्मैः तद्-ब्रह्म दूषयेत् । २. प्रलये विकाराणां प्रकृतौ अविभागेन लीनानां पुनस्तथैव उक्तौ कारणाभावेन भोक्त्रादि-प्रपञ्चो नोत्पद्येत । ३. अविभक्तानामपि पुनरुत्पत्त्यभ्युपगमे कारणाभावसाम्येन मुक्तानामपि पुनरुत्पत्तिः । ४. प्रलयेऽपि विभागेन विकारावस्थानाभ्युपगमे तु प्रलयाभावः, ५. कारणात् कार्यं लये न विभक्तम् अवतिष्ठत इति औपनिषदं दर्शनम् असमञ्जसम् ।

सिद्धान्तस्तु—दृश्यते तु । लोके विलक्षणानामपि कार्यकारणभावो दृश्यते । यथा पुरुषात् केशलोमानि, गोमयात् वृश्चिकादीनि जायमानानि पश्यामः । अतो वैलक्षण्यात्मकस्तर्कः प्रत्यक्ष-बाधितः । अतश्च चेतन-कारणतां स न बाधितुं प्रभवति । क्वचिद् उक्तरीत्या मृद्-घटादौ सुवर्ण-रुचकादौ च तथा नियमेऽपि न स सार्वत्रिकः । स तर्कः उपगम्यते चेदपि इमे दोषाः प्रकृति-विकारयोः सर्वसाम्यतायां प्रकृतिविकार-भावः उच्छि-द्यते । किञ्चित्-साम्ये तु ब्रह्मणः जगतश्च सत्तारूपेण साम्यमस्त्येव । चैतन्य-रूपेण साम्यापेक्षायां तु दृष्टान्ताभावः । जगत् न ब्रह्म-प्रकृतिकं, विलक्षणत्वात्; अविद्यावत् — इत्यस्ति दृष्टान्त इति चेत् । अविद्याया अपि ब्रह्मणि कल्पितत्वेन ब्रह्मप्रकृतिकत्वात् असाधारणो दोषः । अथवा अनादित्वम् उपाधिः । घटेश्वर-संयोगे ईश्वर प्रकृतिके व्यभिचारः । द्रव्यत्वेन, द्रव्यविभाजकोपाधित्वेन वा साम्य-विवक्षणे तु अस्माभिः द्रव्य-त्वादि-परिभाषानभ्युपगमेन, तृणप्रकृतिक-वह्नौ च उक्त-दोषौ तदवस्थौ । तस्मान्निर्मूलस्तर्कः । अष्टमे सूत्रे तर्काणां श्रुत्यननुगतानां केवल-पुरुषमति-कल्पितानाम् अप्रतिष्ठितत्वं स्थापितम् । अप्रतिष्ठित-तर्कैः सम्यग्ज्ञानस्य अनुदयेन मोक्षाभाव-प्रसंगश्च स्पष्टीकृतः ।

चतुर्थेन सूत्रेण ब्रह्मणः सकाशात् पूर्वमविद्यमानमेव जगदुत्पन्नम् उपगम्यते चेत् असत्कार्यवाद-प्रसंगः प्राप्तो वार्यते । पूर्वम् इदानीं, भविष्य-ति च काले जगतः अनिर्वचनीयस्य सदात्मनैव वृत्त्यभ्युपगमेन — पूर्वम् असत् इति निषेधो व्यर्थः इति ।

षष्ठेन सूत्रेण पञ्चमसूत्रेणापादितस्यासामञ्जस्यस्य निरासः । घट-शरावादयः प्रकृतौ लीनाः, रुचकादयः सुवर्णे लीनाः, जरायुजादि-चतुर्विधा भूताः भूमौ लीनाश्च न स्वस्वप्रकृतिं दूषयन्तीति दृष्टान्तोऽस्ति । तव तु तथाऽऽपादने नास्ति दृष्टान्तः । लवणस्य जलं न प्रकृतिः । अतो न तत् दृष्टान्तः । तस्मादसामञ्जस्यम् औपनिषद्-दर्शने नास्ति । प्रलयेऽविभागं गतानामपि अविद्या-कामकर्म-संस्कार-सद्भावेन पुनरुत्पत्तौ भोक्त्रादि-प्रपञ्चो यथावत् उत्पत्स्यन्ते । अत एव मुक्तानां पुनरुत्पत्ति-प्रसंगोऽपि न । अविद्यादीनां विलयात् । अन्तिमौ दोषौ अनभ्युपगमादेव नापादनीयौ ।

सप्तमेन सूत्रेण सांख्यानामेव एते दोषाः प्रसञ्जिताः—यथा—१. शब्दादिमतः अशब्दादि-प्रधानं कारणं चेत् विलक्षणकार्योत्पत्तिः। २. पूर्वमविद्यमानस्य शब्दादिमतः उत्पत्त्युपगमेऽसत्कार्यवाद-प्रसंगः। ३. प्रलये प्रधानमपि गच्छत् कार्यं स्वगुणेन प्रधानं दूषयेत्। ४. अविभागेऽपि पुनरुत्पत्त्युपगमे मुक्तानां पुनरुत्पत्तिः। ५. जगतः पुनरुत्पत्ति-कारणाभावेन सृष्टयभावप्रसङ्गः। ६. प्रलयेऽपि विभागाभ्युपगमे प्रलय एव न सः। ७. मुक्तानाम् अविभागः बद्धानां विभागः इति चेत्, बद्धानां प्रधानकार्यत्वाभावप्रसङ्गश्चेत्येते दोषाः प्रधानकारणवादे। स्वमते तु ते परिहृताः। तस्मात् तर्केण चेतन-कारणवादो न बाध्यते इति शम्।

कवलक्कि पं. रामचन्द्रशास्त्री सूरिः

२. शेषः परार्थत्वात्।

मीमांसा-दर्शने तृतीयाध्याये अङ्गत्वं विचारितं तत्र शेषत्वं, न जातिः क्रियात्वादिनासांकर्यात् व्रीहिभिर्यजेत्यत्र जातेः साधनत्वेन विधानात् जात्यादिसाधारणस्य जातित्वायोगाच्च अङ्गत्वस्य सनिरूपकत्वेन सखण्डत्वेन अनुगताकारप्रतीतेः अभावात् अखण्डोपाधित्वमपि न संभवति। अतः "शेषः परार्थत्वाद्" इत्युक्तम्। तत्र परार्थत्वम् एव अङ्गत्वं, प्रयाजादयः शेषपदवाच्याः, परार्थत्वात् इत्यनुमाने पूर्व-पक्ष-व्याप्तेः अङ्गीकारात् अथवा व्यतिरेकव्याप्तेः अङ्गीकारात् पक्षतावच्छेदक-हेत्वोरैक्येऽपि न सिद्धसाधनम्। सिद्धान्तव्याप्तेः कारणत्वस्वीकारेऽपि समानाकारकज्ञानस्यैव प्रतिबन्धकत्वस्वीकारेण न सिद्धसाधनम्। अङ्गपदस्य सिद्धान्ते अङ्गिभेदेन नानार्थकत्वम् अपि स्वीकृतम्। परोपकारकत्वम् अङ्गत्वमित्युक्ते कृषेः यागोपकारकत्वात् यागाङ्गत्वापत्तिः। विहितत्वदलं निवेश्यते चेत् प्रयाजादेः गोदोहनस्य च, पशुपुरोडाश-पशूपकारकत्वात् तदङ्गत्वापत्तिः। अन्यानुपकारकत्वघटितं तत् इत्युक्ते तयोः पश्वङ्गत्वं न स्यात्। यदि च अन्याप्रयुक्तत्वघटितं तत् इत्युच्यते तदा प्राकृताङ्गानां विकृत्यर्थत्वं न स्यात्। अथवा अन्य-मात्रा

प्रयुक्तत्व-घटितम् अङ्गत्वमित्युक्ते 'पुरोडाशकपालेन तुषानुपवपति ' इत्यत्र कपाले तुषोपवापाङ्गत्वस्य चतुर्थे प्रतिपादितस्य अनुपपत्तिः। यदि च यदन्यप्रयुक्तत्वानवच्छेदक यदुपकारकतावच्छेदक-धर्मवद् यत् तत् तदङ्गम् इत्युक्ते प्रयाजादीनां समित्त्वादिना प्राकृताङ्गत्वं प्रकृतिसंबन्धि न विकृत्यङ्गत्वम्। एवं कपालस्य तत्त्वेन पुरोडाशाङ्गत्वं पुरोडाशीयत्वेन तुषोपवापाङ्गत्वम् । अतो न दोषः। एवं सति भेदनहोमस्य दर्शपूर्णमासाङ्गत्वं न स्यात् । एवम् दर्शपूर्णमासयोः पापक्षयाङ्गत्वं दध्नः होमाङ्गत्वं च न स्यात्। एकरूपेण स्वर्गपापक्षयार्थत्वात् तयोः दधित्वेन च दध्नः होमेन्द्रियार्थत्वात् दर्शपूर्णमाससंबन्धित्वेन च सर्व-विकृत्यर्थत्वाच्च प्राकृताङ्गानां विकृत्यर्थत्वं न स्यात् । अतः अङ्गत्वं दुर्वचमिति पूर्वपक्षः।यदि परोद्देश्यक-कृतिसमथित्वम् इत्युच्यते तदा प्रयाजादौ तादृशविकृतिविषयत्वमित्युच्यते । तदा कालादौ अव्याप्तिः । कृति-संबधित्वमित्युक्तौ निमित्ते अतिव्याप्तिः । अतः सर्वथा दुर्वचम् अङ्गत्वमिति पूर्वपक्षः ।

एवं प्राप्ते सिद्धान्तः।

यन्निष्ठोद्देश्यता-विशिष्ट-कृति-कारकत्वेन विहितं यत् तत् तदङ्गम् इति परिष्क्रियते सर्वत्र समन्वयः। सर्वेषां तत्तदुद्देशेन कारकत्वेन विधानात् अङ्गत्वोपपत्तिः। कृषेः कारकत्वेन विधानाभावात् नाङ्गत्वम् । निमित्तस्य कारकत्वाभावाच्च नातिव्याप्तिः । एवं सति स्वर्गाङ्गत्वं स्वर्गस्य स्यात्। स्वर्गस्य कर्मकारकत्वेन विध्यन्वयित्वात् इति चेत् न । कर्मकारकभिन्नत्वस्य निवेशितत्वात् । अतः एव सूत्रे परपदमुपात्तमिति । अङ्गितावच्छेदकभेदेनैव अङ्गत्वं वक्तव्यं न तु अङ्गतावच्छेदकभेदेन । अतः स्वर्गाङ्गत्वं नाम स्वर्गत्वावच्छिन्नोद्देश्यता - निरूपकतावच्छेदकावच्छिन्न- निरूपकताकोद्देश्यतावत्वसंबंधेन स्वर्गत्ववद्भिन्नत्वे सति तदवच्छिन्नोद्देश्यताक-कृतिकारकत्वेन दर्षपूर्णमासयोः विधानात् तयोः समन्वयः । स्वर्गे तदभावात् नातिव्याप्तिश्च । एतेन स्वर्गाङ्गत्वम् अन्यफलस्यापीति निरस्तम् । इति सर्वं चतुरस्रम् इति सिद्धान्तः ।

शंकरपाठशाला, बेङ्गलूरु ४ बी. रामभट्टः

३. कपालेषु श्रपयति ।

कस्य परिसंख्येयत्वं का च परिसंख्या ?

श्रीगणेशाय नमः। श्रीगुरुभ्यो नमः। विधिरसायने दीक्षितैः दर्श-पूर्ण-मास-प्रकरण-श्रुत—"कपालेषु श्रपयति"—इति अन्यलभ्यप्राप्तिपूर्विक-परिसंख्यायाम् उदाहरणत्वेन दत्तम्। तदत्र 'कस्य प्राप्तेः अन्यलभ्यत्वं कस्य वा परिसंख्येयत्वं का वा परिसंख्या?' इत्ययं विषयः तदुपपादितरीत्या यथामति प्रस्तूयते। कपालेषु श्रपयतीति वाक्यश्रुतयोः कपाल-श्रपणयोर्मध्ये कस्यायं विधिरिति विचिकित्सायां न तावत् कपालस्य यदानेयो अष्टाकपालः अमावास्यायां पौर्णमास्यां च अच्युतो भवतीति उत्पत्ति-वाक्येनैव कपालस्य प्राप्तत्वात्। अत्रहि अष्टसु कपालेषु संस्कृतः पुरोडाशः अष्टाकपाल-शब्दार्थः। एवं च निरुक्त-तद्धितार्थ-विवक्षायां कपाल-शब्दस्य अष्ट-शब्देन साकं तद्धितार्थोत्तर-पद-समाहारे च इत्यनेन अष्टानां कपालानां समाहारः इति समासे कृते अष्ट-कपाल-प्रादिपदिकात् संस्कृतम् इत्यर्थे अण्प्रत्यये विहिते तस्य च द्विगोर्लुगनपत्ये इत्यनेन लुक् स्मरणं ततः अष्टनः हविषि कपाले इत्यनेन आत्वे अष्टाकपालशब्दः निष्पन्नो भवति। ततश्च कपालरूपार्थस्य उत्पत्ति-वाक्येनैव प्राप्तत्वात् नात्र विधानम्। नापि श्रपणविधिः। अपश्यन् पुरोडाशं कूर्मभूतं सर्पन्तम् इत्यादि अर्थवाद-पर्यालोचनायां कपालेषु संस्कार्यस्य पुरोडाशत्वावगतेः तस्य च अपूप-विशेष-रूपस्य पुरोडाशस्य श्रपणं विना निष्पत्तेरसंभवेन पुरोडाशान्यथानुपपत्ति-प्रसूत-अर्थापत्ति-प्रमाणेनैव श्रपणस्य प्राप्तत्वात्। यदि तु अर्थापत्ति-प्रमाणेन सिध्यतीति श्रपणस्य प्रयोजनानुरोधेन विधिरभ्युपगम्यते तच्च प्रयोजनं सति तस्मिन् विधौ श्रपणविधानं विधिदिसतस्य श्रपणस्य दर्शपूर्ण-मास-प्रकरणात् तदङ्गत्वं तदङ्गत्वसिद्धौ तदतिदेशशास्त्रविषयत्वं तदतिदेशशास्त्रविषयत्वे च दर्शपूर्णमास-विकृतिभूतेषु सौर्यं चरूं निर्वपेत् ब्रह्मवर्चसकामः इत्यादि-वाक्यविहित-चरुकरम्भादिषु श्रपणस्य प्राप्तिः तत्प्राप्तौ च चरुकरम्भादिषु तदनुष्ठानमिति। एतादृश-प्रयोजनानुरोधेन श्रपणविधिः अवश्यमभ्युपेयः इत्याशक्यते तदा तत्रापि विकृतिषु चरुकरम्भादीनां पुरोडाशवदेव श्रपणं

विना निष्पत्तेरसंभवेन करम्भाद्यन्यथानुपपत्ति-प्रसूत-अर्थापत्तिप्रमाणेनैव श्रवणप्राप्तिः सुलभैव।

यद्यपि चरुकरम्भादिषु श्रपणप्राप्तिः अर्थापत्तिप्रमाणेनैव उपपादयितुं शक्या अथापि श्रपणस्य प्रयोगमध्ये अनुष्ठानसिध्यर्थः विधिः स्यादेव। तदाहि श्रपणविधाने सति विधित्सितस्य तस्य दर्शपूर्ण-मास-प्रकरणेन गृहीतत्वात् अङ्गस्य सतः तस्य प्रयोगमध्ये अनुष्ठानं लभ्यते। यदि चैवं नेष्यते तदा बहिः श्रपणसिद्धस्य आज्यस्य यथा वा प्रयोगमध्ये ग्रहणं तथैव पुरोडाशस्यापि बहिः श्रपण-सिद्धस्य प्रयोगमध्ये ग्रहणं स्यात्। न चैतदिष्टम्। अतश्च प्रयोगमध्ये श्रपणविधानं स्यादेव। अथोच्येत कपालेषु श्रपयतीत्यत्र प्रयोगमध्ये श्रपणविध्यभावेपि पुरोडाशस्य कपालाधिकरणक-संस्कार-विधानादेव प्रयोगान्त-श्रपणं सिध्यत्येव तथा सति बहिः श्रपणसिद्धस्य आज्यस्य प्रयोगमध्ये गार्हपत्य-आहवनीययोः अधिश्रयणस्य यथा वा आदृष्टार्थत्वं तथैव पुरोडाशस्य कपालाधिकरणक-संस्कारविधानेपि बहिः श्रपणसिद्धस्यैव पुरोडाशस्य प्रयोगमध्ये कपालेषु अधिश्रयणस्य अदृष्टार्थत्वं संगच्छत एव। अतः प्रयोगमध्ये अनुष्ठान-लाभार्थः श्रपणविधिः स्यादेव। यद्यपि व्रीहीन् निर्वपति, व्रीहीन् प्रोक्षति, व्रीहीन् अवहन्ति इति व्रीहीणां निर्वापादिसंस्कारविधानात् तेषां च संस्कृतानां प्रयोगमध्ये पुरोडाशप्रकृतितया उपादानं लभ्यते इति तेनैव प्रयोगमध्ये श्रपणस्य अनुष्ठानं सिध्यतीत्यतः प्रयोगमध्ये श्रपणविधेः वैयर्थ्याशङ्का जायते। अथापि तेषां निर्वापादिवाक्यानां व्रीहि-करणक-निर्वापादि-अर्थकर्मविधायित्वेन सांगत्यं सुलभमेव। अत एव दर्शपूर्णमासप्रकरण-श्रुत–जाघन्याः पत्नीः संयाजयन्ति इत्यस्य अनन्यथासिद्ध-प्रकृत्युपादान-लम्भक-विध्यभावेन अर्थकर्मविधायकत्वं ततश्च तत्र स्वरसतः यथासिद्धाया एव जाघन्याः हविष्ट्वेन ग्राह्यत्वप्राप्तिश्च यथा तृतीये साधिता तथैव पुरोडाशस्यापि अनन्यथासिद्ध-प्रकृत्युपादान-लम्भक-विध्यभावेन निर्वापादिवाक्यानाम अर्थकर्मविधायित्वं पुरोडाशस्यापि अनन्यथासिद्धप्रकृत्युपादान - लम्भकविध्यभावे निर्वापादिवाक्यानाम् अर्थकर्मविधायित्वेन यथासिद्धस्यैव हविष्ट्वेन ग्राह्यत्वप्राप्तिश्च अनिवार्यैव। अत एव यत्र अनन्यथासिद्ध-प्रकृत्युपादान-लम्भकविध्यभावः तत्र अर्थकर्मविधायित्वम् इति न्यायमवलम्ब्यैव पशु-सोमाधिकरण-

सिद्धान्तिना तदधिकरण-पूर्वपक्ष-निरासः कृतः। तदयमत्र ददधिकरण-पूर्वोत्तर-पक्ष-संक्षेपः। तत्र हि ऐन्द्रवायवं गृह्णाति मैत्रावरुणं गृह्णाति इत्यादि-वाक्यानि द्रव्यदेवता-संबंधानि यथानुपपत्त्या यागविधायकानि। तेषु च गृह्णाति कर्मभूतं हविः अण्व्याधारया गृह्णाति — इति सन्निहित-वाक्य-प्रमितं धारा-समर्थं द्रवद्रव्यम्। तच्च सोमं क्रीणाति, सोममभिषुणोति, सोमं पावयति — इत्यादि सोम-संस्कारक-वाक्यपर्यालोचनया सोम-प्रकृतिकम् अवसीयते। अतः सोमेन यजेतेत्यत्र सोमशब्दः तत्-प्रख्यन्यायेन तेषां यागानां नामधेयं यजेतेति तत्समुदायानुवादः इति पूर्वपक्षं प्रापय्य सिद्धान्ते अनन्यथासिद्ध-प्रकृत्युपादान-लम्भक-विध्यभावे अण्व्याधारया गृह्णातीत्यनेन उदकादि-साधारणस्य यथासिद्ध द्रव्यमात्रस्य हविष्ट्व-प्राप्तेः क्रयादिवाक्यानि अर्थकर्मविधायकान्येव स्युः नतु पुनः संस्कारकर्म-विधायकतया हविषः सोमरसत्वापादकानि। अतः तत्प्रख्यन्यायो नात्र अवतरति इति दूषणम् उक्तम्। अतश्च प्रकृतेपि यथासिद्धस्य पुरोडाशस्य हविष्ट्वेन ग्राह्यत्व-प्रसक्तिः अपरिहार्येव। यदि तु प्रकृते व्रीहिभिर्यजेतेति विधिना प्रकृत्युपादानं लभ्यते इति तत एव प्रयोगान्त-श्रपणं सिध्यतीति चेत् तदपि न व्रीहिभिर्यजेतेत्यस्य यागोद्देशेन व्रीहिरूप-द्रव्य-विधायकत्वे न पुरोडाशप्रकृतिद्रव्यविधायकत्वाभावात् तस्मात् कपालेषु श्रपयतीति विधिः। श्रपणस्य अन्त-प्रयोग-कर्तव्यता-सिध्यर्थः स्यादेव इति चेत्।

अत्रोच्यते व्रीहिभिर्यजेतेति वाक्यस्य यागोद्देशेन द्रव्यविधायकस्यापि पुरोडाशावरुद्धे यागे व्रीहीणां साक्षात्-करणत्वासंभवेन पुरोडाश-प्रकृति-विषयत्व-पर्यवसायित्वेन निर्वापप्रोक्षणादि-विधीनामपि पुरोडाश-प्रकृतिक-व्रीहिविषयत्व-लाभेन तत एव श्रपणस्य प्रयोगमध्य-कर्तव्यत्वं सिध्यत्येव। एवमपि प्रयोगान्तपातितया श्रपणसिद्धावपि तस्य श्रपणस्य कपालाधि-करण-सिध्यर्थो विधिः स्यात् इति न स्यात्। पूर्वोपपादितरीत्या श्रपणस्य प्रयोगमध्य-कर्तव्यतासिद्धौ उत्पत्तिवाक्यावगतस्य कपालेषु संस्कारस्य श्रपणरूपता सिध्यत्येव। दृष्टासंभवे हि परं कपालेषु संस्कारस्य श्रपणस्य अदृष्टार्थ-अधिश्रयण-रूपता प्राप्नुयात्। नह्यस्ति दृष्टासंभवः। एवमपि श्रपणस्य आध्वर्यव-समाख्या-बल-लभ्य अध्वर्यु-कर्तृकत्व-नियमार्थः श्रपण-विधिः स्यात् इति चेत् तदपि न। ऐष्टिकहविः श्रपणेषु अध्वर्योः अविदहन्तः

श्रपयतेति प्रष-बलात् प्रयोजक-कर्तृत्वेन प्रैषेषु पराधिकारात् इति न्यायेन प्रेषितुः अध्वर्योः अन्यस्यैव पुरोडाश-श्रपणे साक्षात्-कर्तृत्वात् यदि तु अध्वर्योः प्रयोजक-कर्तृत्वनियमार्थः एव एतद्विधिरिति रुच्येत सोऽपि मन्त्रवर्णादेव लभ्यते। तस्मात् कपालेषु श्रपयतीति विधिः अन्यलभ्यश्रपण-विधानेन प्रकृत्युपादानम् आक्षिप्य आक्षिप्तोपादानापेक्षितप्रकृतिद्रव्यनियम-मात्र-परत्वं व्रीहि-शास्त्रस्य आपाद्य-व्रीहि-नियमद्वारा चित्रेष्टिगत-तण्डुल-द्रव्यक-यागात् प्रकृत्युपादाने प्रसक्ते व्रीहिनियम-व्यावर्तनार्थो अयं विधिः कपालेषु श्रपयतीति विधेरभावे तण्डुलयागादर्थलोपेन श्रपण-निवृत्तावपि व्रीहि-शास्त्रस्य श्रपण-मुख-प्रवृत्तिकत्वाभावेन व्रीहिशास्त्रमेव जात्यवस्था-विशेष-विशिष्ट-प्रकृति-द्रव्योपादानपर्यन्तम् इत्यतः अतिदेशेन अङ्गान्तरैः साकं व्रीहिरूप-प्रकृति-द्रव्योपादानमपि प्राप्नुयात्। सति त्वस्मिन् विधौ विहितस्य श्रपणस्य प्रयोगमध्ये अनुष्ठेयतया तत्र तत् प्रकृत्युपादाने श्रपण-विधित एव अर्थतः सिद्धेः व्रीहिशास्त्रं प्रकृति-द्रव्ये जात्यवस्था-विशेषनियमार्थं भवति। ततश्च प्रयोगमध्ये श्रपणार्थं प्रकृतिद्रव्याण्युपाद-दीत् इति यत् तद् व्रीहि-जातीयानि सतुषावस्थानि इति व्यवस्था सिध्यति। एवं व्यवस्था तदा सिध्येत् यदा व्रीहि-शास्त्रस्य प्रकृत्युपादान-प्राप्त्यर्थं श्रवणविध्यपेक्षत्वं ततश्च वैकृते यत्र हविषि श्रपणम् अपेक्षितं तत्र श्रपणस्य प्रयोगमध्ये अनुष्ठानं यत्र च श्रपणं तत्र प्रकृत्यपादानं यत्र च प्रकृत्य-पादानं तत्र व्रीहिनियमः। एवं सति तण्डुलयागाद् अर्थ-लोपेन श्रपण-निवृत्तौ तन्मूलकं व्रीहिनियमपर्यन्तं निवर्तत एव। तत्र संग्रहश्लोकौ —

तण्डुलेभ्योर्थलोपेन श्रपणं विनिवर्तते।
श्रपणस्य निवृत्तस्य स्वयं-कर्तृकता कथम्।
तदधीनमुपादानं प्रकृतेः स्यात् कथंतराम्।
तद्वशात् व्रीहिनियमस्तदभावे कथंतमाम्॥

महाराजा संस्कृत कोलेज
मैसूरु

बी. गणेशभट्टः
मीमांसाध्यापकः

४. दहराधिकरणम् ।

अथेदानीं शारीरक-मीमांसायाः प्रथमाध्यायस्य तृतीयपादे पञ्चमं दहराधिकरणं शांकरभाष्यानुसारेणारच्यते ।

अधिकरणेऽस्मिन् 'दहर उत्तरेभ्यः' इत्यारभ्य 'अल्पश्रुतेरिति चेत-दुक्तम्' इत्येतदन्तानि सप्तसूत्राणि प्रवर्तन्ते । विषयवाक्यजातं चास्य —

'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्मदहरोऽस्मिन्नन्तराकाशः तस्मिन् यदन्तस्तदन्वेष्टव्यम् । तद्वाव विजिज्ञासितव्यम्' इत्यादि ।

तत्र योऽयं दहरे हृदयपुण्डरीके दहर-आकाशः श्रुतः स किं भूताकाशः अथवा विज्ञानात्मा जोवः उत परमात्मेति संशयः । आकाश-ब्रह्मपुर-शब्द-प्रयोगात् । आकाशशब्दो ह्ययं भूताकाशे रूढः । परस्मिश्च बहुत्र श्रुतिषु निरूढिः । एवं जीवोत्र ब्रह्मनामा तस्येदं पुरं ब्रह्मपुरमिति वा परस्यैव ब्रह्मणः पुरं ब्रह्मपुरमिति वा जीव-परत्वं ब्रह्मपरत्वं वा स्यादिति । अत्रोच्यते 'दहर उत्तरेभ्यः,' इति । दहराकाशो ब्रह्म पाश्चात्येभ्यो वाक्यशेषगतश्रुतिलिङ्गेभ्यः न भूताकाशो जीवो वा । यद्यपि भूताकाश आकाशशब्दो रूढस्तथापि यावान्वाच्यमाकाशस्तावानेषोऽन्तर्हृदय-आकाश इत्यादिना आकाशौपम्यप्रदर्शनपूर्वकं पुण्डरीक-वेष्टनप्राप्त-दहरत्वमाकाशस्य निवर्तयन्नाचार्यो भूताकाशत्वमस्यापवदति । गगनं गगनाकारमित्येवंजातीयकोऽनन्वयालङ्कारो वा ।

उपाददे तस्य सहस्ररश्मिस्त्वष्ट्रा नवं निर्मितमातपत्रम् ।
सतद्दुकालादविदूरमौलिर्बभौ पतद्गङ्ग इवोत्तमाङ्गे ॥

इत्यत्रेव विशेषणोपाधिकृत-भेदस्यैवास्यैवोपमानोपमेयभावात्मा उपमा-प्रभेदो वा भूताकाशवादिनाम् उपपद्यते । उपपद्यते तु 'किं तदत्र विद्यते' 'यावान्वायमाकाशस्तावा-नेषोन्तर्हृदय आकाशः इत्याक्षेप-समाधानाभ्याम् प्रतिपादयितुम् इष्टस्य दहराकाश-वैपुल्यस्य प्रतिपादक उपमा-प्रभेदः परमात्मपक्षे ।

किं च "एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजि-

घत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः' इत्युक्त्वा अपहतपाप्मत्वादयो गुणा न भूताकाशे संभवन्ति । यद्यप्यात्मशब्दो जीवे संभवति तथापि उपाधिपरिच्छिन्नत्वादिभिः कारणैः पुण्डरीक-वेष्टनप्राप्त-दहरात्वादि-निवृत्तिर्जीवे संभवति । न तावद्ब्रह्माभेद-विवक्षया शक्यवचनमिदम् । यदात्मतया जीवस्य सर्वगतत्वादि विवक्ष्यते तस्यैव ब्रह्मणः साक्षात्सर्वगतत्वादि विवक्ष्यतामिति युक्तम् । स एतस्माज्जीवघनात् परात्परात्परं पुरिशयं पुरुषमीक्षते इत्यादिश्रुतिभ्यो ब्रह्मणोऽप्यस्ति पुरेणानेन संबन्ध उपलब्ध्यधिष्ठानत्वात् । "तस्मिन्यदन्तस्तदन्वेष्टव्यम्" इत्यादिना दहराकाशान्तर्वर्ति-द्यावापृथिव्याद्युपास्यमन्यदेवोच्यते न दहराकाश इति वाच्यम् । यावान्वाऽयमाकाश इत्याकाशस्यादिना दहराकाशौपम्य-प्रदर्शनानुपपत्तेः । एतदप्यन्तर्वर्ति-द्यावापृथिव्यादि-वस्तु सद्भाव-प्रदर्शनार्थम् इत्यपि न युक्तम् । द्यावापृथिव्यादिकस्योपास्यत्वापत्तेः । "अस्मिन् कामाः समाहिताः" 'अपहतपाप्मा' इत्यादि-वाक्यशेषानुपपत्तेः । तथा च 'अथ य इह आत्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामान् इति समुच्चयार्थेन चकारेणात्मानं कामाधारमाश्रिताश्च कामान् विज्ञेयान् वाक्यशेषो दर्शयति इति दहर एवाकाशो हृदय-पुण्डरीकाधिष्ठानः सहान्तस्थैस्समाहितैः पृथिव्यादिभिः सत्यैश्च कामैर्विज्ञेय इति स च परमेश्वर एवेति सिद्धान्तः ।

'इमास्सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति' इत्यनेन प्रजाशब्द-वाच्यानां जीवानामहरहर्गमनस्य निर्देशेन दहराकाशे ब्रह्मलोकशब्दस्य प्रयोगेण च अहरहर्गमनारूपलिङ्गेनैव ब्रह्मलोक-शब्दस्य षष्ठीसमासाश्रयणासंभवेन च दहराकाशो ब्रह्मैव नापरः ।

"अथ य आत्मा स सेतुर्विधृतिरिति विधारकत्व-रूपमहिम्नोऽस्य प्रतिपादितत्वात् "एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः" इति, "एष सेतुर्विधरण एषां लोकानामसंभेदाय" इति च असंदिग्धेश्वर-परत्वाक्षर-ब्राह्मणादि-वचनैश्च तत्समर्थनात् परमेश्वर एव प्रतिपाद्यः ।

किं च "आकाशो वै नाम नामरूपयोर्निर्वहिता" इति इमानि

भूतान्याकाशादेव समुत्पद्यन्ते इति साक्षाद्ब्रह्मण एव आकाशशब्देन निर्देशात् च ।

"अथ य एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परंज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते" इति वाक्यस्य न जीवपरत्वमपहतपाप्मत्वादि-धर्माणाम् असंभवात् ।

उत्तरस्मिन् अपि प्राजापत्यवाक्ये एषोऽक्षिणि इत्यक्षिलक्षितं द्रष्टारं निर्दिश्य उदशशराव-ब्राह्मणेनैनं शरीरात्मताया व्युत्थाप्य स्वप्न-सुषुप्तोपन्यास-क्रमेण परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते, इति यदस्य पारमार्थिकं स्वरूपं परं ब्रह्म तद्रूपतयेनं जीवं व्याचष्टे न जैवेन रूपेणेति न काचिदनुपपत्तिः । दहरोऽस्मिन् अन्तराकाशः इतीयमल्पत्व-श्रुतिः अर्भकौकस्त्वात्तद्व्यपेदशाच्च नेति चेन्ननिचाय्यत्वादेवं व्योमवच्च इति न्यायेनानुसंधेय-परिहारा इति सर्वमनवद्यम् ।

शिवंपेट (मेदक-आन्ध्र) शास्त्रुल् विश्वनाथशर्मा

१. स्थानिवदादेशोऽनल्विधौ ।

'स्थानिवदादेशोऽनल्विधौ' — इति त्रिपदम् इदं सूत्रम् । 'संज्ञा च परिभाषा' इत्यादिना विभक्तेषु षड्विधेषु अतिदेशात्मकम् इदं पाणिनीयम् । अविद्यमान-धर्म-प्रापकः अतिदेशः । स्थानिवृत्ति-धर्मः यतश्च आदेशे अतिदिश्यते भवत्यसौ अतिदेश-पद-वाच्यः । स्थानिना तुल्यः स्थानिवत् । तेन तुल्यं क्रियाचेद्वतिः । — इति वति-प्रत्ययः स्थानिना तुल्यः भवति । नाम स्थानिवृत्ति धर्मं लभते इत्यर्थः । अलः विधिः अल्विधिः । न अल्विधिः अनल्विधिः । तस्मिन् इति विग्रहः । आदेशोद्देश्यक-स्थानिवद्भावस्य प्रवृत्ति-संकोचकम् आर्थनिषेधपरमिदं वाक्यम् । पर्युदासात् तत्रत्याल्पदेन पाठक्रमस्य अर्थक्रमापेक्षया दुर्बलत्वादादेशीयां प्रत्यासत्तिं परिहाय स्थानिसंबन्धिनः अलः परिग्रहणम् । स्थान्यलाश्रय-भिन्ने कार्ये कर्तव्ये आदेशः स्थानिवृत्ति धर्मं लभते इति पार्युदासिके विशिष्टे वाक्यार्थे अल्विधौ पर्युदासमहिम्ना प्रतिषेधः पर्यवस्यति । सोऽयं प्रतिषेधः स्थानिभूताल्वृत्तिधर्माश्रये तत्संबन्धि- वर्णवृत्ति - धर्माश्रये चेति द्विविधः इति आमनन्ति भट्टपादाः । द्वैविध्योपाय-भूत-तन्त्राद्याश्रयणे प्रमाण-प्रमेययोः सद्भावात् तत्र स्थानि-संबन्धिनो वर्णवृत्ति-धर्माश्रये निषेधे, अदोजग्धिर्ल्यप्तिकिति इति सूत्रे तादि-किन्निमित्तक- जग्ध-विधायक-वाक्येनैव प्रजग्ध्य इत्यत्रापि स्थानिवद्-भावप्रयुक्तं तादिकितमा-स्थाय प्रकृते आदेशे उपपन्ने पुनः ल्यपो ग्रहणम् एव द्वितीये नल्यपि इति ईत्वनिषेधपरम् । ततश्च प्रथम-निषेधस्य आकरः अतिदिदिक्षतः अल्मात्र-वृत्तिश्च यो धर्मः तद्घटितश्च यो धर्मः तद्धर्माश्रयं यत्कार्यं तस्मिन् कर्तव्ये आदेशो न स्थानिवत् इति अल्मात्रवृत्ति-धर्मावच्छिन्न-स्थानिता-निरूपित आदेशताश्रयधर्मिकारोप-प्रकारीभूत-धर्माश्रयं यत् कार्यं तस्मिन् न स्थानिवत् इति द्वितीयस्य प्रथमोदाहरणानि बभूवतुः इत्यादीनि । द्वितीयस्य तु धिन्वन्ति इत्यादीनि । अन्यथा तत्र उकारात्मक-आर्धधातुक-स्थानिक - वकारात्मक-यणादेशस्य सुप्त्वादेरिव समुदाय-वृत्तितया अनल्विधाविति निषेधाभावेन उकारवृत्त्यार्धधातुकत्वे अतिदिष्टे स्वतो विद्यमानं वत्वमुपादाय व्यपदेशिवद्-भाव-प्रयुक्त-वलाद्यार्ध-धातुकत्व-

प्रयुक्तस्य 'आर्ध धातुकस्येड्वलादेः' इति इडापत्तिर्दुर्वारैव । आश्रिते तु द्वितीये न दोषः । तथाहि — अत्र अल्मात्रवृत्तिर्धर्मः इक्त्वम् । तद्धर्मावच्छिन्ना या स्थानिता इग्निष्ठा स्थानिता तन्निरूपिता या आदेशता वरूपयणादेशनिष्ठा आदेशता । तदाश्रयः वकारः । तद्धर्मिकः यः आरोपः वादेशः आर्धधातुकत्ववान् । तत्र प्रकारीभूतस्तु धर्मः आर्धधातुकत्वरूपः । तदाश्रयो विधिः इड्-रूपः । तत्र स्थानिवद्भावनिषेधेन निरुक्त-धर्मस्य अभावात् नेटः प्रवृत्तिः । अत्र आदिमः एकः दीक्षितपादानाम् अभिमतः, प्रथमद्वितीयावपि भट्टपादानाम् । तदाह शेखरग्रन्थे — आदेशस्य स्थानिभूत इत्यादिना ।

अत्र अयं पूर्वपक्षः । आर्धधातुकस्येति इडागमस्य अपरनिमित्तकत्वेन अन्तरङ्गतया । 'असिद्धं बहिरङ्गमन्तरङ्गे' — इति परिभाषया अन्तरङ्गे इटि कर्तव्ये परनिमित्तकत्वेन बहिरङ्गस्य यणोऽसिद्धत्वेन वलाद्यार्धधातुकस्य अभावादेव इट् न प्रवर्तते इति कथम् असाधारणफलत्वं निरुक्तनिषेधस्य इति । न च 'नाजानन्तर्ये बहिष्ट्व-प्रक्लृप्तिः । इति बहिरङ्गासिद्धत्व-निषेधक-वचनेन अन्तरङ्ग-परिभाषया अप्रवृत्तिरिति वाच्यम् । निषेधवचनस्य तस्य प्रकृते प्रसक्तेरभावात् । तथाहि निषेधविषये द्वयी विधा अपूर्वतया ज्ञापकम् । सामान्यतः अन्तरङ्गपरिभाषया अनित्यत्वज्ञापनसिद्धार्थानुवादकं चेति । अपूर्व-ज्ञापकत्वपक्षेऽपि व्याख्या-द्वैविध्यम् । अज्निष्ठान्यानन्तर्य-निमित्तके अन्तरङ्गे बहिरङ्गे वा विषये बहिरङ्गस्य बहिष्ट्वं नेत्येकः प्रकारः । अज्निष्ठ-अन्यानन्तर्य-निमित्तके कस्मिंश्चिद् अन्तरङ्गे कर्तव्ये कृते च यदन्तरङ्गं प्राप्नोति तत्र च कर्तव्ये बहिष्ट्वत्वं न' इति । तत्र किमादिमकल्पे आद्यव्याख्याम् आलम्ब्य निषेध आक्षिप्यते आहोस्विद् द्वितीयाम् ? उताहो तृतीयामाश्रित्य वा ?

नाद्यः । तत्र यद्यपि यणः अज्निष्ठ-अन्यानन्तर्य-निमित्तकत्वसद्भावात् निषेध-संचारः सुकरः । तस्य अन्यानन्तर्य-निमित्तकत्वसत्त्वात् । तथापि निषेध-वचनस्य न तादृशं व्याख्यानं सांप्रतं भवति । तथा सति पचाव + इदम् इत्यत्र गुणादेश-निष्पन्नैकारस्य पूर्वान्तवद्भावेन लब्ध ओडुत्तमत्वमाश्रित्य "एत ऐ" इति ऐकारकर्तव्यतायाम् अभीष्टस्य बहिरङ्गासिद्धत्वस्यापि अलाभ-प्रसंगात् तत्र बहिरङ्गस्य

गुणस्य अन्यानन्तर्य-निमित्तकत्वसत्त्वात् । भाष्ये "असिद्धं बहिरङ्गमन्तरङ्गे" इत्युक्त्वा नाजानन्तर्य इति वक्ष्यामि इत्युक्त्वा तत्रत्य-अन्तरङ्ग-पदस्य अनुवृत्ति-सूचनेन अन्तरङ्गनिष्ठमन्यानन्तर्यनिमित्तकत्वमेव निषेध-प्रवृत्ति-प्रयोजकम् इत्यास्थेयम् । स्पष्टा चेयं रीतिः । नाजानन्तर्य-परिभाषाव्याख्याने परिभाषेन्दुशेखरे एतेन केश्चित् शिरोमणिभिः यदत्र व्याख्यायि-अजानन्तर्य-निमित्तक-कार्यप्रवृत्त्युत्तर-काल-प्रवृत्तिके अन्तरङ्गे कर्तव्येऽपि बहिषः तत्त्वनिषेधः आस्थेयः । अन्यथा अक्षद्यूः इत्यत्र वलि लोपकर्तव्यतायाम् ऊठः असिद्धत्वनिषेधानापत्तेः । अजानन्तर्य-निमित्तकम् अन्तरङ्गम् एवेत्यत्र न मानमस्ति । एवं च इटि निषेधप्रवृत्तिर्दुर्वारेवेति । तदेतद् विशयपरंपरामेव पुष्णाति । एवं च प्रकृते निषेधाप्रवृत्त्या अन्तरङ्ग-परिभाषयैव निर्वाहे स्थानिवद्भाव-निषेधे तदर्थं द्वितीय-कल्पानुधावनं भट्टपादानां वृथैवेति महानयं पूर्वः पक्षः ।

अत्र अयं राद्धान्तः । तृतीयां कोटिमाश्रित्य प्रकृते अन्तरङ्ग-परिभाषायाः अप्रवृत्तेः न च इष्टस्थलेऽप्यप्रवृत्तौ अस्याः निर्विषयत्वापत्तिः इति वाच्यम् । इड्विषये अनित्यत्वस्य आवश्यकत्वात् अन्यथा भविष्यति इत्यादौ उक्तरीत्या अन्तरङ्गे इटि बहिर्भूत-संख्याद्यर्थनिनित्तक-तिबादिनिमित्तक-स्यादेरसिद्धत्वेन इटः प्रवृत्तिर्न स्यात् । अतः सामान्येन स्वीकृतस्य अनित्यत्वस्य इटि दुर्वारतया प्रकृते अन्तरङ्ग-परिभाषायाः प्रवृत्तेरयोगेन न तया यणोऽसिद्धत्वेन वारणं भवति इति द्वितीय-निषेधपर्यन्तानुधावनं भट्टपादानां न कमपि दोषलेशमापादयतीति अत्रत्योऽयं राद्धान्तः ।

गुण्टूर

—शिष्ट साम्बमूर्तिशास्त्री

२. अन्तादिवच्च।

अन्तादिवच्चेत्यत्र 'एकः पूर्वपरयो'रिति वर्तते। यथासङ्ख्यञ्च संबन्धः। पूर्वपदमेकादेशपूर्वस्थानिचरमावयवके लाक्षणिकम्। एवं परपदमेकादेशपरस्थान्याद्यावयवके लाक्षणिकम्। तथा च एकादेश एकादेशपूर्वस्थानिचरमावयवकसमुदायस्यान्तवत्स्यात् एवमेकादेशः परस्थान्याद्यावयवकसमुदायस्यादिवत् स्यादिति सूत्रार्थः। एकादेशनिष्ठचरमावयवतानिरूपकसमुदाये एकादेशपूर्वस्थानिनिष्ठचरमावयवतानिरूपकसमुदायवृत्त्यर्थवत्पर्याप्तधर्मा अतिदेष्टव्याः। एवमेकादेशनिष्ठाद्यावयवतानिरूपकसमुदाये एकादेशपरस्थानिनिष्ठाद्यावयवतानिरूपकसमुदायवृत्यर्थवत्पर्याप्तधर्मा अतिदेष्टव्या इति यावत्। तेन रामावित्यादौ परादिवत्वेन औ इत्यस्य सुप्त्वे पूर्वमान्तस्यैकदेशविकृतन्यायेन प्रकृतित्वे यस्माद्विहितस्तदादितदन्तत्वमार्थसमाजग्रस्तमिति पदत्वसिद्धिः। तद्वर्णमात्रवृत्तिधर्मानतिदेशात् खट्वाभिरित्यत्राऽत्वनिबन्धन ऐस्न, अयजे इन्द्रमित्यादौ सवर्णदीर्घश्च न। अत एव तुक्यसिद्धवचनं चरितार्थम्। अन्यथा 'अधीत्य'इत्यादावादिवत्वेन ह्रस्वत्वप्रयुक्ततुकसिद्धौ तद्वैयर्थ्यं स्पष्टमेव। तदुक्तम् — वर्णाश्रये चान्तादिवत्त्व-प्रतिषेधो वक्तव्यः; न वाऽताद्रूप्यातिदेशात' इति। अन्तादिवर्णमात्रवृत्तिधर्मानतिदेशादिति तदर्थः। 'क्षीरपेण' इत्यादावेकारविशिष्टे एकाजुत्तरपदत्वम् भवत्येव। एकाजुत्तरपदत्वस्यान्तादिवृत्तिवर्णमात्रवृत्तिधर्मघटितत्वेन कथं 'पे' इत्यतिदेश इति तु न शङ्क्यम्। स्ववृत्तित्वस्वाभाववत्वैतद्द्वितय-संबन्धेन स्वविशिष्टाल्मात्रवृत्तिधर्मघटितधर्मो नायातीत्यर्थकरणेनादोषात्। अभावश्च स्वस्थानिकादेशवृत्तित्वम् – स्वनिष्ठा या अभेदसंबन्धावच्छिन्नप्रकारतावच्छेदकता संबन्धानवच्छिन्नप्रकारतावच्छेदकता वा तदवच्छेदकत्वमेतदुभयसंबन्धावच्छिन्नप्रतियोगिताको ग्राह्यः। इति।

श्री साधुबेला-संस्कृत-महाविद्यालयः
वाराणसी

शालिग्राममिश्रः
व्याकरणविभागाध्यक्षः

३. 'कर्तुरीप्सिततमं कर्म।' १-४-४९

'आप्लृधातोः सन्नन्ताद्वर्तमाने क्तः।' ततः तमपि ईप्सिततम-शब्दो निष्पद्यते। अत्र धातोः संबन्धमात्रम् अर्थः। सना उद्देश्यत्वं द्योत्यते। क्तप्रत्ययार्थ-वर्तमानकालो न विवक्षितः। तमपा इच्छा-विशेषणीभूत-संबन्धगतः प्रकर्षो द्योत्यते। स च प्रधानव्यापारप्रयोज्य-धात्वर्थफलीयत्वरूपः, धात्वर्थ-संबन्धस्य करणाकाङ्क्षायां सूत्रोपात्त-कर्तृपदार्थ-विशेषणीभूतः व्यापारः अन्वेति। स च फलानवच्छिन्न एव व्यापारेण संबन्धश्च। स्वजन्यत्व-स्वजन्याश्रयत्वान्यतररूपः सूत्रे कर्तुरिति कर्तरि षष्ठी। तथा च कर्त्रा स्वनिष्ठ-व्यापारेण निरुक्तान्यतरसंबन्धेन संबन्धुमिष्यमाणं व्यापारोद्देश्यं कारकं कर्मसंज्ञं स्यादिति सूत्रार्थः। एवं च कर्तृगतप्रकृतधात्वर्थ-प्रधानव्यापारप्रयोज्यव्यापारव्यधिकरणप्रकृतधात्वर्थफलाश्रयत्वेन कर्तुरुद्देश्यत्वं कर्मत्वमिति लक्षणं सिध्यति। उदाहरणं 'तण्डुलं पचति चैत्रः।'—अत्र विक्लित्त्याश्रयत्वात् तण्डुलस्य कर्मत्वम्।

स्वजन्यत्व-रूप-संबन्ध-ग्रहणे व्यापार-जन्यत्वेन धात्वर्थविक्लित्त्यादेः फलस्य सिद्धति। स्वजन्याश्रयत्वरूप-संबन्ध-ग्रहणे व्यापार-धात्वर्थ-विक्लित्त्याश्रय-तण्डुलादेः तत्त्वम्। फलस्य कर्मत्वे तत्समाधानाधिकरणे स्तोकादावपि तत्त्वात्ततो द्वितीया सिध्यति। 'स्तोकं पचति'-धात्वर्थव्यापारान्वये तु स्तोकादिभ्यः प्रातिपदिकार्थमात्रे प्रथमैव। घञर्थव्यापारान्वये तु प्रथमा पुलिङ्गता च। 'स्तोकः पाकः।' संख्यान्तराभावाच्च तेभ्य एकवचनमेव। एतत्-सिद्धार्थकथनमेव "क्रियाविशेषणानां कर्मत्वं नपुंसकत्वमेकवचनान्तत्वं च" इति नपुंसकत्वमपि "सामान्ये नपुंसकम्—" इत्यनेन सिध्यत्येव।

माषेषु अश्वं बध्नातीत्यत्र माषेषु प्रसक्तमश्वं माषनाशो मा भूदित्यन्यत्र बध्नातीत्यर्थक-माषेष्वतिव्याप्ति-वारणाय कर्तुरिति। अत्र अश्वरूपकर्मनिष्ठप्रसञ्जनक्रियाजन्यसंयोगरूपफलाश्रयत्वेन माषाणां कर्मत्वं प्राप्नोति। कर्तृग्रहणाद् वार्यते। तत्र पुष्टयर्थं माष-भक्षणाय माष-क्षेत्रे बध्नातीत्यर्थस्वीकारे तु कर्तृग्रहणेन न तद्वार्यते। फलस्य प्रकृतधात्वर्थत्वाश्रयणेन तद्वारणं कार्यम्। भक्षणस्य प्रकृतबन्ध-धात्वर्थत्वाभावान्न दोषः।

तमपो ग्रहणेन फले प्रकृतधात्वर्थ-प्रधानव्यापार-प्रयोज्यत्वलब्धम्। तेन अग्नेर्माणवकं वारयति इत्यत्र चैत्रादिनिष्ठ-प्रधानव्यापारप्रयोज्यत्वस्य संयोगे अभावान्न तत्र कर्मत्वम्। अन्यथा कर्तृव्यापारजन्यफलाश्रयत्वस्य अग्निमाणवकयोरुभयोरपि सत्त्वेन उभत्रापि कर्मत्वापत्त्या "वारणार्थानामीप्सितः।"—इति सूत्रं निरवकाशं सत् कर्मत्वं बाधेत। तथा चोभयत्रापि पञ्चम्येव स्यात्। तमपो ग्रहणे तु प्रधानव्यापारप्रयोज्यफलाश्रयस्य कर्मत्वम् अप्रधान-माणवक-निष्ठव्यापार-प्रयोज्य-फलाश्रयस्य अपादानत्वमिति संज्ञाद्वयस्य स्थलव्यवस्थया प्रवृत्तिः सिध्यति।

हरिहैलाराजौ तु — तमपो ग्रहणं मास्तु। सर्वं कर्म ईप्सितमेवेति सर्वत्रापि कर्तुरीप्सितमिति सूत्रेणैव सिध्यति। तथायुक्तम् इत्यादीनि तु मन्दबुद्धिवैशद्यार्थानि। वारणमर्थयन्ते इति वारणार्थाः। वारणानार्हाः, वार्यमाणाः प्रतिषेद्धव्याः गवादयः, तेषां यदीप्सितं यवादि, तदपादानम् इत्यर्थात् संज्ञाद्वयस्य व्यवस्था। एतादृश-रीत्याश्रयणे अपादानसूत्रस्थं भाष्यमनुकूलम् इति व्याचक्षते।

कालिक-संबन्धेन फलाश्रयस्य कर्मत्वं तु न। फलतावच्छेदकतया समवायस्य संबन्धत्वाङ्गीकारात्। वस्तुतस्तु कर्मलक्षणे उद्देश्यत्वस्य निविष्टतया कालिक-संबन्धेन फलाश्रयस्य कर्तुरुद्देश्यत्वाभावादेव कर्मत्वाप्राप्तेः।

क्रियाविशेषणानां कर्मत्वेन द्वितीयान्तादेव दारुणमध्यापक इत्यर्थकस्य दारुणाध्यापक इत्यस्य सिद्धये "मलोपवचनम्" इति वचनमारब्धं वार्तिककृता, दारुणं यद् अध्यापनं तत्कर्तेति तदर्थः।

वारयतेश्च संयोगानुकूलव्यापाराभावानुकूलव्यापारोऽर्थः।

गौतमी-विद्यापीठम्
राजमहेन्द्रवरम् (आन्ध्र)

पेरि सूर्यनारायणशास्त्री
व्याकरणविद्वान्

४. यदागमपरिभाषा-अवतारिका।

वैयाकरण-सार्वभौम-नागेशभट्ट-रचिते परिभाषेन्दुशेखरे यदागम-परिभाषा निबद्धा। तस्याः परिभाषायाः अवतारिका एवं वर्तते— ननु प्रणिदापयतीत्यादौ दारूपस्य विधीयमाना घुसंज्ञा दापेर्न स्यात् अत आह इति। अत्र प्र-नि-इत्युपसर्ग-द्वय-पूर्वकस्य दाञ्धातोः णिचि 'अर्ति-ह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ' इति सूत्रेण पुगागमे 'नेर्गदनदपतपद-घुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च' इति सूत्रेण णत्वे कृते ततः लटि तिपि शपि गुणे अयादेशे च कृते प्रणि-दापयतीति रूपं सिद्ध्यति।

अत्र 'दाधाघ्वदाप' इति सूत्रेण दारूपस्य धातोः घुसंज्ञा विहिता। ननु दाप् इत्यस्य। अतः घुसंज्ञकधातुपरकत्वाभावेन नेर्गदेति णत्वं न सिद्ध्यति। णत्वाभावे प्रणिदापयतीति रूपं न सिद्ध्यति इति पूर्वोक्तया अवतारिकया आशङ्क्य यदागमपरिभाषया समाहितम्।

अत्रायं पूर्वः पक्षः।

दाप् इत्यस्य दारूपत्वाभावेऽपि दापघटक-दा-इत्यस्य दारूपं वर्तते। तादृश-दा-रूपमादाय घुसंज्ञायां सत्यां णत्वे प्रणिदापयतीति रूपं सिद्ध्य-त्येव। किमर्थमियमवतारिकाया आशङ्का इति। अत्रेदं समाधानम्— आगमसमभिव्याहारे आगमविशिष्टस्यैवार्थवत्त्वम्। न तु केवलस्य। अत एव "नैतौ दाधावर्थवन्तौ किं तर्हि पुग्विशिष्टौ" इति दाधाघ्वदाप्-इति सूत्रस्थं महाभाष्यं संगच्छते। अपि च भावकर्मवाचिनि तशब्दे परतः स्यादयः इत्यर्थे सीयुट् अविशेषितः स्यात् इति "स्यसिच्सीयुट्तासिषु-भावकर्मणोरुपदेशेऽज्झनगमदृशां वा चिण्वदिट् च" इति, सूत्रस्थं भाष्य-मपि संगच्छते। अन्यथा सीयुट्समभिव्याहारेऽपि केवलस्याविशेषित इति भाष्योक्तिः असङ्गतैव स्यात्। अतः अवतारिकाया आशङ्का अत्यन्तं समीचीनैव। पुनरयं पूर्वः पक्षः— यथोद्देशपक्षे प्रयोजन-विशेषानुद्देशेन धाप्संज्ञासमनन्तरमेव घुसंज्ञायां सत्यां णेर्गदेति णत्वं सुलभमेव। अतः अव-तारिकाया आशङ्कायाः नावकाशः इति। तस्य समाधानम्— अकृतव्यूह-परिभाषां स्वीकुर्वतां प्राचीनानां वैयाकरणानां मते तत्र अर्थवद्धातुरूप-

निमित्तस्य पुगागमेन विनाश-संभवात् पूर्वं घुसंज्ञायाः अप्रवृत्तेः प्रणिदापयतीत्यत्र णत्वं न सिद्धयति। अपि च बहिर्भूतणिञ्निमित्तक-पुगागमस्य बहिरङ्गत्वेन असिद्धत्वात् अनिमित्तकत्वेन अन्तरङ्ग-घुसंज्ञायां कृतायां बहिरङ्गस्य पुगागमस्य असिद्धत्वेन दाबुद्ध्यैव घुत्वं भविष्यतीत्यपि वक्तुं नैव शक्यते। कुत इति चेत् संज्ञा-शास्त्राणां विधि-निमित्त-निमित्तकत्वस्य वैयाकरणैरङ्गीकृतत्वात् घुसंज्ञायाः अन्तरङ्गत्वं नास्ति। अत एव नयासयोः इति निर्देशः संगच्छते। अन्यथा परनिमित्तकत्वेन 'त्यदादीनामः' इति सूत्रेण विहितस्यात्वस्य बहिरङ्गत्वेन असिद्धतया गुणसंज्ञायाः अप्रवृत्तेः पररूपाप्राप्तौ निर्देशासङ्गतिः स्पष्टैव। अतः अवतारिकाया आशङ्का अत्यन्तं समीचीनैव। अतः घु-संज्ञायाः अन्तरङ्गत्वं नास्ति। एकदेशविकृतन्यायमनुसृत्य दापि घुत्वमादाय अवतरणासङ्गतिं केचित् वदन्ति। तदपि न समीचीनम्। तत्र विकारपदेन स्थाने जायमानह्रास-वृद्ध्योरेव ग्रहणेन आगम-विषये पूर्वोक्त-न्यायस्याप्रवृत्तिः। एवमेव पूर्वपक्ष-परम्परायाः समाधानपरम्परा सम्यगास्ते। अनेन ग्रन्थेन अवतारिकायाः पूर्वोक्ताया आशङ्का अत्यन्तं समीचीनैवेति सैद्धान्तिकः पन्थाः।

राजमहेन्द्री–४ **पिशुपाटि सुब्रह्मण्यशास्त्री**

५. सार्वधातुकार्धधातुकयोः।

सार्वधातुकार्धधातुकयोः इति सूत्रार्थो वर्ण्यते। सार्वधातुकम् आर्धधातुकं च सार्वधातुकार्धधातुके तयोः इति विग्रहः। इको गुणवृद्धी इति परिभाषया इक इति उपस्थितेन अङ्गस्य इति अधिकृतं विशेष्यते। तदन्तविधिः। मिदेर्गुण इत्यस्मात् गुण इति अनुवर्तते। तदाह — सार्वधातुकार्धधातुकयोः परतः इगन्ताङ्गस्य गुणः स्यात् इति सूत्रार्थः। भवति, भविता इत्याद्युदाहरणम्। भवतीत्यत्र लटि, तिपि, शपि सूत्रेणानेन गुणे अवादेशे, भवतीति सिद्धयति। भविता इत्यत्र च लुटि स्यतासी लृलुटोः इति तासि तिपि तस्य डादेशे डित्वाट्टिलोपे इटि अनेन गुणे अवादेशे भविता इति सिद्धयति।

ननु लाघवात् पिदार्धधातुकयोरित्येव अस्तु, इति न वक्तव्यम्। एवं न्यासे हरिषु कविषु इत्यादौ सप्तमीबहुवचनसुपोऽपि पित्त्वेन गुणाऽपत्तेः। न च आर्धधातुकसाहचर्येण सहचरितासहचरितयोः सहचरितस्यैव ग्रहणमिति परिभाषया पितः धातुविहितस्यैव ग्रहणेन प्रकृते अदोषः इति वाच्यम्, लुनातीति लूः, पुनातीति पूः, भवतीति भूः तेषु, लूषु, पूषु, भूषु इत्यादौ धातुविहितपितः सत्त्वेन गुणापत्तितादवस्थ्यमिति न च वाच्यम्। आर्धधातुकसाहचर्येण धातुत्वावच्छिन्न-उद्देश्यतानिरूपित-विधेयताश्रयस्यैव पितः ग्रहणात्। प्रकृते च लू, पू, भू इत्याकारककर्तृक्विबन्त-प्रातिपदिकमुद्दिश्य सुपः जातत्वेन प्रातिपदिकत्वावच्छिन्न - उद्देश्यता-निरूपितविधेयताश्रयत्वं सुपः, न तु धातुत्वावच्छिन्न-उद्देश्यतानिरूपित-विधेयताश्रयत्वम् इति व्याख्यानेन अदोषात्। नन्वेवं नूतनन्यासे सतः, युतेत्यादौ पिद्भिन्ने गुणाप्राप्त्या तत्र गुणवारणाय सार्वधातुकमपिदिति अपित्त्वम् द्वारीकृत्य क्ङिति च इति गुणनिषेधः व्यर्थ इति वाच्यम् गुणप्रतिषेधाय अनावश्यकस्यापि ङित्त्वविधायकस्य सार्वधातुकमपित् इत्यस्य उष्ट इत्यादौ संप्रसारणसिद्धये मृष्ट इत्यादौ अवृद्धिसिद्धये च चारितार्थ्य-संभवात्। इति चेदत्रोच्यते — एवं व्यर्थीभूतेन अनेन सार्वधातुकग्रहणेन साहचर्यपरिभाषायाः अनित्यत्व-ज्ञापनात्। अत एव सिजभ्यस्तविदिभ्यश्चेत्यत्र पिदादिसाहचर्यात् सिचः अपि धातोः न ग्रहणम्। किन्तु प्रकृतिप्रत्यययोर्मध्ये पतितः विकरणप्रत्यय एव इति व्याख्यानेन अदोषात्। अत्र च धातोरितिन्यस्य धातोरुच्यमानं कार्यम् इति परिभाषायाः सहकारेण प्रकृते बहून् दोषानाशङ्क्य तान् सर्वान् परिहृत्य परिसमापितं वाक्यार्थवर्णनम्।

शान्तिनिकेतन पॅलेस **के. एन्. एम्. दिवाकरन् नम्पूतिरिद्विजेन्द्रः**
तृपुणितुरा (एरणाकुलम् केरळम्)

६. कालाध्वनोरत्यन्तसंयोगे ।

'कर्मणि द्वितीया 'इत्यतो द्वितीयेत्यनुवर्तते। 'अनभिहिते' इत्यधिकारः। "महत् कौशलमाचार्यस्य तच्चेदं चैकं वाक्यम्" इति चतुर्थे भाष्यानुरोधाद् एकवाक्यतापक्षः साधीयान्। कालाध्वविशेषपरं कालाध्वनोरिति पदं षष्ठ्यन्तसप्तम्यन्तयोस्तन्त्रेणोच्चारितम्। सप्तम्यन्तम् एकवाक्यतया लब्धेन ङ्याप्प्रातिपदिकादित्येन षष्ठ्यन्तं तु अत्यन्त-संयोगे इत्यनेन च अन्वेति। तथा च 'द्व्येकयोर्द्विवचनैकवचने' 'बहुषु बहुवचनम्' इति चैकवाक्यतया संबध्नाति। तथा च कालविशेषे अध्वविशेषे च वाचकतया वर्तमानात् ङयन्तादाबन्तात् प्रातिपदिकाच्च कालविशेषाध्व-विशेषप्रतियोगिकात्यन्तसंयोगात्मक-व्यापकत्वेऽनभिहिते द्वितीयैक-द्विबहुवचनानि अम्, औट्, शस्—इति प्रत्ययाः वाचकत्वेन स्युरित्यर्थः फलति। अनभिहिताधिकार-पाठात् सांराविणम् इति अभिविध्यर्थक-इनुणन्तइप्रकृतिकाणन्तं यत् पदं तद्योगे द्वितीया न प्रवर्त्तत इति मासस्य सांराविणं वर्तत इति षष्ठ्यन्तमेव प्रयुज्यते।

लक्ष्याणि च मासमधीते चैत्रः। मासं मौनी। पक्षं सुद्युम्नः स्त्री। कुम्भकर्णः षण्मासान् स्वपिति। क्रोशं कुटिला नदी। इत्यादीनि। तत्र मास-पदार्थः सूर्योदयावधि-सूर्योदयान्तर-पर्यन्तावस्थायि-अखण्डवस्तूनां त्रिंशतः समुदायः। इत्थं च तादृशेषु दिनेषु किञ्चित्-कालम् अध्ययने किञ्चित् कालम् अनध्ययने च व्यापकत्वार्थ-द्वितीया-प्रयोगोपपत्तये प्रतियोगिवैयधिकरण्यम् अभाव-प्रतियोगितावच्छेदकत्वाभाव-रूप-व्यापकत्व-प्रविष्टप्रथमाभावे विशेषणं देयम्। तथा च मासनिष्ठ-प्रतियोगि-व्यधिकरणाभाव-प्रतियोगितानवच्छेदकं चैत्र-कर्तृकमध्ययनमिति धात्वर्थ-मुख्य-विशेष्यको बोधः। दिवसं स्वपितीत्यत्र दिवसपदार्थः क्षण-समुदाय एव। प्रतियोगि-वैयधिकरण्यं व्यापकतायां प्रविशतु मा वा इति व्युत्पत्तिवाद-स्वरसः। परन्तु द्वितीयाद्युदाहरणेषु अखण्डदिनघटिताः पक्षादिपदार्थाः न संभवन्ति। मौन-स्त्रीत्व-स्वापादेः क्षण-मात्रभङ्गेऽपि तादृश-प्रयोगस्य अनिष्टत्वात्। किञ्च सौर-सावन-चान्द्रेषु मासेषु घटकानां दिनानां विलक्षण-संख्याकत्वात् मासत्वम् अनुगतं नैव संभवतीति तदादिन्यायेन

स्वप्रयोजक - बुद्धि - विषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्ने (स्वपदं मासपदपरम्) मासादि-पदस्य शक्तिः स्वीकरणीया । इत्थं च अनध्येय-दिन-भिन्न-दिन-समुदायात्मकेऽपि मासे अध्ययन-कर्तृ-तात्पर्येणापि मासम् अधीते इति प्रयोगः उपपन्नो भवति । इत्थम् उदाहरणान्तरेषु योजनीयम् । अधिकरणत्वं द्वितीयार्थः मासादि-पद-प्रवृत्ति-निमित्त-मासत्वस्य त्रिंशत्या-दिरूपस्य अधिकरणातायां चैत्र-कर्तृकाध्ययनाधारतात्वादि-व्याप्य-धर्मा-वच्छिन्नं स्वरूपसंबन्धरूपमवच्छेद्यत्वं संसर्गतया भासत इति श्रीगदाधरो-क्तपक्षान्तरे अधिकरणतायाः क्रियान्वय-स्थले अभिव्यापकाधिकरणत्वार्थक-कारक-विभक्ति-सप्तम्याः द्वितीयायाः 'उपपद-विभक्तेः कारक-विभक्तिः बलीयसी' इति परिभाषया बाधप्रसङ्गं केचित् केवलाधिकरणार्थत्वार्थ-कत्वेन द्वितीयाम् अभिव्यापकत्व-विशिष्टाधिकरणार्थकत्वेन सप्तमीं च अङ्गीकुर्वाणा वारयन्ति इति शिवम् ।

तिरुवनन्तपुरम् पण्डितराजः दामोदरपिषारकः

७. समर्थः पदविधिः ।

लालसीतु तरुणारुणप्रभं स्वान्तलीन-तिमिरापनोदनम् ।
शृङ्गशैल-शिखरावतंसनं शांकरं द्विविधमास्थितं महः ।।

नेदं संज्ञासूत्रम् । अन्यत्र व्यवहारादर्शनात् । नापि विधिः । न वा नियमः असंभवात् । नाप्यतिदेशः वतिघटितत्वाभावात् । नाप्यधिकारः उत्तरत्रा-ननुवर्तनात् । पदविधिशब्दस्य वैयर्थ्यापत्तेश्च । परिशेषात् परिभाषा । विधीयते इति विधिः । कर्मणि किप्रत्ययः । शेषषष्ठ्या समासः । पदोद्देश्यक-विधिरित्यर्थः । स च समास-संज्ञादिः । सामर्थ्यं च द्विविधम् । व्यपेक्षा एकार्थीभावश्चेति । भिन्नार्थकानां पदानाम् आकाङ्क्षावशाद् यः संबन्धः सा व्यपेक्षा । सा च वाक्येष्वेव । विशेष्य-विशेषण-भावावगाह्युपरिस्थिति-जनकत्वम् एकार्थीभावः । स च राजन् ङस् पुरुष सु इत्यादि समास-प्रयोजक-वाक्येषूपलभ्यते । न तु समास-संज्ञादिषु । अतः समर्थपदं तदाश्रिते

लाक्षणिकम् । पदोद्देश्यकविधिःसमाससंज्ञादिः समर्थाश्रितः इति परिभाषार्थः फलितः । यथा षष्ठीति सूत्रेण सुबन्तसहोच्चारित-षष्ठ्यन्तोद्देशेन समास-संज्ञा तत्पुरुषसंज्ञा च विधीयते ।

न च समासादीनां पदोद्देश्यकविधित्वेपि सनादीनां तदभावात् सामर्थ्यापेक्षत्वानापत्तिः । न चेष्टापत्तिः साधु भोक्तुमिच्छतीत्यत्र सनापत्तेः इति वाच्यम् । पदविधिशब्देन तत्सहचरितविधेरपि ग्रहणात् । तत्त्वं च तद्विधायक-शास्त्रघटित-पादघटक-शास्त्रविधेयत्वम् । क्यचः सुबन्तोद्देश्यकत्वेन तद्विधायक-शास्त्र-घटित-पादघटकधातोः कर्मण इत्यादि सूत्रविधेयत्वात् सनः तत्त्वं सिद्धम् ।

ननु अभ्युद्धरतीत्यत्र गतिर्गताविति निघातो न स्यात् । ते मयावेकवचनस्येत्येतद्घटित-पादघटक-शास्त्र-विधेयत्वात् इति चेन्न । पदत्व-प्रयोजक - प्रत्यय - प्रयोजक-संज्ञीयोद्देश्यतावच्छेदक-संपादक-शास्त्रविधेयत्व-पदविधित्वमित्यभ्युपगमात् । तच्च समास-कृत्तद्धितसनादीनां सुलभम् ।

सामर्थ्यं च अनेकपदार्थानां विशेष्य-विशेषण-भावावगाह्य कोपस्थितिजनकत्वम् । यथा राजपुरुष इत्यत्र राजन्-शब्दार्थ-प्रकारक-पुरुष-पदार्थविशेष्यकोपस्थितिर्जायते । घट इत्यत्र घटत्वप्रकारक-घटविशेष्यकोपस्थितेर्जायमानत्वाद् अनेकेत्यादि । अयम् अत्र निष्कर्षः — पदविशिष्टत्वं समर्थत्वम् । वैशिष्ट्यं च स्वघटितत्वं,स्वप्रयोज्यविषयतानिरूपित-विषयता-प्रयोजक-स्वेतरपदघटितत्वं, स्वनिष्ठशक्तिपर्याप्त्यधिकरणत्वं, एतत्त्रितय-संबन्धेन । यथा राजपुरुष इत्यत्र राजन्-शब्दघटितत्वं राजन्-शब्दप्रयोज्य-प्रकारताख्य -विषयता-निरूपित - विशेष्यताख्य-विषयता - प्रयोजक-राजन्-शब्देतर - पुरुष-पद-घटितत्वं राजन्शब्दनिष्ठशक्ति - (समुदायशक्ति) - पर्याप्त्यधिकरणत्वं चेति निरुक्तसंबन्धत्रयेण राजन्-पदविशिष्टत्वम् । अत्र तृतीयसम्बन्धदानेन वाक्यव्यावृत्तिः । द्वितीयसम्बन्धे स्वेतरत्वनिवेशन घटादिपदव्यावृत्तिः । पदं च शक्तं विवक्षितम् । तेन सनाद्यन्तेषु न दोषः । स्वघटितेति केवलं स्वरूपप्रतिपादनपरम् । इत्यास्तां तावत् ।

आर्यालयम्, लक्किकडि के. गोविन्दन् नम्बियार
(पालघाट, केरळ)

८. हलन्त्यम् ।

संप्रति सामान्यतः "हलन्त्यम्" इत्यस्य वाक्यार्थबोधः प्रस्तूयते।

"नविभक्तौ तुस्माः" इत्यादेः सार्थक्याय "हलन्त्यम्" इत्यस्योपदेशेऽन्त्यं हल इत्'इत्यर्थस्यावश्यकत्वेन "हलन्त्यम्" "आदिरन्त्येन" इत्यनयोः परस्परापेक्षत्वेन 'स्वज्ञप्त्यधीनज्ञप्तिकत्व'रूपः अन्योन्याश्रयः समापतति। तद्वारणाय शास्त्रे विभिन्नाः प्रकारा आश्रिताः सन्ति। तत्र कतिपय प्रकारानाश्रित्य किञ्चिद् वच्मि।

'उपदेशेऽजनुनासिक इत्' 'हलन्त्यम्' 'इत्यनयोः स्थाने 'उपदेशे इदन्त्यम्' 'अच्' 'अनुनासिकः' इति सूत्रत्रयं कृत्वा 'अनुनासिक' इति तृतीयसूत्रे अजित्यनुवृत्तिसामर्थ्यात् 'अच् चेदिद्भवति तर्ह्यनुनासिक एव' इति नियमाश्रयणाद्रुप्रभृतौ दोषाभावात्, 'मिदचोऽन्त्यात्पर' इति ज्ञापकाच्च 'अनुनासिकश्चेदिद्भवति तर्ह्यजेव' इति विपरीत-नियमस्याभावात् सर्वत्र दोषाभावेन लघीयसानेनैवोपायेनान्योन्याश्रयः परिहृतो भवति। अत्र पक्षे हलकरणरूपं लाघवमपि भवति, इति केचिद् वदन्ति। तत्र तावत् 'अच् चेदिद्भवति तर्ह्यनुनासिक एव' इति नियमाकारः समीचीनो न प्रतिभाति। यतो हि, नियमशास्त्राणां द्विधा प्रवृत्तिरङ्गीकृता। विधि-मुखेन निषेध-मुखेन च। तत्र निषेध-मुखेन प्रवृत्तिपक्षे स्वार्थहानिः, परार्थकल्पना, नञोऽध्याहारश्च कर्तव्यो भवतीति गौरवात् सर्वत्र विधि-मुखेनैव प्रवृत्तिर्वाच्या। विधि-मुखेन प्रवृत्त्यसंभवे तु निषेध-मुखेनापि प्रवृत्तिर्भवति। 'हन्तेरत्पूर्वस्येत्यादौ' यथा। अत्र विधि-मुखेन प्रवृत्ति-स्वीकारे नियम्य शास्त्रीयोद्देश्यतावच्छेदक-व्याप्यं नियामक-शास्त्रीयोद्देश्यतावच्छेदक-व्यापकं च यद्रूपमच्त्वं तदवच्छिन्नाजतिरिक्तत्वेन नियम्य शास्त्रीयोद्देश्यतावच्छेदकावच्छिन्नेऽच्पदार्थे संकोचे 'अजतिरिक्तः अच्-इत्संज्ञको भवति' इत्येव नियमाकारः फलति। तथा च अजतिरिक्तस्याचः अप्रसिद्धत्वात् नियम्यशास्त्रस्य सर्वथा वैयर्थ्यं स्यात्। अतः अत्र निषेध-मुखेनैव प्रवृत्तिर्वाच्या। तत्र पक्षे मध्यमधर्मावच्छिन्नेऽच्पदार्थे नियामक-शास्त्रीयोद्देश्यतावच्छेदकानुनासिक-अच्त्वावच्छिन्नातिरिक्तत्वेन संकोचं कृत्वा भवतीत्यस्य 'न भवति' इत्यर्थे कृतेऽनुनासिक-अजति-

रिक्तः अच् इत्संज्ञको न भवतीति नियमाकारः फलति। अस्मिश्च पक्षे नियम्यशास्त्रवैयर्थ्यमपि न भवति। अनया युक्त्या अच् चेद् इत् भवति तर्ह्यनुनासिक एव' इति नियम-प्रदर्शनपर-शेखरग्रन्थ असंमत एवेति स्पष्टम्।

यद्यपि पूर्वोक्तरीत्या अन्योन्याश्रयपरिहारो जातः। किन्तु अस्मिन्पक्षे योग-विभाग-नियम-ज्ञापकाश्रयणेऽतिगौरवं भवति। अतः 'हलन्त्यम्' इति संपूर्णसूत्रस्यावृत्ति कृत्वा एव अन्योन्याश्रय-परिहारः कर्तव्यः। अत एव भट्टोजि-दीक्षितैः स एव पन्था आश्रितः। इति शम्।

श्रीसाधुवेला-संस्कृत-महाविद्यालयः **माधवशरण उपाध्यायः**
वाराणसी

९. उत्तरपदत्व-पदार्थ-विचारः।

अत्र तावत् 'उत्तरपदत्वे चापदादिविधौ प्रतिषेधः' इत्येतद्घटक-'उत्तरपदत्वपदार्थविचारः प्रस्तूयते।

अत्र हि 'उत्तर'-शब्द उत्तरपदपरः 'विनापि प्रत्ययमि'ति पदशब्द-लोपात्। तथा च उत्तरपदस्य पदसंज्ञायां कर्तव्यायां प्रत्ययलक्षणं नेत्यर्थः। तेन 'परमवाचा' 'परमगोदुहा' इत्यादौ कुत्वधत्वादयो नेति दीक्षितः।

नागेशभट्टास्तु उत्तरेति लुप्तषष्ठीकं बह्वच्पूर्वस्यापदादि-विधौ प्रतिषेध इति वार्तिकारम्भ-सामर्थ्येन उत्तरपदे लाक्षणिकं, तस्य च समासचरमावयवे रूढिरिति 'आर्द्रं चर्म' इत्यत्र न दोषः। 'आर्द्रचर्म' इत्यत्र तु समुदायोत्तर-जायमान-विभक्ति-निमित्तको न लोपः। 'पदव्यवायेऽपि' इत्यत्र सप्तमीसमासमाश्रित्यातद्धित इति वार्त्तिक-प्रत्याख्यान-पर-भाष्येण पदपदं पदत्व-प्रयुक्त-कार्यपरं, तथा च उत्तर-पदनिष्ठोद्देश्यताके पदत्व-प्रयुक्ते कार्ये प्रत्ययलक्षणं नेत्यर्थः। तेन माषकुम्भवापेनेत्यत्र 'पदव्यवायेऽपि' इति णत्वनिषेधसिद्धिरित्याहुः।

ननु परिभाषायां समासचरमावयवे रूढस्योत्तरपदस्य ग्रहणे मघोर-पदघानि 'मघव' इत्यत्र प्रत्यय-लक्षणेन पदत्वात्पूर्वरूपापत्तिः। प्रत्याख्याने तु, सर्वनामस्थाने यजादौ पूर्वं पदं नेत्यर्थेन पदत्वनिषेधान्न दोष इति एवम् अत्र यः अङ्गिरस इत्यत्रापि बोध्यमिति चेन्न। वृत्तिचरमावयवत्वरूपस्यैवो-त्तरपदत्वस्य परिभाषायां ग्रहणेनादोषात्।

ननु पञ्चगवमित्यत्र टचः समासान्तावयवत्वेन गोशब्दे वृत्तिचर-मावयवत्वस्याभावेन वार्त्तिकाप्रवृत्त्या प्रत्ययलक्षणेनावङाद्यापत्तिः।

न च पदेऽन्त इति समासान्नावङपूर्वरूपादिरिति वाच्यम्। पञ्चग-वमित्यत्र लोपः शाकल्यस्येति व-लोपापत्तेरेव दोषत्वात्।

न च लोपः शाकल्यस्येत्यत्रापि पदेऽन्त इति समासोऽस्तु इति वाच्यम्। माभ्यामित्यत्र "हलि सर्वेषाम्" इत्यनेन यलोपार्थमस्मिन्प्रकरणे पदस्यान्त इति षष्ठीतत्पुरुषस्यैवावश्यकत्वात्।

एतेन पञ्चगवमित्यत्र सत्यप्यवङि यस्येति च इत्यलोपान्न दोष इत्यपास्तं वलोपस्यैव दोषत्वात्, इति चेन्न।

स्वघटकत्व - स्वघटकार्थवदव्यवहितपूर्वत्वाभाववत्त्वोभय - संबन्धेन वृत्तिविशिष्टत्वरूपस्यैवोत्तरपदत्वस्य ग्रहणेन टचोऽर्थवत्त्वाभावाद् गोशब्दे उत्तरपदत्वस्यैव सत्वाद्। इति शम्।

श्रीसाधुबेला-संस्कृत-महाविद्यालयः
वाराणसी

नर्मदेश्वर त्रिपाठी
व्याकरण-प्रवक्ता

शारदा-गौरव-ग्रन्थ-माला... ५६

श्रीललिता-त्रिशती-स्तोत्रम् ।

(अष्टोत्तर-त्रिशती-नामावली-सहितम्)

★

संपादकः

पं. वसन्त अनन्त गाडगीळ

★

मूल्यं १-५० रूप्यकम्

प्रकाशक:

पं. वसन्त अनन्त गाडगीळ

शारदा-गौरव-ग्रन्थ-माला

४२५ सदाशिव पेठ, पुण्यपत्तनम् ४११ ०३०

卐

प्रकाशनम्– ललिता-पञ्चमी १८९९

१६ ऑक्टोबर १९७७

卐

सर्वाधिकाराः प्रकाशकायत्ताः

卐

मुद्रक:

पं. वसन्त अनन्त गाडगीळ

श्रीशारदा-मुद्रण-सिद्धि-मन्दिरम्

४२५ सदाशिव पेठ, पुण्यपत्तनम् ३०

यशवन्त-मुद्रणालय:

१८३५ सदाशिव पेठ, पुण्यपत्तनम् ३०

॥ श्रीः ॥

॥ श्रीललिता-त्रिशती-स्तोत्रम् ॥

॥ पूर्वभागः ॥

अगस्त्य उवाच —

हयग्रीव दया-सिन्धो भगवन् शिष्य-वत्सल ।
त्वत्तः श्रुतम् अशेषेण श्रोतव्यं यद् यदस्ति तत् ॥ १
रहस्य-नाम-साहस्रम् अपि त्वत्तः श्रुतं मया ।
इतः परं मे नास्त्येव श्रोतव्यम् इति निश्चयः ॥ २
तथाऽपि मम चितस्य पर्याप्तिर्नैव जायते ।
कार्त्स्न्यार्थः प्राप्य इत्येव शोचयिष्याम्यहं प्रभो ॥ ३
किमिदं कारणं ब्रूहि ज्ञातव्यांशोऽस्ति वा पुनः ।
अस्ति चेन्मम तद् ब्रूहि ब्रूहीत्युक्त्वा प्रणम्य तम् ॥ ४

सूत उवाच —

समालम्बे तत्पाद-युगलं कलशोद्भवः ।
हयाननो भीत-भीतः किमिदं किमिदं त्विति ॥ ५
मुञ्च मुञ्चेति तं चोक्त्वा चिन्ताक्रान्तो बभूव सः ।
चिरं विचार्य निश्चिन्वन् वक्तव्यं न मयेत्यसौ ॥ ६

तूष्णीं स्थितः स्मरन्नाज्ञां ललिताम्बा-कृतां पुरा ।
प्रणम्य विप्रं स मुनिस्तत्-पादावत्यजन् स्थितः ॥ ७

वर्ष-त्रयावधि तदा गुरु-शिष्यौ तथा स्थितौ ।
तच्छृण्वन्तश्च पश्यन्तः सर्वे लोकाः सुविस्मिताः ॥ ८

ततः श्रीललितादेवी कामेश्वर-समन्विता ।
प्रादुर्भूय हयग्रीवं रहस्येवम् अचोदयत् ॥ ९

श्रीदेव्युवाच —

अश्वाननावयोः प्रीतिः शास्त्र-विश्वासिनि त्वयि ।
राज्यं देयं शिरो देयं न देया षोडशाक्षरी ॥ १०

स्वमातृजारवद् गोप्या विद्यैषेत्यागमा जगुः ।
ततोऽतिगोपनीया मे सर्वपूर्तिकरी स्तुतिः ॥ ११

मया कामेश्वरेणापि कृता संगोपिता भृशम् ।
मदाज्ञया वचोदेव्यश्चक्रुर्नाम-सहस्रकम् ॥ १२

आवाभ्यां कथिता मुख्या सर्व-पूर्तिकरी स्तुतिः ।
सर्वक्रियाणां वैकल्यपूर्तिर्यज्जपतो भवेत् ॥ १३

सर्वपूर्तिकरं तस्माद् इदं नाम कृतं मया ।
तद् ब्रूहि त्वम् अगस्त्याय पात्रमेव न संशयः ॥ १४

पत्न्यस्य लोपामुद्राख्या माम् उपास्तेऽतिभक्तितः ।
अयं च नितरां भक्तस्तस्माद् अस्य वदस्व तत् ॥ १५

अमुञ्चमानस्त्वत्पादौ वर्षत्रयमसौ स्थितः ।
एतज्ज्ञातुम् अतो भक्त्या हीदमेव निदर्शनम् ॥ १६

चित्तपर्याप्तिरेतस्य नान्यथा संभविष्यति ।
सर्व-पूर्तिकरं तस्माद् अनुज्ञातो मया वद ॥ १७

सूत उवाच —

इत्युक्त्वाऽन्तरधाद् अम्बा कामेश्वर-समन्विता ।
अथोत्थाप्य हयग्रीवः पाणिभ्यां कुम्भसंभवम् ॥ १८

संस्थाप्य निकटे वाचम् उवाच भृशविस्मितः ।

हयग्रीव उवाच —

कृतार्थोऽसि कृतार्थोऽसि कृतार्थोऽसि घटोद्भव ॥ १९
त्वत्-समो ललिता-भक्तो नास्ति नास्ति जगत्-त्रये ।
येनागस्त्य स्वयं देवी तव वक्तव्यमन्वशात् ॥ २०
सच्छिष्येण त्वया चाहं दृष्टवान् अस्मि तां शिवाम् ।
यतन्ते दर्शनार्थाय ब्रह्म-विष्णवीश-पूर्वकाः ॥ २१
अतः परं ते वक्ष्यामि सर्वपूर्तिकरं स्तवम् ।
यस्य स्मरणमात्रेण पर्याप्तिस्ते भवेद्धृदि ॥ २२
रहस्य-नाम-साहस्राद् अपि गुह्यतमं मुने ।
आवश्यकं ततोप्येतल्ललितां समुपासितुम् ॥ २३
तदहं संप्रवक्ष्यामि ललिताम्बानुशासनात् ।
श्रीमत्-पञ्चदशाक्षर्याः कादि-वर्णान् क्रमान्मुने ॥ २४
पृथग्-विंशति-नामानि कथितानि घटोद्भव ।
आहृत्य नाम्नां त्रिशती सर्व-संपूर्ति-कारिणी ॥ २५
रहस्यातिरहस्यैषा गोपनीया प्रयत्नतः ।
तां शृणुष्व महाभाग सावधानेन चेतसा ॥ २६
केवलं नामबुद्धिस्ते न कार्या तेषु कुम्भज ।
मन्त्रात्मकत्वम् एतेषां नाम्नां नामात्मताऽपि च ॥ २७
तस्माद् एकाग्रमनसा श्रोतव्यं च त्वया सदा ।

सूत उवाच—

इत्युक्त्वा तं हयग्रीवः प्रोचे नाम-शतत्रयम् ॥ २८

॥ श्रीललितात्रिशतीस्तोत्रम् ॥

ककाररूपा कल्याणी कल्याण-गुण-शालिनी ।
कल्याण-शैल-निलया कमनीया कलावती १
कमलाक्षी कल्मषघ्नी करुणामृत-सागरा ।
कदम्ब-काननावासा कदम्ब-कुसुम-प्रिया ॥ २
कंदर्प-विद्या कंदर्प-जनकापाङ्ग-वीक्षणा ।
कर्पूरवीटी-सौरभ्य-कल्लोलित-ककुत्-पटा ॥ ३
कलि-दोष-हरा कञ्ज-लोचना कम्र-विग्रहा ।
कर्मादि-साक्षिणी कारयित्री कर्म-फल-प्रदा ॥ ४
एकार-रूपा चैकाक्षर्येकानेकाक्षराकृतिः ।
एतत्-तदित्यनिर्देश्या चैकानन्दचिदाकृतिः ॥ ५
एवमित्यागमाबोध्या चैकभक्तिमदर्चिता ।
एकाग्र-चित्त-निर्ध्याता चैषणारहितादृता ॥ ६
एला-सुगन्धि-चिकुरा चैनःकूट-विनाशिनी ।
एकभोगा चैकरसा चैकैश्वर्य-प्रदायिनी ॥ ७
एकातपत्र-साम्राज्य-प्रदा चैकान्तपूजिता ।
एधमान-प्रभा चैजदनेक-जगदीश्वरी ॥ ८
एकवीरादि-संसेव्या चैकप्राभव-शालिनी ।
ईकार-रूपा चेशित्री चेप्सितार्थ-प्रदायिनी ॥ ९
ईदृगित्यविनिर्देश्या चेश्वरत्व-विधायिनी ।
ईशानादि-ब्रह्ममयी चेशित्वाद्यष्ट-सिद्धिदा ॥ १०
ईक्षित्री-क्षण-सृष्टाण्ड-कोटिरीश्वर-वल्लभा ।
ईडिता चेश्वरार्धाङ्ग-शरीरेशाधिदेवता ॥ ११
ईश्वर-प्रेरणकरी चेशताण्डव-साक्षिणी ।
ईश्वरोत्सङ्ग-निलया चेति-बाधा-विनाशिनी ॥ १२

ईहा-विरहिता चेशशक्तिर् ईषत्-स्मितानना ।
लकार-रूपा ललिता लक्ष्मी-वाणी-निषेविता ॥ १३
लाकिनी ललनारूपा लसद्-दाडिम-पाटला ।
ललन्तिका-लसत्-फाला ललाट-नयनार्चिता ॥ १४
लक्षणोज्ज्वल-दिव्याङ्गी लक्ष-कोटयण्ड-नायिका ।
लक्ष्यार्था लक्षणागम्या लब्ध-कामा लता-तनुः ॥ १५
ललामराजदलिका लम्बिमुक्तालताञ्चिता ।
लम्बोदर-प्रसूर्लभ्या लज्जाढ्या लय-वर्जिता ॥ १६
ह्रींकार-रूपा ह्रींकार-निलया ह्रींपद-प्रिया ।
ह्रींकार-बीजा ह्रींकार-मन्त्रा ह्रींकार-लक्षणा ॥ १७
ह्रींकार-जप-सुप्रीता ह्रींमती ह्रीं-विभूषणा ।
ह्रीं-शीला ह्रीं-पदाराध्या ह्रीं-गर्भा ह्रीं-पदाभिधा ॥ १८
ह्रींकार-वाच्या ह्रींकार-पूज्या ह्रींकार-पीठिका ।
ह्रींकार-वेद्या ह्रींकार-चिन्त्या ह्रीं ह्रीं-शरीरिणी ॥ १९
हकार-रूपा हलधृक्-पूजिता हरिणेक्षणा ।
हर-प्रिया हराराध्या हरि-ब्रह्मेन्द्र-वन्दिता ॥ २०
हयारूढासेविताङ्घ्रिर्हयमेध-समर्चिता ।
हर्यक्ष-वाहना हंस-वाहना हत-दानवा ॥ २१
हत्यादि-पाप-शमनी हरिदश्वादि-सेविता ।
हस्तिकुम्भोत्तुङ्ग-कुचा हस्ति-कृत्ति-प्रियाङ्गना ॥ २२
हरिद्रा-कुङ्कुमादिग्धा हर्यश्वाद्यमरार्चिता ।
हरिकेश-सखी हादि-विद्या हालामदालसा ॥ २३
सकार-रूपा सर्वज्ञा सर्वेशी सर्वमङ्गला ।
सर्व-कर्त्री सर्व-भर्त्री सर्व-हन्त्री सनातना ॥ २४
सर्वानवद्या सर्वाङ्ग-सुन्दरी सर्व-साक्षिणी ।
सर्वात्मिका सर्व-सौख्य-दात्री सर्व-विमोहिनी ॥ २५
सर्वाधारा सर्व-गता सर्वावगुण-वर्जिता ।
सर्वारुणा सर्व-माता सर्व-भूषण-भूषिता ॥ २६

ककारार्था काल-हन्त्री कामेशी कामितार्थदा ।
काम-संजीविनी कल्या कठिनस्तनमण्डला ॥ २७

करभोरूः कलानाथ-मुखी कच-जिताम्बुदा ।
कटाक्ष-स्यन्दि-करुणा कपालि-प्राणनायिका ॥ २८

कारुण्य-विग्रहा कान्ता कान्ति-धूत-जपावलिः ।
कलालापा कम्बु-कण्ठी कर-निर्जित-पल्लवा ॥ २९

कल्पवल्ली-समभुजा कस्तूरी-तिलकाञ्चिता ।
हकारार्था हंसगतिर्हाटकाभरणोज्ज्वला ॥ ३०

हारहारि-कुचाभोगा हाकिनी हल्यवर्जिता ।
हरित्-पति-समाराध्या हठात्-कार-हतासुरा ॥ ३१

हर्ष-प्रदा हविर्भोक्त्री हार्द-संतमसापहा ।
हल्लीस-लास्य-संतुष्टा हंस-मन्त्रार्थ-रूपिणी ॥ ३२

हानोपादान-निर्मुक्ता हर्षिणी हरिसोदरी ।
हाहा-हूहू-मुख-स्तुत्या हानि-वृद्धि-विवर्जिता ॥ ३३

हैयङ्गवीन-हृदया हरिगोपारुणांशुका ।
लकाराख्या लता-पूज्या लय-स्थित्युद्भवेश्वरी ॥ ३४

लास्य-दर्शन-संतुष्टा लाभालाभ-विवर्जिता ।
लङ्घ्येतराज्ञा लावण्य-शालिनी लघु-सिद्धिदा ॥ ३५

लाक्षारस-सवर्णाभा लक्ष्मणाग्रज-पूजिता ।
लभ्येतरा लब्ध-भक्ति-सुलभा लाङ्गलायुधा ॥ ३६

लग्न-चामर-हस्त-श्री-शारदा-परिवीजिता ।
लज्जापद-समाराध्या लम्पटा लकुलेश्वरी ॥ ३७

लब्धमाना लब्ध-रसा लब्ध-संपत्-समुन्नतिः ।
ह्रींकारिणी ह्रींकाराद्या ह्रींमध्या ह्रींशिखामणिः ॥ ३८

ह्रींकार-कुण्डाग्नि-शिखा ह्रींकार-शशि-चन्द्रिका ।
ह्रींकार-भास्कर-रुचिर्ह्रींकाराम्भोद-चञ्चला ॥ ३९

ह्रींकार-कन्दाङ्कुरिका ह्रींकारैक-परायणा ।
ह्रींकार-दीर्घिका-हंसी ह्रींकारोद्यान-केकिनी ॥ ४०

ह्रींकारारण्य-हरिणी ह्रींकारावाल-वल्लरी ।
ह्रींकार-पञ्जर-शुकी ह्रींकाराङ्गण-दीपिका ॥ ४१

ह्रींकार-कन्दरा-सिंही ह्रींकाराम्भोज-भृङ्गिका ।
ह्रींकार-सुमनोमाध्वी ह्रींकार-तरु-मञ्जरी ॥ ४२

सकाराख्या सम-रसा सकलागम-संस्तुता ।
सर्ववेदान्त-तात्पर्य-भूमिः सदसदाश्रया ॥ ४३

सकला सच्चिदानन्दा साध्या सद्गति-दायिनी ।
सनकादि-मुनि-ध्येया सदाशिव-कुटुम्बिनी ॥ ४४

सकलाधिष्ठान-रूपा सत्य-रूपा समाकृतिः ।
सर्व-प्रपञ्च-निर्मात्री समानाधिक-वर्जिता ॥ ४५

सर्वोत्तुङ्गा संगहीना सगुणा सकलेष्टदा ।
ककारिणी काव्य-लोला कामेश्वर-मनोहरा ॥ ४६

कामेश्वर-प्राणनाडी कामेशोत्संग-वासिनी ।
कामेश्वरालिङ्गिताङ्गी कामेश्वर-सुख-प्रदा ॥ ४७

कामेश्वर-प्रणयिनी कामेश्वर-विलासिनी ।
कामेश्वर-तपःसिद्धिः कामेश्वर-मनःप्रिया ॥ ४८

कामेश्वर-प्राणनाथा कामेश्वर-विमोहिनी ।
कामेश्वर-ब्रह्मविद्या कामेश्वर-गृहेश्वरी ॥ ४९

कामेश्वराह्लादकरी कामेश्वर-महेश्वरी ।
कामेश्वरी कामकोटि-निलया काङ्क्षितार्थदा ॥ ५०

लकारिणी लब्धरूपा लब्धधीर्लब्ध-वाञ्छिता ।
लब्ध-पाप-मनोदूरा लब्धाहंकार-दुर्गमा ॥ ५१

लब्धशक्तिर्लब्धदेहा लब्धैश्वर्य-समुन्नतिः ।
लब्धवृद्धिर्लब्धलीला लब्ध-यौवन-शालिनी ॥ ५२

लब्धातिशय-सर्वाङ्ग-सौन्दर्या लब्ध-विभ्रमा ।
लब्धरागा लब्धपतिर्लब्ध-नानागम-स्थितिः ॥ ५३

लब्ध-भोगा लब्ध-सुखा लब्ध-हर्षाभिपूरिता ।
ह्रींकारमूर्तिर्ह्रींकार-सौध-शृङ्ग-कपोतिका ॥ ५४

ह्रींकार-दुग्धाब्धि-सुधा ह्रींकार-कमलेन्दिरा ।
ह्रींकार-मणि-दीपार्चिर्ह्रींकार-तरु-शारिका ॥ ५५

ह्रींकार-पेटक-मणिर्ह्रींकारादर्श-बिम्बिता ।
ह्रींकार-कोशासि-लता ह्रींकारास्थान-नर्तकी ॥ ५६

ह्रींकार-शुक्तिका-मुक्तामणिर्ह्रींकार-बोधिता ।
ह्रींकारमय-सौवर्ण-स्तम्भ-विद्रुम-पुत्रिका ॥ ५७

ह्रींकार-वेदोपनिषद् ध्रोंकाराध्वर-दक्षिणा ।
ह्रींकार-नन्दनाराम-नव-कल्पक-वल्लरी ॥ ५८

ह्रींकार-हिमवद्-गङ्गा ह्रींकारार्णव-कौस्तुभा ।
ह्रींकार-मन्त्र-सर्वस्वा ह्रींकारपर-सौख्यदा ॥ ५९

—०—

॥ फलश्रुतिः ॥

इत्येवं ते मयाख्यातं देव्या नाम-शत-त्रयम् ।
रहस्यातिरहस्यत्वाद् गोपनीयं त्वया मुने ॥ १

शिववर्णानि नामानि श्रीदेव्या कथितानि हि ।
शक्त्यक्षराणि नामानि कामेश-कथितानि च ॥ २

उभयाक्षर-नामानि हयुभाभ्यां कथितानि वै ।
तदन्यैर्ग्रथितं स्तोत्रम् एतस्य सदृशं किमु ॥ ३

नानेन सदृशं स्तोत्रं श्रीदेवी-प्रीति-दायकम् ।
लोकत्रयेऽपि कल्याणं संभवेन्नात्र संशयः ॥ ४

इति हयमुखगीतं स्तोत्रराजं निशम्य
प्रगलित-कलुषोऽभूच्चित्तपर्याप्तिमेत्य ।
निजगुरुमथ नत्वा कुम्भजन्मा तदुक्तम्
पुनरधिकरहस्यं ज्ञातुमेवं जगाद ॥ ५

अगस्त्य उवाच —

अश्वानन महाभाग रहस्यमपि मे वद ।
शिववर्णानि कान्यत्र शक्तिवर्णानि कानि हि ॥ ६

उभयोरपि वर्णानि कानि वा वद देशिक ।
इति पृष्टः कुम्भजेन हयग्रीवोऽवदत् पुनः ॥ ७

तव गोप्यं किमस्तीह साक्षाद् अम्बानुशासनात् ।
इदं त्वतिरहस्यं ते वक्ष्यामि शृणु कुम्भज ॥ ८

एतद्-विज्ञानमात्रेण श्रीविद्या सिद्धिदा भवेत् ।
क-त्रयं ह-द्वयं चैव शैवो भागः प्रकीर्तितः ॥ ९

शक्त्यक्षराणि शेषाणि ह्रींकार उभयात्मकः ।
एवं विभागम् अज्ञात्वा ये विद्याजपशालिनः ॥ १०

न तेषां सिद्धिदा विद्या कल्पकोटिशतैरपि ।
चतुर्भिः शिव-चक्रैश्च शक्ति-चक्रैश्च पञ्चभिः ॥ ११

नवचक्रैश्च संसिद्धं श्रीचक्रं शिवयोर्वपुः ।
त्रिकोणम् अष्टकोणं च दशकोण-द्वयं तथा ॥ १२

चतुर्दशारं चैतानि शक्ति-चक्राणि पञ्च च ।
बिन्दुश्चाष्टदलं पद्मं पद्मं षोडश-पत्रकम् ॥ १३

चतुरश्रं च चत्वारि शिवचक्राण्यनुक्रमात् ।
त्रिकोणे बैन्दवं श्लिष्टम् अष्टारेऽष्ट-दलाम्बुजम् ॥ १४

दशारयोः षोडशारं भूगृहं भुवनाश्रके ।
शैवानाम् अपि शक्तानां चक्राणां च परस्परम् ॥ १५

अविनाभाव-संबन्धं यो जानाति स चक्रवित् ।
त्रिकोण-रूपिणी शक्तिर्बिन्दुरूपपरः शिवः ॥ १६

अविनाभावसंबन्धस्तस्माद् बिन्दु-त्रिकोणयोः ।
एवं विभागम् अज्ञात्वा श्रीचक्रं यः समर्चयेत् ॥ १७

न तत्फलम् अवाप्नोति ललिताम्बा न तुष्यति ।
ये च जानन्ति लोकेऽस्मिन् श्रीविद्याचक्रवेदिनः ॥ १८

सामान्यवेदिनः सर्वे विशेषज्ञोऽतिदुर्लभः।
स्वयं विद्या-विशेषज्ञो विशेषज्ञं समर्चयेत् ॥ १९

तस्मै देयं ततो ग्राह्यम् अशक्तस्तस्य दापयेत्।
अन्धं तमः प्रविशन्ति येऽविद्यां समुपासते ॥ २०

इति श्रुतिरपाहैतान् अविद्योपासकान् पुनः।
विद्यान्योपासकानेव निन्दत्यारुणिकी श्रुतिः ॥ २१

अश्रुता सश्रुतासश्च यज्वानो येऽप्ययज्वनः।
स्वर्यन्तो नापेक्षन्ते इन्द्रम् अग्निं च ये विदुः ॥ २२

सिकता इव संयन्ति रश्मिभिः समुदीरिताः।
अस्माल्लोकाद् अमुष्माच्चेत्याह चारण्यक-श्रुतिः ॥ २३

यस्य नो पश्चिमं जन्म यदि वा शंकरः स्वयम्।
तेनैव लभ्यते विद्या श्रीमत्-पञ्चदशाक्षरी ॥ २४

इति मन्त्रेषु बहुधा विद्याया महिमोच्यते।
मोक्षैकहेतु-विद्या तु श्रीविद्या नात्र संशयः ॥ २५

न शिल्पादि-ज्ञान-युक्ते विद्वच्छब्दः प्रयुज्यते।
मोक्षैक-हेतु-विद्या सा श्रीविद्यैव न संशयः ॥ २६

तस्माद् विद्याविदेवात्र विद्वान् विद्वान् इतीर्यते।
स्वयं विद्याविदे दद्यात् ख्यापयेत् तद्-गुणान् सुधीः ॥ २७

स्वयं विद्या-रहस्यज्ञो विद्या-माहात्म्य-वेद्यपि।
विद्याविदं नार्चयेच्चेत् को वा तं पूजयेज्जनः ॥ २८

प्रसङ्गाद् इदमुक्तं ते प्रकृतं श्रृणु कुम्भज।
यः कीर्तयेत् सकृद्-भक्त्या दिव्य-नाम-शत-त्रयम् ॥ २९

तस्य पुण्यम् अहं वक्ष्ये श्रृणु त्वं कुम्भसंभव।
रहस्यनाम-साहस्र-पाठे यत् फलमीरितम् ॥ ३०

तत्-फलं कोटि-गुणितम् एक-नामजपाद् भवेत्।
कामेश्वरी-कामेशाभ्यां कृतं नाम-शतत्रयम् ॥ ३१

नान्येन तुलयेद् एतत् स्तोत्रेणान्य-कृतेन च।
श्रियः परंपरा यस्य भावि वा चोत्तरोत्तरम् ॥ ३२

तेनैव लभ्यते चैतत् पश्चाच्छ्रेयः परीक्षयेत् ।
अस्या नाम्नां त्रिशत्यास्तु महिमा केन वर्ण्यते ॥ ३३
या स्वयं शिवयोर्वक्त्रपद्माभ्यां परिनिःसृता ।
नित्यं षोडश-संख्याकान् विप्रान् आदौ तु भोजयेत् ॥ ३४
अभ्यक्तांस्तिलतैलेन स्नातान् उष्णेन वारिणा ।
अभ्यर्च्य गन्ध-पुष्पाद्यैः कामेश्वर्यादि-नामभिः ॥ ३५
सूपापूपैः शर्कराद्यैः पायसैः फल-संयुतैः ।
विद्याविदो विशेषेण भोजयेत् षोडश-द्विजान् ॥ ३६
एवं नित्यार्चनं कुर्याद् आदौ ब्राह्मण-भोजनम् ।
त्रिशती-नामभिः पश्चाद् ब्राह्मणान् क्रमशोऽर्चयेत् ॥ ३७
तैलाभ्यङ्गादिकं दत्वा विभवे सति भक्तितः ।
शुक्ल-प्रतिपदारभ्य पौर्णमास्यवधि क्रमात् ॥ ३८
दिवसे दिवसे विप्रा भोज्या विंशति-संख्यया ।
दशभिः पञ्चभिर्वापि त्रिभिरेकेन वा दिनैः ॥ ३९
त्रिंशत्-षष्टिः शतं विप्राः संभोज्यास्त्रिशतं क्रमात् ।
एवं यः कुरुते भक्त्या जन्ममध्ये सकृन्नरः ॥ ४०
तस्यैव सफलं जन्म मुक्तिस्तस्य करे स्थिरा ।
रहस्यनाम-साहस्रभोजनेऽप्येवमेव हि ॥ ४१
आदौ नित्यबलिं कुर्यात् पश्चाद् ब्राह्मण-भोजनम् ।
रहस्य-नाम-साहस्र-महिमा यो मयोदितः ॥ ४२
स शीकराणुरत्रैकनाम्नो महिम-वारिधेः ।
वाग्देवी-रचिते नाम-साहस्रे यद् यदीरितम् ॥ ४३
तत्फलं कोटि-गुणितं नाम्नोऽप्येकस्य कीर्तनात् ।
एतदन्यैर्जपैः स्तोत्रैरर्चनैर् यत् फलं भवेत् ॥ ४४
तत्फलं कोटिगुणितं भवेन्नामशत-त्रयात् ।
वाग्देवी-रचिते स्तोत्रे तादृशो महिमा यदि ॥ ४५
साक्षात्-कामेश-कामेशीकृतेऽस्मिन् गृह्यताम् इति ।
सकृत्-संकीर्तनाद् एव नाम्नाम् अस्मिञ्शतत्रये ॥ ४६

भवेच्चित्तस्य पर्याप्तिर्नूनम् अन्यानपेक्षिणी ।
न ज्ञातव्यम् इतोऽप्यन्यन्न जप्तव्यं च कुम्भज ।। ४७
यद्यत् साध्यतमं कार्यं तत् तदर्थमिदं जपेत् ।
तत् तत् फलम् अवाप्नोति पश्चात् कार्यं परीक्षयेत् ।। ४८
ये ये प्रयोगास्तन्त्रेषु तैस्तैर्यत् साध्यते फलम् ।
तत्सर्वं सिध्यति क्षिप्रं नाम-त्रिशत-कीर्तनात् ।। ४९
आयुष्करं पुष्टिकरं पुत्रदं वश्य-कारकम् ।
विद्या-प्रदं कीर्ति-करं सुकवित्व-प्रदायकम् ।। ५०
सर्वसंपत्-प्रदं सर्व-भोगदं सर्व-सौख्यदम् ।
सर्वाभीष्ट-प्रदं चैव देव्या नामशत-त्रयम् ।। ५१
एतज्जपपरो भूयान्नान्यद् इच्छेत् कदाचन ।
एतत्-कीर्तन-संतुष्टा श्रीदेवी ललिताम्बिका ।। ५२
भक्तस्य यद्यद् इष्टं स्यात् तत् तत् पूरयते ध्रुवम् ।
तस्मात् कुम्भोद्भवमुने कीर्तय त्वम् इदं सदा ।। ५३
नापरं किंचिदपि ते बोद्धव्यम् अवशिष्यते ।
इति ते कथितं स्तोत्रं ललिता-प्रीतिदायकम् ।। ५४
नाविद्यावेदिने ब्रूयान्नाभक्ताय कदाचन ।
न शठाय न दुष्टाय नाविश्वासाय कर्हिचित् ।। ५५
यो ब्रूयात् त्रिशतीं नाम्नां तस्यानर्थो महान् भवेत् ।
इत्याज्ञा शांकरी प्रोक्ता तस्माद् गोप्यम् इदं त्वया ।। ५६
ललिता-प्रेरितेनैव मयोक्तं स्तोत्रमुत्तमम् ।
रहस्य-नाम-साहस्रादपि गोप्यम् इदं मुने ।। ५७
एवम् उक्त्वा हयग्रीवः कुम्भजं तापसोत्तमम् ।
स्तोत्रेणानेन ललितां स्तुत्वा त्रिपुरसुन्दरीम् ।
आनन्दलहरी-मग्न-मानसः समवर्तत ।। ५८

इति श्रीललिता-त्रिशती-स्तोत्रं संपूर्णम् ।

॥ श्रीललिता-त्रिशती-नामावली ॥

ॐ ककाररूपायै नमः
कल्याण्यै नमः
कल्याणगुणशालिन्यै नमः
कल्याणशैलनिलयायै नमः
कमनीयायै नमः
कलावत्यै नमः
कमलाक्ष्यै नमः
कल्मषघ्न्यै नमः
करुणामृतसागरायै नमः
कदम्बकाननावासायै नमः १०
कदम्बकुसुमप्रियायै नमः
कन्दर्पविद्यायै नमः
कन्दर्पजनकापाङ्गवीक्षणायै नमः
कर्पूर-वीटीसौरभ्य-कल्लोलितककुप्तटायै नमः
कलिदोषहरायै नमः
कञ्जलोचनायै नमः
कम्रविग्रहायै नमः
कर्मादिसाक्षिण्यै नमः
कारयित्र्यै नमः
कर्मफलप्रदायै नमः २०
एकाररूपायै नमः
एकाक्षर्यै नमः
एकानेकाक्षराकृतये नमः
एतत्तदित्यनिर्देश्यायै नमः
एकानन्दचिदाकृतये नमः

ॐ एवमित्यागमाबोध्यायै नमः
एकभक्तिमदर्चितायै नमः
एकाग्रचित्तनिर्ध्यातायै नमः
एषणारहितादृतायै नमः ३०
एलासुगन्धिचिकुरायै नमः
एनःकूटविनाशिन्यै नमः
एकभोगायै नमः
एकरसायै नमः
एकैश्वर्यप्रदायिन्यै नमः
एकातपत्रसाम्राज्यप्रदायै नमः
एकान्तपूजितायै नमः
एधमानप्रभायै नमः
एजदनेकजगदीश्वर्यै नमः
एकवीरादिसंसेव्यायै नमः ४०
एकप्राभवशालिन्यै नमः
ईकाररूपायै नमः
ईशित्र्यै नमः
ईप्सितार्थप्रदायिन्यै नमः
ईदृगित्यविनिर्देश्यायै नमः
ईश्वरत्वविधायिन्यै नमः
ईशानादिब्रह्ममय्यै नमः
ईशित्वाद्यष्टसिद्धिदायै नमः
ईक्षित्र्यै नमः
ईक्षणसृष्टाण्डकोटये नमः
ईश्वरवल्लभायै नमः ५०
ईडितायै नमः
ईश्वरार्धाङ्गशरीरायै नमः

ॐ ईशाधिदेवतायै नमः
ईश्वरप्रेरणकर्यै नमः
ईशताण्डवसाक्षिण्यै नमः
ईश्वरोत्सङ्गनिलयायै नमः
ईतिबाधाविनाशिन्यै नमः
ईहाविरहितायै नमः
ईशशक्तये नमः
ईषत्-स्मिताननायै नमः ६०
लकाररूपायै नमः
ललितायै नमः
लक्ष्मीवाणीनिषेवितायै नमः
लाकिन्यै नमः
ललनारूपायै नमः
लसद्दाडिमपाटलायै नमः
ललन्तिकालसत्फालायै नमः
ललाटनयनार्चितायै नमः
लक्षणोज्ज्वलदिव्याङ्ग्यै नमः
लक्षकोट्यण्डनायिकायै नमः
७०
लक्ष्यार्थायै नमः
लक्षणागम्यायै नमः
लब्धकामायै नमः
लतातनवे नमः
ललामराजदलिकायै नमः
लम्बिमुक्तालताञ्चितायै नमः
लम्बोदरप्रसवे नमः
लभ्यायै नमः
लज्जाढ्यायै नमः
लयवर्जितायै नमः ८०
ह्रींकाररूपायै नमः

ॐ ह्रींकारनिलयायै नमः
ह्रींपदप्रियायै नमः
ह्रींकारबीजायै नमः
ह्रींकारमन्त्रायै नमः
ह्रींकारलक्षणायै नमः
ह्रींकारजपसुप्रीतायै नमः
ह्रींमत्यै नमः
ह्रींविभूषणायै नमः
ह्रींशीलायै नमः ९०
ह्रींपदाराध्यायै नमः
ह्रींगर्भायै नमः
ह्रींपदाभिधायै नमः
ह्रींकारवाच्यायै नमः
ह्रींकारपूज्यायै नमः
ह्रींकारपीठिकायै नमः
ह्रींकारवेद्यायै नमः
ह्रींकारचिन्त्यायै नमः
ह्रीं नमः
ह्रींशरीरिण्यै नमः १००
हकाररूपायै नमः
हलधृक्पूजितायै नमः
हरिणेक्षणायै नमः
हरप्रियायै नमः
हराराध्यायै नमः
हरिब्रह्मेन्द्रवन्दितायै नमः
हयारूढासेविताङ्घ्र्यै नमः
हयमेधसमर्चितायै नमः
हर्यक्षवाहनायै नमः
हंसवाहनायै नमः ११०
हतदानवायै नमः

ॐ हृत्यादिपापशमन्यै नमः
हरिदश्वादिसेवितायै नमः
हस्तिकुम्भोत्तुङ्गकुचायै नमः
हस्तिकृत्तिप्रियाङ्गनायै नमः
हरिद्राकुङ्कुमादिग्धायै नमः
हर्यश्वाद्यमरार्चितायै नमः
हरिकेशसख्यै नमः
हादिविद्यायै नमः
हालामदालसायै नमः १२०
सकाररूपायै नमः
सर्वज्ञायै नमः
सर्वेश्यै नमः
सर्वमङ्गलायै नमः
सर्वकर्त्र्यै नमः
सर्वभर्त्र्यै नमः
सर्वहन्त्र्यै नमः
सनातनायै नमः
सर्वानवद्यायै नमः
सर्वाङ्गसुन्दर्यै नमः १३०
सर्वसाक्षिण्यै नमः
सर्वात्मिकायै नमः
सर्वसौख्यदात्र्यै नमः
सर्वविमोहिन्यै नमः
सर्वाधारायै नमः
सर्वगतायै नमः
सर्वावगुणवर्जितायै नमः
सर्वारुणायै नमः
सर्वमात्रे नमः
सर्वभूषणभूषितायै नमः १४०
ककारार्थायै नमः

ॐ कालहन्त्र्यै नमः
कामेश्यै नमः
कामितार्थदायै नमः
कामसंजीवन्यै नमः
कल्यायै नमः
कठिनस्तनमण्डलायै नमः
करभोरवे नमः
कलानाथमुख्यै नमः
कचजिताम्बुदायै नमः १५०
कटाक्षस्यन्दिकरुणायै नमः
कपालिप्राणनायिकायै नमः
कारुण्यविग्रहायै नमः
कान्तायै नमः
कान्तिधूतजपावल्यै नमः
कलालापायै नमः
कम्बुकण्ठ्यै नमः
करनिर्जितपल्लवायै नमः
कल्पवल्लीसमभुजायै नमः
कस्तूरीतिलकाञ्चितायै नमः
१६०
हकारार्थायै नमः
हंसगत्यै नमः
हाटकाभरणोज्ज्वलायै नमः
हारहारिकुचाभोगायै नमः
हाकिन्यै नमः
हल्यवर्जितायै नमः
हरित्पतिसमाराध्यायै नमः
हठात्कारहतासुरायै नमः
हर्षप्रदायै नमः
हविर्भोक्त्र्यै नमः १७०

ॐ हार्दसंतमसापहायै नमः
हल्लीसलास्यसंतुष्टायै नमः
हंसमन्त्रार्थरूपिण्यै नमः
हानोपादाननिर्मुक्तायै नमः
हर्षिण्यै नमः
हरिसोदर्यै नमः
हाहाहूहूमुखस्तुत्यायै नमः
हानिवृद्धिविवर्जितायै नमः
हैयङ्गवीनहृदयायै नमः
हरिगोपारुणांशुकायै नमः १८०
लकाराख्यायै नमः
लतापूज्यायै नमः
लयस्थित्युद्भवेश्वर्यै नमः
लास्यदर्शनसंतुष्टायै नमः
लाभालाभविवर्जितायै नमः
लङ्घ्येतराज्ञायै नमः
लावण्यशालिन्यै नमः
लघुसिद्धिदायै नमः
लाक्षारससवर्णाभायै नमः
लक्ष्मणाग्रजपूजितायै नमः १९०
लभ्येतरायै नमः
लब्धभक्तिसुलभायै नमः
लाङ्गलायुधायै नमः
लग्नचामरहस्तश्रीशारदा-
परिवीजितायै नमः
लज्जापदसमाराध्यायै नमः
लम्पटायै नमः
लकुलेश्वर्यै नमः

ॐ लब्धमानायै नमः
लब्धरसायै नमः
लब्धसंपत्समुन्नत्यै नमः २००
ह्रींकारिण्यै नमः
ह्रींकाराद्यायै नमः
ह्रींमध्यायै नमः
ह्रींशिखामणये नमः
ह्रींकारकुण्डाग्निशिखायै नमः
ह्रींकारशशिचन्द्रिकायै नमः
ह्रींकारभास्कररुचये नमः
ह्रींकाराम्भोद-चञ्चलायै नमः
ह्रींकारकन्दाङ्कुरिकायै नमः
ह्रींकारैकपरायणायै नमः २१०
ह्रींकारदीर्घिकाहंस्यै नमः
ह्रींकारोद्यानकेकिन्यै नमः
ह्रींकारारण्यहरिण्यै नमः
ह्रींकारावालवल्लर्यै नमः
ह्रींकारपञ्जरशुक्यै नमः
ह्रींकाराङ्गणदीपिकायै नमः
ह्रींकारकन्दरासिंह्यै नमः
ह्रींकाराम्भोजभृङ्गिकायै नमः
ह्रींकारसुमनोमाध्व्यै नमः
ह्रींकारतरुमञ्जर्यै नमः २२०
सकाराख्यायै नमः
समरसायै नमः
सकलागमसंस्तुतायै नमः
सर्ववेदान्ततात्पर्यभूमये नमः
सदसदाश्रयायै नमः
सकलायै नमः

ॐ सच्चिदानन्दायै नमः
साध्यायै नमः
सद्गतिदायिन्यै नमः
सनकादिमुनिध्येयायै नमः २३०
सदाशिवकुटुम्बिन्यै नमः
सकलाधिष्ठानरूपायै नमः
सत्यरूपायै नमः
समाकृतये नमः
सर्वप्रपञ्चनिर्मात्र्यै नमः
समानाधिकवर्जितायै नमः
सर्वोत्तुङ्गायै नमः
सङ्गहीनायै नमः
सगुणायै नमः
सकलेष्टदायै नमः २४०
ककारिण्यै नमः
काव्यलोलायै नमः
कामेश्वरमनोहरायै नमः
कामेश्वरप्राणनाड्यै नमः
कामेशोत्सङ्गवासिन्यै नमः
कामेश्वरालिङ्गिताङ्ग्यै नमः
कामेश्वरसुखप्रदायै नमः
कामेश्वरप्रणयिन्यै नमः
कामेश्वरविलासिन्यै नमः
कामेश्वरतपःसिद्ध्यै नमः २५०
कामेश्वरमनःप्रियायै नमः
कामेश्वरप्राणनाथायै नमः
कामेश्वरविमोहिन्यै नमः
कामेश्वरब्रह्मविद्यायै नमः
कामेश्वरगृहेश्वर्यै नमः

ॐ कामेश्वराह्लादकर्यै नमः
कामेश्वरमहेश्वर्यै नमः
कामेश्वर्यै नमः
कामकोटिनिलयायै नमः
काङ्क्षितार्थदायै नमः २६०
लकारिण्यै नमः
लब्धरूपायै नमः
लब्धधिये नमः
लब्धवाञ्छितायै नमः
लब्धपापमनोदूरायै नमः
लब्धाहंकारदुर्गमायै नमः
लब्धशक्त्यै नमः
लब्धदेहायै नमः
लब्धैश्वर्यसमुन्नत्यै नमः
लब्धवृद्ध्यै नमः २७०
लब्धलीलायै नमः
लब्धयौवनशालिन्यै नमः
लब्धातिशयसर्वाङ्ग-सौन्दर्यायै नमः
लब्धविभ्रमायै नमः
लब्धरागायै नमः
लब्धपतये नमः
लब्धनानागमस्थित्यै नमः
लब्धभोगायै नमः
लब्धसुखायै नमः
लब्धहर्षाभिपूरितायै नमः २८०
ह्रींकारमूर्त्यै नमः
ह्रींकारसौधशृङ्ग-कपोतिकायै नमः

ॐ ह्रींकारदुग्धाब्धिसुधायै नमः
ह्रींकारकमलेन्दिरायै नमः
ह्रींकारमणिदीपार्चिषे नमः
ह्रींकारतरुशारिकायै नमः
ह्रींकारपेटकमणये नमः
ह्रींकारादर्शबिम्बितायै नमः
ह्रींकारकोशासिलतायै नमः
ह्रींकारास्थाननर्तक्यै नमः
२९०
ह्रींकार-शुक्तिका-
मुक्तामणये नमः

ॐ ह्रींकारबोधितायै नमः
ह्रींकारमयसौवर्णस्तम्भ-
विद्रुमपुत्रिकायै नमः
ह्रींकारवेदोपनिषदे नमः
ह्रींकाराध्वरदक्षिणायै नमः
ह्रींकारनन्दनाराम-
नवकल्पकवल्लर्यै नमः
ह्रींकारहिमवद्गङ्गायै नमः
ह्रींकारार्णवकौस्तुभायै नमः
ह्रींकारमन्त्रसर्वस्वायै नमः
ह्रींकारपरसौख्यदायै नमः
३००

इति श्रीललितात्रिशतीनामावलिः संपूर्णा ॥

॥ श्रीः ॥

॥ श्रीललिताऽष्टोत्तरशत-नामावलिः ॥

१ रजताचल-शृङ्गाग्र-मध्यस्थायै नमो नमः
२ हिमाचल-महावंशपावनायै नमो नमः
३ शङ्करार्धाङ्गसौन्दर्य-शरीरायै नमो नमः
४ लसन्-मरकत-स्वच्छ-विग्रहायै नमो नमः
५ महातिशय-सौन्दर्य-लावण्यायै नमो नमः
६ शशाङ्क-शेखर-प्राण-वल्लभायै नमो नमः
७ सदा पञ्चदशात्मैक्य-स्वरूपायै नमो नमः
८ वज्र-माणिक्य-कटक-किरीटायै नमो नमः
९ कस्तूरी-तिलकोल्लासि-निटिलायै नमो नमः
१० भस्म-रेखाङ्कित-लसन्-मस्तकायै नमो नमः
११ विकचाम्भोरुह-दल-लोचनायै नमो नमः
१२ शरच्चाम्पेय-पुष्पाभ-नासिकायै नमो नमः
१३ लसत्-कनक-ताटङ्क-युगलायै नमो नमः
१४ मणि-दर्पण-संकाश- कपोलायै नमो नमः
१५ ताम्बूल-पूरित-स्मेर-वदनायै नमो नमः
१६ सुपक्व-दाडिमी-बीज-रदनायै नमो नमः
१७ कम्बु-पूग-सम-च्छाय-कन्धरायै नमो नमः
१८ स्थूल-मुक्ताफलोदार-सुहारायै नमो नमः
१९ गिरीश-बद्ध-माङ्गल्य-मङ्गलायै नमो नमः
२० पद्म-पाशाङ्कुश-लसत्-कराब्जायै नमो नमः
२१ पद्म-कैरव-मन्दार-सुमालिन्यै नमो नमः
२२ सुवर्ण-कुम्भ-युग्माभ-सुकुचायै नमो नमः
२३ रमणीय-चतुर्बाहु-संयुक्तायै नमो नमः
२४ कनकाङ्गद-केयूर-भूषितायै नमो नमः
२५ बृहत्-सौवर्ण-सौन्दर्य-वसनायै नमो नमः
२६ बृहन्नितम्ब-विलसज्जघनायै नमो नमः

२७ सौभाग्य-जात-शृङ्गार-मध्यमायै नमो नमः
२८ दिव्य-भूषण-संदोह-रञ्जितायै नमो नमः
२९ पारिजात-गुणाधिक्य-पदाब्जायै नमो नमः
३० सुपद्म-राग-संकाश-चरणायै नमो नमः
३१ कामकोटि-महापद्म-पीठस्थायै नमो नमः
३२ श्रीकण्ठ-नेत्र-कुमुद-चन्द्रिकायै नमो नमः
३३ सचामर-रमा-वाणी-वीजितायै नमो नमः
३४ भक्त-रक्षण-दाक्षिण्य-कटाक्षायै नमो नमः
३५ भूतेशालिङ्गनोद्भूत-पुलकाङ्ग्यै नमो नमः
३६ अनङ्ग-जनकापाङ्ग-वीक्षणायै नमो नमः
३७ ब्रह्मोपेन्द्र-शिरोरत्न-रञ्जितायै नमो नमः
३८ शची-मुख्यामर-वधू-सेवितायै नमो नमः
३९ लीला-कल्पित-ब्रह्माण्ड-मण्डलायै नमो नमः
४० अमृतादि-महाशक्ति-संवृतायै नमो नमः
४१ एकातपत्र-साम्राज्य-दायिकायै नमो नमः
४२ सनकादि-समाराध्य-पादुकायै नमो नमः
४३ कलशोद्भव-दूर्वास-पूजितायै नमो नमः
४४ देवर्षिभिःस्तूयमान-वैभवायै नमो नमः
४५ मत्तेभ-वक्त्र-षड्वक्त्र-वत्सलायै नमो नमः
४६ चक्रराज-महायन्त्र-मध्यवर्त्यै नमो नमः
४७ चिदग्नि-कुण्ड-संभूत-सुदेहायै नमो नमः
४८ शशाङ्क-खण्ड-संयुक्त-मकुटायै नमो नमः
४९ मत्तहंस-वधू-मन्द-गमनायै नमो नमः
५० वन्दारु-जन-संदोह-वन्दितायै नमो नमः
५१ अन्तर्मुख-जनानन्द-फलदायै नमो नमः
५२ पतिव्रताङ्गनाभीष्ट-फलदायै नमो नमः
५३ अव्याज-करुणा-पूर-पूरितायै नमो नमः
५४ निरञ्जन-चिदानन्द-संयुक्तायै नमो नमः
५५ सहस्र-सूर्य-संयुक्त-प्रकाशायै नमो नमः
५६ रत्न-चिन्तामणि-गृह-मध्यस्थायै नमो नमः

५७ ह्रानि-वृद्धि-गुणाधिक्य-रहितायै नमो नमः
५८ महापद्माटवी-मध्य-निवासायै नमो नमः
५९ जाग्रत्-स्वप्न-सुषुप्तीनां साक्षिभूत्यै नमो नमः
६० महातापौघ-पापानां विनाशिन्यै नमो नमः
६१ दुष्ट-भीति-महाभीति-भञ्जनायै नमो नमः
६२ समस्त-देव-दनुज-प्रेरकायै नमो नमः
६३ समस्त-हृदयाम्भोज-निलयायै नमो नमः
६४ अनाहत-महापद्म-मन्दिरायै नमो नमः
६५ सहस्रार-सरोजात-वासितायै नमो नमः
६६ पुनरावृत्ति-रहित-पुरस्थायै नमो नमः
६७ वाणी-गायत्री-सावित्री-संनुतायै नमो नमः
६८ नीला-रमा-भू-संपूज्य-पादाब्जायै नमो नमः
६९ लोपामुद्रार्चित-श्रीमच्चरणायै नमो नमः
७० सहस्र-रति-सौन्दर्य-शरीरायै नमो नमः
७१ भावना-मात्र-संतुष्ट-हृदयायै नमो नमः
७२ नत-संपूर्ण-विज्ञान-सिद्धिदायै नमो नमः
७३ त्रिलोचन-कृतोल्लास-फलदायै नमो नमः
७४ श्रीसुधाब्धि-मणि-द्वीप-मध्यगायै नमो नमः
७५ दक्षाध्वर-विनिर्भेद-साधनायै नमो नमः
७६ श्रीनाथ-सोदरीभूत-शोभितायै नमो नमः
७७ चन्द्रशेखर-भक्तार्ति-भञ्जनायै नमो नमः
७८ सर्वोपाधि-विनिर्मुक्त-चैतन्यायै नमो नमः
७९ नाम-पारायणाभीष्ट-फलदायै नमो नमः
८० सृष्टि-स्थिति-तिरोधान-संकल्पायै नमो नमः
८१ श्रीषोडशाक्षरी-मन्त्र-मध्यगायै नमो नमः
८२ अनाद्यन्त-स्वयंभूत-दिव्यमूर्त्यै नमो नमः
८३ भक्त-हंसवती-मुख्य-नियोगायै नमो नमः
८४ मातृमण्डल-संयुक्त-ललितायै नमो नमः
८५ भण्ड-दैत्य-महासत्त्व-नाशनायै नमो नमः
८६ क्रूर-भण्ड-शिरच्छेद-निपुणायै नमो नमः

८७ धराच्युत-सुराधीश-सुखदायै नमो नमः
८८ चण्ड-मुण्ड-निशुम्भादि-खण्डनायै नमो नमः
८९ रक्ताक्ष-रक्त-जिह्वादि-शिक्षणायै नमो नमः
९० महिषासुर-दोर्वीर्य-निग्रहायै नमो नमः
९१ अभ्रकेश-महोत्साह-कारणायै नमो नमः
९२ महेश-युक्त-नटन-तत्परायै नमो नमः
९३ निजभर्तृ-मुखाम्भोज-चिन्तनायै नमो नमः
९४ वृषभध्वज-विज्ञान-तपःसिद्धयै नमो नमः
९५ काम-क्रोधादि-षड्वर्ग-नाशनायै नमो नमः
९६ जन्म-मृत्यु-जरा-रोग-भञ्जनायै नमो नमः
९७ विरक्ति-भक्ति-विज्ञान-सिद्धिदायै नमो नमः
९८ राजराजार्चित-पद-सरोजायै नमो नमः
९९ सर्व-वेदान्त-सिद्धान्त-सुतत्त्वायै नमो नमः
१०० श्रीवीरभक्त-विज्ञान-निदानायै नमो नमः
१०१ अशेष-दुष्ट-दनुज-सूदनायै नमो नमः
१०२ साक्षात्-श्रीदक्षिणामूर्ति-मनोज्ञायै नमो नमः
१०३ हयमेधाग्र-संपूज्य-महिमायै नमो नमः
१०४ दक्ष-प्रजापति-सुता-वेषाढ्यायै नमो नमः
१०५ सुम-बाणेक्षु-कोदण्ड-मण्डितायै नमो नमः
१०६ नित्य-यौवन-माङ्गल्य-मङ्गलायै नमो नमः
१०७ महादेव-समायुक्त-महादेव्यै नमो नमः
१०८ चतुर्विंशति-तत्त्वैक-स्वरूपायै नमो नमः

इति श्रीललिताष्टोत्तरशतनामावलिः संपूर्णा ॥

शारदा-गौरव-ग्रन्थ-माला...क्र. ५७

श्रीललिता-सहस्रनाम-स्तोत्रम् ।

(ना मा व ली - स हि त म्)

☆

संपादकः

पं. वसन्त अनन्त गाडगीळ

★

दीपावली १९७७

मूल्यं रूप्यक-त्रयम्

प्रकाशकः
पं. वसन्त अनन्त गाडगीळ
शारदा-गौरव-ग्रन्थ-माला
४२५ सदाशिव पेठ, पुण्यपत्तनम् ४११ ०३०

卐

प्रकाशनम्– दीपावली १९७७

卐

सर्वाधिकाराः प्रकाशकायत्ताः

卐

मुद्रकः
पं. वसन्त अनन्त गाडगीळ
श्रीशारदा-मुद्रण-सिद्धि-मन्दिरम्
४२५ सदाशिव पेठ, पुण्यपत्तनम् ३०
यशवन्त-मुद्रणालयः
१८३५ सदाशिव पेठ, पुण्यपत्तनम् ३०

॥ श्रीः ॥

श्रीललितामहात्रिपुरसुन्दर्यै नमः ।

॥ श्रीललिता-सहस्र-नाम पूर्वभागः ॥

अगस्त्य उवाच —

अश्वानन महाबुद्धे सर्व-शास्त्र-विशारद ।
कथितं ललितादेव्याश्चरितं परमाद्भुतम् ॥ १

पूर्वं प्रादुर्भवो मातुस्ततः पट्टाभिषेचनम् ।
भण्डासुरवधश्चैव विस्तरेण त्वयोदितः ॥ २

वर्णितं श्रीपुरं चापि महाविभव-विस्तरम् ।
श्रीमत्-पञ्चदशाक्षर्या महिमा वर्णितस्तथा ॥ ३
षोढा-न्यासादयो न्यासा न्यासखण्डे समीरिताः ॥ ४
अन्तर्यागक्रमश्चैव बहिर्यागक्रमस्तथा ।
महायागक्रमश्चैव पूजाखण्डे प्रकीर्तितः ॥ ५

पुरश्चरणखण्डे तु जप-लक्षणमीरितम् ।
होमखण्डे त्वया प्रोक्तो होम-द्रव्य-विधि-क्रमः ॥ ६

चक्रराजस्य विद्यायाः श्रीदेव्या देशिकात्मनोः ।
रहस्यखण्डे तादात्म्यं परस्परमुदीरितम् ॥
स्तोत्रखण्डे बहुविधाः स्तुतयः परिकीर्तिताः ॥ ७
मन्त्रिणी-दण्डिनी-देव्योः प्रोक्ते नाम-सहस्रके ।
न तु श्रीललितादेव्याः प्रोक्तं नाम-सहस्रकम् ॥ ८

तत्र मे संशयो जातो हयग्रीव दयानिधे ।
किं वा त्वया विस्मृतं तज्ज्ञात्वा वा समुपेक्षितम् ॥ ९

मम वा योग्यता नास्ति श्रोतुं नाम-सहस्रकम् ।
किमर्थं भवता नोक्तं तत्र मे कारणं वद ॥ १०

सूत उवाच —

इति पृष्टो हयग्रीवो मुनिना कुम्भजन्मना ।
प्रहृष्टो वचनं प्राह तापसं कुम्भसंभवम् ।। ११

हयग्रीव उवाच —

लोपामुद्रापतेऽगस्त्य सावधान-मनाः शृणु ।
नाम्नां सहस्रं यन्नोक्तं कारणं तद् वदामि ते ।। १२
रहस्यमिति मत्वाहं नोक्तवाँस्ते न चान्यथा ।
पुनश्च पृच्छसे भक्त्या तस्मात् तत्ते वदाम्यहम् ।। १३
ब्रूयात् शिष्याय भक्ताय रहस्यमपि देशिकः ।
भवता न प्रदेयं स्याद् अभक्ताय कदाचन ।। १४
न शठाय न दुष्टाय नाविश्वासाय कर्हिचित् ।
श्रीमातृभक्ति-युक्ताय श्रीविद्याराजवेदिने ।। १५
उपासकाय शुद्धाय देयं नाम-सहस्रकम् ।
यानि नामसहस्राणि सद्यःसिद्धि-प्रदानि वै ।। १६
तन्त्रेषु ललितादेव्यास्तेषु मुख्यम् इदं मुने ।
श्रीविद्यैव तु मन्त्राणां तत्र कादिर्यथा परा ।। १७
पुराणां श्रीपुरमिव शक्तीनां ललिता यथा ।
श्रीविद्योपासकानां च यथा देवो वरः शिवः ।। १८
तथा नामसहस्राणां वरम् एतत् प्रकीर्तितम् । १९
यथास्य पठनाद् देवी प्रीयते ललिताम्बिका ।।
अन्य-नाम-सहस्रस्य पाठान्न प्रीयते तथा ।
श्रीमातुः प्रीतये तस्माद् अनिशं कीर्तयेद् इदम् ।। २०
बिल्वपत्रैश्चक्रराजे योऽर्चयेल्ललिताम्बिकाम् ।
पद्मैर्वा तुलसी-पत्रैरेभिर्नामसहस्रकैः ।। २१
सद्यः प्रसादं कुरुते तस्य सिंहासनेश्वरी ।
चक्राधिराजम् अभ्यर्च्य जप्त्वा पञ्चदशाक्षरीम् ।। २२
जपान्ते कीर्तयेन्नित्यम् इदम् नाम-सहस्रकम् ।
जप-पूजाद्यशक्तोऽपि पठेन्नाम सहस्रकम् ।। २३

साङ्गार्चनै साङ्गजपे यत् फलं तद् अवाप्नुयात् ।
उपासने स्तुतीरन्याः पठेद् अभ्युदयो हि सः ॥ २४

इदं नामसहस्रं तु कीर्तयेन्नित्य-कर्मवत् ।
चक्रराजार्चनं विद्याजपो नाम्नां च कीर्तनम् ॥ २५

भक्तस्य कृत्यमेतावद् अन्यद् अभ्युदयं विदुः ।
भक्तस्यावश्यकमिदं नाम-साहस्र-कीर्तनम् ॥ २६

तत्र हेतुं प्रवक्ष्यामि शृणु त्वं कुम्भसंभव ।
पुरा श्रीललितादेवी भक्तानां हितकाम्यया ॥ २७

वाग्देवीर्वशिनी-मुख्याः समाहूयेदमब्रवीत् ।
वाग्देवतावशिन्याद्याः शृणुध्वं वचनं मम ॥ २८

भवत्यो मत्प्रसादेन प्रोल्लसद्-वाग्-विभूतयः ।
मद्-भक्तानां वाग्-विभूति-प्रदाने विनियोजिताः ॥ २९

मच्चक्रस्य रहस्यज्ञा मम नाम-परायणाः ।
मम स्तोत्र-विधानाय तस्माद् आज्ञापयामि वः ॥ ३०

कुरुध्वम् अङ्कितं स्तोत्रं मम नाम-सहस्रकैः ।
येन भक्तैः स्तुताया मे सद्यः प्रीतिः परा भवेत् ॥ ३१

हयग्रीव उवाच —

इत्याज्ञप्ता वचोदेव्यो देव्या श्रीललिताम्बया ।
रहस्यैर्नामभिर्दिव्यैश्चक्रुः स्तोत्रम् अनुत्तमम् ॥ ३२

रहस्य-नाम-साहस्रम् इति तद् विश्रुतं परम् ।
ततः कदाचित् सदसि स्थित्वा सिंहासनेऽम्बिका ॥ ३३

स्वसेवावसरं प्रादात् सर्वेषां कुम्भसंभव ।
सेवार्थम् आगतास्तत्र ब्रह्माणी-ब्रह्मकोटयः ॥ ३४

लक्ष्मी-नारायणानां च कोटयः समुपागताः ।
गौरी-कोटि-समेतानां रुद्राणाम् अपि कोटयः ॥ ३५

मन्त्रिणी-दण्डिनी-मुख्याः सेवार्थं याः समागताः ।
शक्तयो विविधाकारास्तासां संख्या न विद्यते ॥ ३६

दिव्यौघा मानवौघाश्च सिद्धौघाश्च समागताः ।
तत्र श्रीललितादेवी सर्वेषां दर्शनं ददौ ॥ ३७

तेषु दृष्ट्वोपविष्टेषु स्वे स्वे स्थाने यथाक्रमम् ।
तत्र श्रीललितादेवी-कटाक्षाक्षेपनोदिताः ॥ ३८

उत्थाय वशिनीमुख्या बद्धाञ्जलिपुटास्तदा ।
अस्तुवन् नामसाहस्रैः स्वकृतैर्ललिताम्बिकाम् ॥ ३९

श्रुत्वा स्तवं प्रसन्नाभूत् ललिता परमेश्वरी ।
ते सर्वे विस्मयं जग्मुर्ये तत्र सदसि स्थिताः ॥ ४०

ततः प्रोवाच ललिता सदस्यान् देवतागणान् ।
ममाज्ञयैव वाग्देव्यश्चक्रुः स्तोत्रम् अनुत्तमम् ॥ ४१

अङ्कितं नामभिर्दिव्यैर्मम प्रीति-विधायकैः ॥ ४२

तत् पठध्वं सदा यूयं स्तोत्रं मत्-प्रीति-वृद्धये ।
प्रवर्तयध्वं भक्तेषु मम नाम-सहस्रकम् ॥ ४३

इदं नाम-सहस्रं मे यो भक्तः पठते सकृत् ।
स मे प्रियतमो ज्ञेयस्तस्मै कामान् ददाम्यहम् ॥ ४४

श्रीचक्रे मां समभ्यर्च्य जप्त्वा पञ्चदशाक्षरीम् ।
पश्चान्नामसहस्रं मे कीर्तयेन्मम तुष्टये ॥ ४५

माम् अर्चयतु वा मा वा विद्यां जपतु वा न वा ।
कीर्तयेन्नामसाहस्रम् इदं मत्प्रीतये सदा ॥ ४६

मत्-प्रीत्या सकलान् कामाँल्लभते नात्र संशयः ।
तस्मान्नामसहस्रं मे कीर्तयध्वं सदादरात् ॥ ४७

हयग्रीव उवाच —

इति श्रीललितेशानी शास्ति देवान् सहानुगान् ॥ ४८

तदाज्ञया तदारभ्य ब्रह्म-विष्णु-महेश्वराः ।
शक्तयो मन्त्रिणीमुख्या इदं नाम-सहस्रकम् ॥ ४९

पठन्ति भक्त्या सततं ललिता-परितुष्टये ।
तस्मादवश्यं भक्तेन कीर्तनीयम् इदं मुने ॥ ५०

आवश्यकत्वे हेतुत्वे मया प्रोक्तो मुनीश्वर ।
इदानीं नामसाहस्रं वक्ष्यामि श्रद्धया शृणु ॥ ५१

॥ इति श्रीललितासहस्रनाम-पूर्वभागो नाम प्रथमोऽध्यायः ॥

॥ न्यासः ॥

अस्य श्रीललितासहस्रनामस्तोत्रमालामन्त्रस्य
वशिन्यादिवाग्देवता ऋषयः । अनुष्टुप् छन्दः ।
श्रीललितापरमेश्वरी देवता । श्रीमद्-वाग्भवकूटेति बीजम् ।
मध्यकूटेति शक्तिः । शक्तिकूटेति कीलकम् ।
श्रीललितामहात्रिपुरसुन्दरी-प्रसाद-सिद्धिद्वारा
चिन्तितफलावाप्त्यर्थे जपे विनियोगः ।

मूलमन्त्रेण करषडङ्गन्यासान् कृत्वा

॥ ध्यानम् ॥

सिन्दूरारुण-विग्रहां त्रि-नयनां माणिक्य-मौलिस्फुरत्-
तारानायक-शेखरां स्मित-मुखीमापीनवक्षोरुहाम् ।
पाणिभ्यामलिपूर्णरत्नचषकं रक्तोत्पलं बिभ्रतीं
सौम्यां रत्नघटस्थरक्तचरणां ध्यायेत् पराम् अम्बिकाम्

लमित्यादि-पञ्चपूजां कुर्यात् ।

॥ श्रीः ॥

॥ श्रीललितासहस्त्रनामस्तोत्रम् ॥

श्रीमाता श्रीमहाराज्ञी श्रीमत्-सिंहासनेश्वरी ।
चिदग्नि-कुण्ड-संभूता देव-कार्य-समुद्यता ॥ १
उद्यद्-भानु-सहस्राभा चतुर्बाहु-समन्विता ।
राग-स्वरूप-पाशाढ्या क्रोधाकाराङ्कुशोज्ज्वला ॥ २
मनोरूपेक्षु-कोदण्डा पञ्च-तन्मात्र-सायका ।
निजारुण-प्रभा-पूर-मज्जद्-ब्रह्माण्ड-मण्डला ॥ ३
चम्पकाशोक-पुन्नाग-सौगन्धिक-लसत्-कचा ।
कुरुविन्द-मणि-श्रेणी-कनत्-कोटीर-मण्डिता ॥ ४
अष्टमी-चन्द्र-विभ्राजद्-अलिक-स्थल-शोभिता ।
मुख-चन्द्र-कलङ्काभ- मृगनाभि-विशेषका ॥ ५
वदन-स्मर-माङ्गल्य-गृह-तोरण-चिल्लिका ।
वक्त्रलक्ष्मी-परीवाह-चलन्-मीनाभ-लोचना ॥ ६
नवचम्पक-पुष्पाभ-नास-दण्ड-विराजिता ।
तारा-कान्ति-तिरस्कारि-नासाभरण-भासुरा ॥ ७
कदम्ब-मञ्जरी-क्लृप्त-कर्ण-पूर-मनोहरा ।
ताटङ्क युगलीभूत-तपनोडुप-मण्डला ॥ ८
पद्मराग-शिलादर्श-परिभावि-कपोलभूः ।
नव-विद्रुम-बिम्बश्री-न्यक्कारि-दशनच्छदा ॥ ९
शुद्ध-विद्याङ्कुराकार-द्विज-पङ्क्ति-द्वयोज्ज्वला ।
कर्पूर-वीटिकामोद-समाकर्षि-दिगन्तरा ॥ १०
निज-संलाप-माधुर्य-विनिर्भर्त्सित-कच्छपी ।
मन्द-स्मित-प्रभा-पूर-मज्जत्-कामेश-मानसा ॥ ११
अनाकलित-सादृश्य-चुबुक-श्री-विराजिता ।
कामेश-बद्ध-माङ्गल्य-सूत्र-शोभित-कन्धरा ॥ १२

कनकाङ्गद-केयूर-कमनीय-भुजान्विता ।
रत्न-ग्रैवेय-चिन्ताक-लोल-मुक्ता-फलान्विता ॥ १३

कामेश्वर-प्रेम-रत्न-मणि-प्रतिपणस्तनी ।
नाभ्यालवाल-रोमालि-लता-फल-कुचद्वयी ॥ १४

लक्ष्य-रोम-लताधारता-समुन्नेय-मध्यमा ।
स्तन-भार-दलन्-मध्य-पट्ट-बन्ध-वलि-त्रया ॥ १५

अरुणारुण-कौसुम्भ-वस्त्र-भास्वत्-कटी-तटी ।
रत्न-किङ्किणिका-रम्य-रशना-दाम-भूषिता ॥ १६

कामेश-ज्ञात-सौभाग्य-मार्दवोरु-द्वयान्विता ।
माणिक्य-मकुटाकार-जानु-द्वय-विराजिता ॥ १७

इन्द्र-गोप-परिक्षिप्त-स्मर-तूणाभ-जङ्घिका ।
गूढ-गुल्फा कूर्म-पृष्ठ-जयिष्णु-प्रपदान्विता ॥ १८

नख-दीधिति-संछन्न-नमज्जन-तमोगुणा ।
पद-द्वय-प्रभाजाल-पराकृत-सरोरुहा ॥ १९

शिञ्जान-मणि-मञ्जीर-मण्डित-श्री-पदाम्बुजा ।
मराली-मन्द-गमना महालावण्य-शेवधिः ॥ २०

सर्वारुणानवद्याङ्गी सर्वाभरण-भूषिता ।
शिव-कामेश्वराङ्कस्था शिवा स्वाधीन-वल्लभा ॥ २१

सुमेरु-मध्य-शृङ्गस्था श्रीमन्नगरनायिका ।
चिन्तामणि-गृहान्तस्था पञ्च-ब्रह्मासन-स्थिता ॥ २२

महापद्माटवी-संस्था कदम्ब-वन-वासिनी ।
सुधा-सागर-मध्यस्था कामाक्षी काम-दायिनी ॥ २३

देवर्षि-गण-संघात-स्तूयमानात्मवैभवा ।
भण्डासुर-वधोद्युक्त-शक्ति-सेना-समन्विता ॥ २४

संपत्-करी-समारूढ-सिन्धुर-व्रज-सेविता ।
अश्वारूढाधिष्ठिताश्व-कोटि-कोटिभिरावृता २५

चक्रराज-रथारूढ-सर्वायुध-परिष्कृता ।
गेय-चक्र-रथारूढ-मन्त्रिणी-परिसेविता ॥ २६

किरि-चक्र-रथारूढ-दण्ड-नाथ-पुरस्कृता ।
ज्वाला-मालिनिकाक्षिप्त-वह्नि-प्राकार-मध्यगा ॥ २७

भण्ड-सैन्य-वधोद्युक्त-शक्ति-विक्रम-हर्षिता ।
नित्यापराक्रमाटोप-निरीक्षण-समुत्सुका ॥ २८

भण्ड-पुत्र-वधोद्युक्त-बाला-विक्रम-नन्दिता ।
मन्त्रिण्यम्बा-विरचित-विषङ्ग-वध-तोषिता ॥ २९

विशुक्र-प्राण-हरण-वाराही-वीर्य-नन्दिता ।
कामेश्वर-मुखालोक-कल्पित-श्री-गणेश्वरा ॥ ३०

महागणेश-निर्भिन्न-विघ्न-यन्त्र-प्रहर्षिता ।
भण्डासुरेन्द्र-निर्मुक्त-शस्त्र-प्रत्यस्त्र-वर्षिणी ॥ ३१

कराङ्गुलि-नखोत्पन्न-नारायणदशाकृतिः ।
महापाशुपतास्त्राग्नि-निर्दग्धासुर-सैनिका ॥ ३२

कामेश्वरास्त्र-निर्दग्ध-सभण्डासुर-शून्यका ।
ब्रह्मोपेन्द्र-महेन्द्रादि-देव-संस्तुत-वैभवा ॥ ३३

हर-नेत्राग्नि-संदग्ध-काम-संजीवनौषधिः ।
श्रीमद्-वाग्भव-कूटैक-स्वरूप-मुख-पङ्कजा ॥ ३४

कण्ठाधःकटि-पर्यन्त-मध्य-कूट-स्वरूपिणी ।
शक्तिकूटैकतापन्न-कट्यधोभाग-धारिणी ॥ ३५

मूल-मन्त्रात्मिका मूल-कूट-त्रय-कलेवरा ।
कुलामृतैकरसिका कुल-संकेत-पालिनी ॥ ३६

कुलाङ्गना कुलान्तस्था कौलिनी कुलयोगिनी ।
अकुला समयान्तस्था समयाचार-तत्परा ॥ ३७

मूलाधारैक-निलया ब्रह्म-ग्रन्थि-विभेदिनी ।
मणिपूरान्तरुदिता विष्णु-ग्रन्थि-विभेदिनी ॥ ३८

आज्ञा-चक्रान्तरालस्था रुद्र-ग्रन्थि-विभेदिनी ।
सहस्राराम्बुजारूढा सुधा-साराभिवर्षिणी ॥ ३९

तडिल्लतासमरुचिः षट्चक्रोपरि संस्थिता ।
महासक्तिः कुण्डलिनी बिसतन्तु-तनीयसी ॥ ४०

भवानी भावनागम्या भवारण्य-कुठारिका ।
भद्र-प्रिया भद्रमूर्तिर्भक्त-सौभाग्य-दायिनी ॥ ४१
भक्तिप्रिया भक्तिगम्या भक्तिवश्या भयापहा ।
शांभवी शारदाराध्या शर्वाणी शर्मदायिनी ॥ ४२
शांकरी श्रीकरी साध्वी शरच्चन्द्र-निभानना
शातोदरी शान्तिमती निराधारा निरञ्जना ॥ ४३
निर्लेपा निर्मला नित्या निराकारा निराकुला ।
निर्गुणा निष्कला शान्ता निष्कामा निरुपप्लवा ॥ ४४
नित्यमुक्ता निर्विकारा निष्प्रपञ्चा निराश्रया ।
नित्यशुद्धा नित्यबुद्धा निरवद्या निरन्तरा ॥ ४५
निष्कारणा निष्कलङ्का निरुपाधिर्निरीश्वरा ।
नीरागा राग-मथनी निर्मदा मद-नाशिनी ॥ ४६
निश्चिन्ता निरहंकारा निर्मोहा मोह-नाशिनी ।
निर्ममा ममता-हन्त्री निष्पापा पाप-नाशिनी ॥ ४७
निष्क्रोधा क्रोध-शमनी निर्लोभा लोभ-नाशिनी ।
निःसंशया संशयघ्नी निर्भवा भव-नाशिनी ॥ ४८
निर्विकल्पा निराबाधा निर्भेदा भेद-नाशिनी ।
निर्नाशा मृत्यु-मथनी निष्क्रिया निष्परिग्रहा ॥ ४९
निस्तुला नील-चिकुरा निरपाया निरत्यया ।
दुर्लभा दुर्गमा दुर्गा दुःखहन्त्री सुखप्रदा ॥ ५०
दुष्ट-दूरा दुराचार-शमनी दोष-वर्जिता ।
सर्वज्ञा सान्द्र-करुणा समानाधिक-वर्जिता ॥ ५१
सर्वशक्तिमयी सर्व-मङ्गला सद्-गतिप्रदा ।
सर्वेश्वरी सर्वमयी सर्व-मन्त्र-स्वरूपिणी ॥ ५२
सर्वयन्त्रात्मिका सर्वतन्त्र-रूपा मनोन्मनी ।
माहेश्वरी महादेवी महालक्ष्मीर्मृडप्रिया ॥ ५३
महारूपा महापूज्या महापातक-नाशिनी ।
महामाया महासत्त्वा महाशक्तिर्महारतिः ॥ ५४

महाभोगा महैश्वर्या महावीर्या महाबला ।
महाबुद्धिर्महासिद्धिर्महायोगेश्वरेश्वरी ॥ ५५

महातन्त्रा महामन्त्रा महायन्त्रा महासना ।
महायागक्रमाराध्या महाभैरव-पूजिता ॥ ५६

महेश्वर-महाकल्प-महाताण्डव-साक्षिणी ।
महाकामेश-महिषी महात्रिपुरसुन्दरी ॥ ५७

चतुःषट्युपचाराढ्या चतुःषष्टि-कलामयी ।
महाचतुःषष्टि-कोटि-योगिनी-गण-सेविता ॥ ५८

मनुविद्या चन्द्र-विद्या चन्द्र-मण्डल-मध्यगा ।
चारु-रूपा चारु-हासा चारु-चन्द्र-कलाधरा ॥ ५९

चराचर-जगन्नाथा चक्र-राज-निकेतना ।
पार्वती पद्मनयना पद्मराग-सम-प्रभा ॥ ६०

पञ्च-प्रेतासनासीना पञ्च-ब्रह्म-स्वरूपिणी ।
चिन्मयी परमानन्दा विज्ञान-घन-रूपिणी ॥ ६१

ध्यान-ध्यातृ-ध्येय-रूपा धर्माधर्म-विवर्जिता ।
विश्वरूपा जागरिणी स्वपन्ती तैजसात्मिका ॥ ६२

सुप्ता प्राज्ञात्मिका तुर्या सर्वावस्था-विवर्जिता ।
सृष्टि-कर्त्री ब्रह्म-रूपा गोप्त्री गोविन्द-रूपिणी ॥ ६३

संहारिणी रुद्र-रूपा तिरोधान-करीश्वरी ।
सदाशिवानुग्रहदा पञ्चकृत्य-परायणा ॥ ६४

भानु-मण्डल-मध्यस्था भैरवी भग-मालिनी ।
पद्मासना भगवती पद्मनाभ-सहोदरी ॥ ६५

उन्मेष-निमिषोत्पन्न-विपन्न-भुवनावली ।
सहस्र-शीर्ष-वदना सहस्राक्षी सहस्रपात् ॥ ६६

आब्रह्म-कीट-जननी वर्णाश्रम-विधायिनी ।
निजाज्ञा-रूप-निगमा पुण्यापुण्य-फल-प्रदा ॥ ६७

श्रुति-सीमन्त-सिन्दूरीकृत-पादाब्ज-धूलिका ।
सकलागम-संदोह-शुक्ति-संपुट-मौक्तिका ॥ ६८

पुरुषार्थप्रदा पूर्णा भोगिनी भुवनेश्वरी ।
अम्बिकाऽनादि-निधना हरि-ब्रह्मेन्द्र-सेविता ॥ ६९
नारायणी नाद-रूपा नाम-रूप-विवर्जिता ।
ह्रींकारी ह्रीमती हृद्या हेयोपादेय-वर्जिता ॥ ७०
राजराजार्चिता राज्ञी रम्या राजीव-लोचना ।
रञ्जनी रमणी रस्या रणत्-किङ्किणि-मेखला ॥ ७१
रमा राकेन्दु-वदना रति-रूपा रति-प्रिया ।
रक्षाकरी राक्षसघ्नी रामा रमण-लम्पटा ॥ ७२
काम्या काम-कला-रूपा कदम्ब-कुसुम-प्रिया ।
कल्याणी जगतीकन्दा करुणा-रस-सागरा । ७३
कलावती कलालापा कान्ता कादम्बरी-प्रिया ।
वरदा वाम-नयना वारुणी-मद-विह्वला ॥ ७४
विश्वाधिका वेद-वेद्या विन्ध्याचल-निवासिनी ।
विधात्री वेद-जननी विष्णु-माया-विलासिनी ॥ ७५
क्षेत्र-स्वरूपा क्षेत्रेशी क्षेत्र-क्षेत्रज्ञ-पालिनी ।
क्षय-वृद्धि-विनिर्मुक्ता क्षेत्रपाल-समर्चिता ॥ ७६
विजया विमला वन्द्या वन्दारु-जन-वत्सला ।
वाग्-वादिनी वामकेशी वह्निमण्डल-वासिनी ॥ ७७
भक्तिमत्-कल्पलतिका पशुपाश-विमोचिनी ।
संहृताशेष-पाषण्डा सदाचार-प्रवर्तिका ॥ ७८
तापत्रयाग्नि-संतप्त-समाह्लादन-चन्द्रिका ।
तरुणी तापसाराध्या तनुमध्या तमोऽपहा ॥ ७९
चितिस्तत्पदलक्ष्यार्था चिदेक-रस-रूपिणी ।
स्वात्मानन्द-लवीभूत-ब्रह्माद्यानन्द-संततिः ॥ ८०
परा प्रत्यक्चितीरूपा पश्यन्ती परदेवता ।
मध्यमा वैखरीरूपा भक्त-मानस-हंसिका ॥ ८१
कामेश्वर-प्राण-नाडी कृतज्ञा काम-पूजिता ।
शृङ्गार-रस-संपूर्णा जया जालन्धर-स्थिता ॥ ८२

ओड्याण-पीठ-निलया बिन्दु-मण्डल-वासिनी ।
रहोयाग-क्रमाराध्या रहस्तर्पण-तर्पिता ।। ८३

सद्यःप्रसादिनी विश्व-साक्षिणी साक्षि-वर्जिता ।
षडङ्ग-देवता-युक्ता षाड्गुण्य-परिपूरिता ।। ८४

नित्यक्लिन्ना निरुपमा निर्वाण-सुख-दायिनी ।
नित्याषोडशिकारूपा श्रीकण्ठार्ध-शरीरिणी ।। ८५

प्रभावती प्रभारूपा प्रसिद्धा परमेश्वरी ।
मूलप्रकृतिरव्यक्ता व्यक्ताव्यक्त-स्वरूपिणी ।। ८६

व्यापिनी विविधाकारा विद्याविद्या-स्वरूपिणी ।
महाकामेश-नयन-कुमुदाह्लाद-कौमुदी ।। ८७

भक्त-हार्द-तमोभेद-भानुमद्-भानु-संततिः ।
शिवदूती शिवाराध्या शिवमूर्तिः शिवंकरी ।। ८८

शिवप्रिया शिवपरा शिष्टेष्टा शिष्ट-पूजिता ।
अप्रमेया स्वप्रकाशा मनोवाचाम् अगोचरा ।। ८९

चिच्छक्तिश्चेतना-रूपा जडशक्तिर्जडात्मिका ।
गायत्री व्याहृतिः सन्ध्या द्विज-वृन्द-निषेविता ।। ९०

तत्त्वासना तत्त्वमयी पञ्चकोशान्तरस्थिता ।
निःसीम-महिमा नित्य-यौवना मदशालिनी ।। ९१

मद-घूर्णित-रक्ताक्षी मद-पाटल-गण्डभूः ।
चन्दन-द्रव-दिग्धाङ्गी चाम्पेय-कुसुम-प्रिया ।। ९२

कुशला कोमलाकारा कुरुकुल्ला कुलेश्वरी ।
कुलकुण्डालया कौल-मार्ग-तत्पर-सेविता ।। ९३

कुमार-गण-नाथाम्बा तुष्टिः पुष्टिर्मतिर्धृतिः ।
शान्तिः स्वस्तिमती कान्तिर्नन्दिनी विघ्न-नाशिनी ।। ९४

तेजोवती त्रिनयना लोलाक्षी-काम-रूपिणी ।
मालिनी हंसिनी माता मलयाचल-वासिनी ।। ९५

सुमुखी नलिनी सुभ्रूः शोभना सुरनायिका ।
कालकण्ठी कान्तिमती क्षोभिणी सूक्ष्म-रूपिणी ।। ९६

वज्रेश्वरी वामदेवी वयोऽवस्था-विवर्जिता ।
सिद्धेश्वरी सिद्धविद्या सिद्धमाता यशस्विनी ।। ९७
विशुद्धि-चक्र-निलयाऽऽरक्त-वर्णा त्रिलोचना ।
खट्वाङ्गादि-प्रहरणा वदनैक-समन्विता ।। ९८
पायसान्न-प्रिया त्वक्स्था पशुलोक-भयंकरी ।
अमृतादि-महाशक्ति-संवृता डाकिनीश्वरी ।। ९९
अनाहताब्ज-निलया श्यामाभा वदन-द्वया ।
दंष्ट्रोज्ज्वलाक्षमालादि-धरा रुधिर-संस्थिता ।। १००
कालरात्र्यादि-शक्त्यौघ-वृता स्निग्धौदन-प्रिया ।
महावीरेन्द्र-वरदा राकिण्यम्बास्वरूपिणी ।। १०१
मणिपूराब्ज-निलया वदन-त्रय-संयुता ।
वज्रादिकायुधोपेता डामर्यादिभिरावृता ।। १०२
रक्तवर्णा मांसनिष्ठा गुडान्न-प्रीत-मानसा ।
समस्त-भक्त-सुखदा लाकिन्यम्बा-स्वरूपिणी ।। १०३
स्वाधिष्ठानाम्बुज-गता चतुर्वक्त्रमनोहरा ।
शूलाद्यायुध-संपन्ना पीतवर्णातिगर्विता ।। १०४
मेदोनिष्ठा मधुप्रीता बन्दिन्यादि-समन्विता ।
दध्यन्नासक्त-हृदया काकिनी-रूप-धारिणी ।। १०५
मूलाधाराम्बुजारूढा पञ्चवक्त्रास्थि-संस्थिता ।
अंकुशादि-प्रहरणा वरदादि-निषेविता ।। १०६
मुद्गौदनासक्त-चित्ता साकिन्यम्बास्वरूपिणी ।
आज्ञाचक्राब्ज-निलया शुक्लवर्णा षडानना ।। १०७
मज्जा-संस्था हंसवती मुख्य-शक्ति-समन्विता ।
हरिद्रान्नैकरसिका हाकिनी-रूप-धारिणी ।। १०८
सहस्र-दल-पद्मस्था सर्ववर्णोपशोभिता ।
सर्वायुध-धरा शुक्ल-संस्थिता सर्वतोमुखी ।। १०९
सर्वौदन-प्रीत-चित्ता याकिन्यम्बास्वरूपिणी ।
स्वाहा स्वधामतिर्मेधा श्रुतिः स्मृतिरनुत्तमा ।। ११०

पुण्यकीर्तिः पुण्य-लभ्या पुण्य-श्रवण-कीर्तना ।
पुलोमजार्चिता बन्ध-मोचनी बन्धुरालका ॥ १११
विमर्श-रूपिणी विद्या वियदादि-जगत्-प्रसूः ।
सर्व-व्याधि-प्रशमनी सर्व-मृत्यु-निवारिणी ॥ ११२
अग्रगण्याऽचिन्त्य-रूपा कलि-कल्मष-नाशिनी ।
कात्यायनी काल-हन्त्री कमलाक्ष-निषेविता ॥ ११३
ताम्बूल-पूरित-मुखी दाडिमी-कुसुम-प्रभा ।
मृगाक्षी मोहिनी मुख्या मृडानी मित्र-रूपिणी ॥ ११४
नित्य-तृप्ता भक्तनिधिर्नियन्त्री निखिलेश्वरी ॥
मैत्र्यादि-वासना-लभ्या महाप्रलय-साक्षिणी ॥ ११५
पराशक्तिः परा निष्ठा प्रज्ञान-घन-रूपिणी ।
माध्वी-पानालसा मत्ता मातृका-वर्ण-रूपिणी ॥ ११६
महाकैलास-निलया मृणाल-मृदु-दोर्लता ।
महनीया दयामूर्तिर्महासाम्राज्य-शालिनी ॥ ११७
आत्मविद्या महाविद्या श्रीविद्या कामसेविता ।
श्रीषोडशाक्षरी-विद्या त्रिकूटा काम-कोटिका ॥ ११८
कटाक्ष-किङ्करीभूत-कमला-कोटि-सेविता ।
शिरःस्थिता चन्द्र-निभा भालस्थेन्द्रधनुःप्रभा ॥ ११९
हृदयस्था रवि-प्रख्या त्रिकोणान्तर-दीपिका ।
दाक्षायणी दैत्य-हन्त्री दक्ष-यज्ञ-विनाशिनी ॥ १२०
दरान्दोलित-दीर्घाक्षी दरहासोज्ज्वलन्मुखी ।
गुरुमूर्तिर्गुणनिधिर्गोमाता गुह-जन्मभूः ॥ १२१
देवेशी दण्ड-नीतिस्था दहराकाश-रूपिणी ।
प्रतिपन्मुख्य-राकान्त-तिथि-मण्डल-पूजिता ॥ १२२
कलात्मिका कलानाथा काव्यालाप-विनोदिनी ।
सचामर-रमा-वाणी-सव्य-दक्षिण-सेविता ॥ १२३
आदिशक्तिरमेयात्मा परमा पावनाकृतिः ।
अनेक-कोटि-ब्रह्माण्ड-जननी दिव्य-विग्रहा ॥ १२४

क्लींकारी केवला गुह्या कैवल्य-पद-दायिनी ।
त्रिपुरा त्रिजगद्-वन्द्या त्रिमूर्तिस्त्रिदशेश्वरी ॥ १२५
त्र्यक्षरी दिव्य-गन्धाढ्या सिन्दूर-तिलकाञ्चिता ।
उमा शैलेन्द्र-तनया गौरी गन्धर्व-सेविता ॥ १२६
विश्वगर्भा स्वर्णगर्भाऽवरदा वागधीश्वरी ।
ध्यानगम्याऽपरिच्छेद्या ज्ञानदा ज्ञान-विग्रहा ॥ १२७
सर्व-वेदान्त-संवेद्या सत्यानन्द-स्वरूपिणी ।
लोपामुद्रार्चिता लीला-क्लृप्त-ब्रह्माण्ड-मण्डला ॥ १२८
अदृश्या दृश्यरहिता विज्ञात्री वेद्यवर्जिता ।
योगिनी योगदा योग्या योगानन्द-युगन्धरा ॥ १२९
इच्छाशक्ति-ज्ञानशक्ति-क्रियाशक्ति-स्वरूपिणी ।
सर्वाधारा सुप्रतिष्ठा सदसद्रूप-धारिणी ॥ १३०
अष्टमूर्तिर् अजा जैत्री लोकयात्रा-विधायिनी ।
एकाकिनी भूमरूपा निर्द्वैता द्वैत-वर्जिता ॥ १३१
अन्नदा वसुधा वृद्धा ब्रह्मात्म्यैक्य-स्वरूपिणी ।
बृहती ब्राह्मणी ब्राह्मी ब्रह्मानन्दा बलिप्रिया ॥ १३२
भाषा-रूपा बृहत्-सेना भावाभाव-विवर्जिता ।
सुखाराध्या शुभकरी शोभना-सुलभा-गतिः ॥ १३३
राजराजेश्वरी राज्य-दायिनी राज्य-वल्लभा ।
राजत्-कृपा राजपीठ-निवेशित-निजाश्रिता ॥ १३४
राज्य-लक्ष्मीः कोशनाथा चतुरङ्ग-बलेश्वरी ।
साम्राज्य-दायिनी सत्य-सन्धा सागर-मेखला ॥ १३५
दीक्षिता दैत्य-शमनी सर्वलोक-वशंकरी ।
सर्वार्थ-दात्री सावित्री सच्चिदानन्द-रूपिणी ॥ १३६
देश-कालापरिच्छिन्ना सर्वगा सर्वमोहिनी ।
सरस्वती शास्त्रमयी गुहाम्बा गुह्य-रूपिणी ॥ १३७
सर्वोपाधि-विनिर्मुक्ता सदाशिव-पतिव्रता ।
संप्रदायेश्वरी साध्वी गुरु-मण्डल-रूपिणी ॥ १३८

कुलोत्तीर्णा भगाराध्या माया मधुमती मही ।
गणाम्बा गुह्यकाराध्या कोमलाङ्गी गुरुप्रिया ।। १३९

स्वतन्त्रा सर्व-तन्त्रेशी दक्षिणामूर्ति-रूपिणी ।
सनकादि-समाराध्या शिव-ज्ञान-प्रदायिनी ।। १४०

चित्-कलानन्द-कलिका प्रेमरूपा प्रियंकरी ।
नाम-पारायण-प्रीता नन्दि-विद्या नटेश्वरी ।। १४१

मिथ्या-जगदधिष्ठाना मुक्तिदा मुक्ति-रूपिणी ।
लास्य-प्रिया लय-करी लज्जा रम्भादि-वन्दिता ।। १४२

भव-दाव-सुधा-वृष्टिः पापारण्य-दवानला ।
दौर्भाग्य-तूल-वातूला जरा-ध्वान्त-रवि-प्रभा ।। १४३

भाग्याब्धि-चन्द्रिका भक्त-चित्त-केकि-घनाघना ।
रोग-पर्वत-दम्भोलिर्मृत्यु-दारु-कुठारिका ।। १४४

महेश्वरी महाकाली महाग्रासा महाशना ।
अपर्णा चण्डिका चण्ड-मुण्डासुर-निषूदिनी ।। १४५

क्षराक्षरात्मिका सर्वलोकेशी विश्वधारिणी ।
त्रिवर्गदात्री सुभगा त्र्यम्बका त्रिगुणात्मिका ।। १४६

स्वर्गापवर्गदा शुद्धा जपा-पुष्प-निभाकृतिः ।
ओजोवती द्युति-धरा यज्ञ-रूपा प्रियव्रता ।। १४७

दुराराध्या दुराधर्षा पाटली-कुसुम-प्रिया ।
महती मेरु-निलया मन्दार-कुसुम-प्रिया ।। १४८

वीराराध्या विराड्-रूपा विरजा विश्वतोमुखी ।
प्रत्यग्-रूपा पराकाशा प्राणदा प्राण-रूपिणी ।। १४९

मार्तण्ड-भैरवाराध्या मन्त्रिणी-न्यस्त-राज्य-धूः ।
त्रिपुरेशी जयत्सेना निस्त्रैगुण्या परापरा ।। १५०

सत्यज्ञानानन्दरूपा सामरस्य-परायणा ।
कपर्दिनी कलामाला कामधुक् कामरूपिणी ।। १५१

कलानिधिः काव्यकला रसज्ञा रस-शेवधिः ।
पुष्टा पुरातना पूज्या पुष्करा पुष्करेक्षणा ।। १५२

परं ज्योतिः परं धाम परमाणुः परात्परा ।
पाश-हस्ता पाश-हन्त्री परमन्त्र-विभेदिनी ॥ १५३
मूर्ताऽमूर्ताऽनित्य-तृप्ता मुनिमानस-हंसिका ।
सत्यव्रता सत्यरूपा सर्वान्तर्यामिनी सती ॥ १५४
ब्रह्माणी ब्रह्म-जननी बहुरूपा बुधार्चिता ।
प्रसवित्री प्रचण्डाज्ञा प्रतिष्ठा प्रकटाकृतिः ॥ १५५
प्राणेश्वरी प्राणदात्री पञ्चाशत्-पीठ-रूपिणी ।
विशृङ्खला विविक्तस्था वीर-माता वियत्-प्रसूः ॥ १५६
मुकुन्दा मुक्ति-निलया मूल-विग्रह-रूपिणी ।
भावज्ञा भव-रोग-घ्नी भव-चक्र-प्रवर्तिनी ॥ १५७
छन्दःसारा शास्त्रसारा मन्त्रसारा तलोदरी ।
उदार-कीर्तिर्-उद्दाम-वैभवा वर्ण-रूपिणी ॥ १५८
जन्म-मृत्यु-जरा-तप्त-जन-विश्रान्ति-दायिनी ।
सर्वोपनिषदुद्घुष्टा शान्त्यतीत-कलात्मिका ॥ १५९
गम्भीरा गगनान्तस्था गर्विता गान-लोलुपा ।
कल्पना-रहिता काष्ठाऽकान्ता कान्तार्ध-विग्रहा ॥ १६०
कार्यकारण-निर्मुक्ता काम-केलि-तरङ्गिता ।
कनत्-कनक-ताटङ्का लीला-विग्रह-धारिणी ॥ १६१
अजा क्षय-विनिर्मुक्ता मुग्धा क्षिप्र-प्रसादिनी ।
अन्तर्मुख-समाराध्या बहिर्मुख-सुदुर्लभा ॥ १६२
त्रयी त्रिवर्ग-निलया त्रिस्था त्रिपुर-मालिनी ।
निरामया निरालम्बा स्वात्मारामा सुधा-सृतिः ॥ १६३
संसार-पङ्क-निर्मग्न-समुद्धरण-पण्डिता ।
यज्ञप्रिया यज्ञकर्त्री यजमान-स्वरूपिणी ॥ १६४
धर्माधारा धनाध्यक्षा धन-धान्य-विवर्धिनी ।
विप्र-प्रिया विप्र-रूपा विश्व-भ्रमण-कारिणी ॥ १६५
विश्व-ग्रासा विद्रुमाभा वैष्णवी विष्णु-रूपिणी ।
अयोनिर्-योनि-निलया कूटस्था कुल-रूपिणी ॥ १६६

वीर-गोष्ठी-प्रिया वीरा नैष्कर्म्या नाद-रूपिणी ।
विज्ञान-कलना कल्या विदग्धा बैन्दवासना ॥ १६७
तत्त्वाधिका तत्त्वमयी तत्त्वमर्थ-स्वरूपिणी ।
साम-गान-प्रिया सौम्या सदाशिव-कुटुम्बिनी ॥ १६८
सव्यापसव्य-मार्गस्था सर्वापद्-विनिवारिणी ।
स्वस्था स्वभाव-मधुरा धीरा धीर-समर्चिता ॥ १६९
चैतन्यार्घ्य-समाराध्या चैतन्य-कुसुम-प्रिया ।
सदोदिता सदा-तुष्टा तरुणादित्य-पाटला ॥ १७०
दक्षिणादक्षिणाराध्या दर-स्मेर-मुखाम्बुजा ।
कौलिनी-केवलाऽनर्घ्यकैवल्य-पद-दायिनी ॥ १७१
स्तोत्र-प्रिया स्तुतिमती श्रुति-संस्तुत-वैभवा ।
मनस्विनी मानवती महेशी मङ्गलाकृतिः ॥ १७२
विश्व-माता जगद्-धात्री विशालाक्षी विरागिणी ।
प्रगल्भा परमोदारा परामोदा मनोमयी ॥ १७३
व्योमकेशी विमानस्था वज्रिणी वामकेश्वरी ।
पञ्च-यज्ञ-प्रिया पञ्च-प्रेतमञ्चाधिशायिनी ॥ १७४
पञ्चमी पञ्चभूतेशी पञ्च-संख्योपचारिणी ।
शाश्वती शाश्वतैश्वर्या शर्मदा शंभु-मोहिनी ॥ १७५
धराधर-सुता धन्या धर्मिणी धर्म-वर्धिनी ।
लोकातीता गुणातीता सर्वातीता शमात्मिका ॥ १७६
बन्धूक-कुसुम-प्रख्या बाला लीला-विनोदिनी ।
सुमङ्गली सुखकरी सुवेषाढ्या सुवासिनी ॥ १७७
सुवासिन्यर्चन-प्रीताऽऽशोभना शुद्धमानसा ।
बिन्दु-तर्पण-संतुष्टा पूर्वजा त्रिपुराम्बिका ॥ १७८
दशमुद्रा-समाराध्या त्रिपुराश्री-वशंकरी ।
ज्ञान-मुद्रा ज्ञान-गम्या ज्ञान-ज्ञेय-स्वरूपिणी ॥ १७९
योनि-मुद्रा त्रिखण्डेशी त्रिगुणाम्बा त्रिकोणगा ।
अनघाद्भुत-चारित्रा वाञ्छितार्थ-प्रदायिनी ॥ १८०

अभ्यासातिशय-ज्ञाता षडध्वातीत-रूपिणी ।
अव्याज-करुणामूर्तिर् अज्ञान-ध्वान्त-दीपिका ॥ १८१
आबाल-गोप-विदिता सर्वानुल्लङ्घ्य-शासना ।
श्रीचक्रराज-निलया श्रीमत्-त्रिपुर-सुन्दरी ॥ १८२
श्रीशिवा शिव-शक्त्यैक्य-रूपिणी ललिताम्बिका ।
एवं श्रीललितादेव्या नाम्नां साहस्रकं जगुः ॥ १८३

इति श्रीब्रह्माण्ड-पुराणे उत्तरखण्डे श्रीहयग्रीवागस्त्य-संवादे
श्रीललितासहस्रनाम-स्तोत्र-कथनं नाम द्वितीयोऽध्यायः ।

परिभाषाशेषः ।

[इदानीं परिभाषा-मण्डले नाम्नां शतकेषु आदिभागान् संगृह्य प्रदर्शयति —]

श्री-मणि-सद्-ह्रीं-विविध-
गुड-दरान्-देशैश्च पुष्ट-नादाभ्याम् ।
नामसु शतकारम्भा
न स्तोभो नापि शब्द-पुनरुक्तिः ॥ १

मति-वरदा-कान्तादावकारयोगेन रक्तवर्णादौ ।
आकारस्य क्वचन तु पदयोर्योगेन भेदयेन्नाम ॥ २
साध्वी तत्त्वमयीति द्वेधा त्रेधा बुधो भिद्यात् ।
हंसवती चानर्घ्येत्यर्धान्तादेकनामैव ॥ ३
शक्तिर्निष्ठा-धाम-ज्योतिःपरपूर्वकं द्विपदम् ।
शोभनसुलभासुगतिस्त्रिपदैकपदानि शेषाणि ॥ ४
निधिरात्मा दम्भोलिः शेवधिरिति नाम पुंलिङ्गम् ।
तद्ब्रह्मधाम साधु-ज्योतिः क्लीबेऽव्ययं स्वधा स्वाहा ॥ ५
आविंशतितः सार्धान्नानाफलसाधनत्वोक्तिः ।
तस्य क्रमशो विवृतिः षट्चत्वारिंशता श्लोकैः ॥ ६

—०—

॥ फलश्रुतिः ॥

इत्येवं नामसाहस्रं कथितं ते घटोद्भव ।
रहस्यानां रहस्यं च ललिता-प्रीति-दायकम् ।
अनेन सदृशं स्तोत्रं न भूतं न भविष्यति ॥ १

सर्व-रोग-प्रशमनं सर्व-संपत्-प्रवर्धनम् ।
सर्वापमृत्यु-शमनं काल-मृत्यु-निवारणम् ॥ २

सर्व-ज्वरार्तिशमनं दीर्घायुष्य-प्रदायकम् ।
पुत्र-प्रदम् अपुत्राणां पुरुषार्थ-प्रदायकम् ॥ ३

इदं विशेषाच्छ्रीदेव्याः स्तोत्रं प्रीति-विधायकम् ।
जपेन्नित्यं प्रयत्नेन ललितोपास्ति-तत्परः ॥ ४

प्रातः स्नात्वा विधानेन सन्ध्या-कर्म समाप्य च ।
पूजा-गृहं ततो गत्वा चक्र-राजं समर्चयेत् ॥ ५

विद्यां जपेत् सहस्रं वा त्रिशतं शतमेव वा ।
रहस्यनाम-साहस्रम् इदं पश्चात् पठेन्नरः ॥ ६

जन्म-मध्ये सकृच्चापि य एतत् पठते सुधीः ।
तस्य पुण्य-फलं वक्ष्ये शृणु त्वं कुम्भसंभव ॥ ७

गङ्गादि-सर्वतीर्थेषु यः स्नायात् कोटिजन्मसु ।
कोटि-लिङ्ग-प्रतिष्ठां च यः कुर्यादविमुक्तके ॥ ८

कुरुक्षेत्रे तु यो दद्यात् कोटि-वारं रवि-ग्रहे ।
कोटिं सौवर्ण-भाराणां श्रोत्रियेषु द्विजन्मसु ॥ ९

यः कोटिं हयमेधानाम् आहरेद् गाङ्गरोधसि ।
आचरेत् कूप-कोटीर्यो निर्जले मरु-भूतले ॥ १०

दुर्भिक्षे यः प्रतिदिनं कोटि-ब्राह्मण-भोजनम् ।
श्रद्धया परया कुर्यात् सहस्र-परिवत्सरान् ॥ ११

तत्-पुण्यं कोटि-गुणितं लभेत् पुण्यम् अनुत्तमम् ।
रहस्य-नाम-साहस्रे नाम्नोऽप्येकस्य कीर्तनात् ॥ १२

रहस्य-नाम-साहस्रे नामैकमपि यः पठेत् ।
तस्य पापानि नश्यन्ति महान्त्यपि न संशयः ॥ १३

नित्यकर्माननुष्ठानान्निषिद्धकरणादपि ।
यत् पापं जायते पुंसां तत् सर्वं नश्यति द्रुतम् ॥ १४
बहुनात्र किमुक्तेन श्रृणु त्वं कलशीसुत ॥ १५
अत्रैकनाम्नो या शक्तिः पातकानां निवर्तने ।
तन्निवर्त्यमघं कर्तुं नालं लोकाश्चतुर्दश ॥ १६
यस्त्यक्त्वा नाम-साहस्रं पापहानिम् अभीप्सति ।
स हि शीत-निवृत्त्यर्थं हिम-शैलं निषेवते ॥ १७
भक्तो यः कीर्तयेन्नित्यम् इदं नाम-सहस्रकम् ।
तस्मै श्रीललितादेवी प्रीताभीष्टं प्रयच्छति ॥ १८
अकीर्तयन्निदं स्तोत्रं कथं भक्तो भविष्यति ।
नित्यं संकीर्तनाशक्तः कीर्तयेत् पुण्य-वासरे ॥ १९
संक्रान्तौ विषुवे चैव स्वजन्म-त्रितयेऽयने ।
नवम्यां वा चतुर्दश्यां सितायां शुक्रवासरे ।
कीर्तयेन्नामसाहस्रं पौर्णमास्यां विशेषतः ॥ २०
पौर्णमास्यां चन्द्र-बिम्बे ध्यात्वा श्रीललिताम्बिकाम् ।
पञ्चोपचारैः संपूज्य पठेन्नामसहस्रकम् ॥ २१
सर्वे रोगाः प्रणश्यन्ति दीर्घमायुश्च विन्दति ।
अयम् आयुष्करो नाम प्रयोगः कल्प-चोदितः ॥ २२
ज्वरार्तं शिरसि स्पृष्ट्वा पठेन्नामसहस्रकम् ।
तत्क्षणात् प्रशमं याति शिरस्तोदो ज्वरोऽपि च ॥ २३
सर्व-व्याधि-निवृत्त्यर्थं स्पृष्ट्वा भस्म जपेद् इदम् ।
तद्-भस्मधारणाद् एव नश्यन्ति व्याधयः क्षणात् ॥ २४
जलं संमन्त्र्य कुम्भस्थं नामसाहस्रतो मुने ।
अभिषिञ्चेद् ग्रहग्रस्तान् ग्रहा नश्यन्ति तत्क्षणात् ॥ २५
सुधा-सागर-मध्यस्थां ध्यात्वा श्रीललिताम्बिकाम् ।
यः पठेन्नामसाहस्रं विषं तस्य विनश्यति ॥ २६
वन्ध्यानां पुत्रलाभाय नाम-साहस्र-मन्त्रितम् ।
नवनीतं प्रदद्यात् तु पुत्र-लाभो भवेद् ध्रुवम् ॥ २७

देव्याः पाशेन संबद्धाम् आकृष्टाम् अङ्कुशेन च ।
ध्यात्वाऽभीष्टां स्त्रियं रात्रौ जपेन्नाम-सहस्रकम् ।
आयाति स्वसमीपं सा यद्यप्यन्तःपुरं गता ॥ २८
राजाकर्षणकामश्चेद् राजावसथ-दिङमुखः ।
त्रिरात्रं यः पठेद् एतच्छ्रीदेवी-ध्यान-तत्परः ॥ २९
स राजा पारवश्येन तुरङ्गं वा मतङ्गजम् ।
आरुह्यायाति निकटं दासवत् प्रणिपत्य च ।
तस्मै राज्यं च कोशं च ददात्येव वशं गतः ॥ ३०
रहस्यनामसाहस्रं यः कीर्तयति नित्यशः ।
तन्मुखालोकमात्रेण मुह्येल्लोकत्रयं मुने ॥ ३१
यस्त्विदं नामसाहस्रं सकृत् पठति भक्तिमान् ।
तस्य ये शत्रवस्तेषां निहन्ता शरभेश्वरः ॥ ३२
यो वाभिचारं कुरुते नाम-साहस्र-पाठके ।
निवर्त्य तत् क्रियां हन्यात् तं वै प्रत्यङ्गिरा स्वयम् ॥ ३३
ये क्रूरदृष्टचा वीक्षन्ते नाम-साहस्र-पाठकम् ।
तान् अन्धान् कुरुते क्षिप्रं स्वयं मार्तण्डभैरवः ॥ ३४
धनं यो हरते चोरैर्नाम-साहस्र-जापिनः ।
यत्र कुत्र स्थितं वापि क्षेत्रपालो निहन्ति तम् ॥ ३५
विद्यासु कुरुते वादं यो विद्वान् नामजापिना ।
तस्य वाक्-स्तम्भनं सद्यः करोति नकुलीश्वरी ॥ ३६
यो राजा कुरुते वैरं नामसाहस्रजापिना ।
चतुरङ्गबलं तस्य दण्डिनी संहरेत् स्वयम् ॥ ३७
यः पठेन्नामसाहस्रं षण्मासं भक्ति-संयुतः ।
लक्ष्मीश्चाञ्चल्य-रहिता सदा तिष्ठति तद्-गृहे ॥ ३८
मासम् एकं प्रतिदिनं त्रिवारं यः पठेन्नरः ।
भारती तस्य जिह्वाग्रे रङ्गे नृत्यति नित्यशः ॥ ३९
यस्त्वेकवारं पठति पक्षमात्रम् अतन्द्रितः ।
मुह्यन्ति कामवशगा मृगाक्ष्यस्तस्य वीक्षणात् ॥ ४०

यः पठेन्नामसाहस्रं जन्ममध्ये सकृन्नरः ।
तद्-दृष्टि-गोचराः सर्वे मुच्यन्ते सर्वकिल्बिषैः ॥ ४१

यो वेत्ति नाम-साहस्रं तस्मै देयं द्विजन्मने ।
अन्नं वस्त्रं धनं धान्यं नान्येभ्यस्तु कदाचन ॥ ४२

श्रीमन्त्रराजं यो वेत्ति श्रीचक्रं यः समर्चति ।
यः कीर्तयति नामानि तं सत्पात्रं विदुर्बुधाः ॥ ४३

तस्मै देयं प्रयत्नेन श्रीदेवीप्रीतिमिच्छता ॥ ४४

न कीर्तयति नामानि मन्त्रराजं न वेत्ति यः ।
पशुतुल्यः स विज्ञेयस्तस्मै दत्तं निरर्थकम् ॥ ४५
परीक्ष्य विद्याविदुषस्तेभ्यो दद्याद् विचक्षणः ॥ ४६

श्रीमन्त्रराज-सदृशो यथा मन्त्रो न विद्यते ।
देवता ललिता-तुल्या यथा नास्ति घटोद्भव ॥ ४७

रहस्य-नाम-साहस्र-तुल्या नास्ति तथा स्तुतिः ॥ ४८

लिखित्वा पुस्तके यस्तु नामसाहस्रमुत्तमम् ।
समर्चयेत्सदा भक्त्या तस्य तुष्यति सुन्दरी ॥ ४९

बहुनाऽत्र किमुक्तेन शृणु त्वं कुम्भसंभव ॥ ५०

नानेन सदृशं स्तोत्रं सर्वतन्त्रेषु विद्यते ।
तस्मादुपासको नित्यं कीर्तयेद् इदमादरात् ॥ ५१

एभिर्नामसहस्रैस्तु श्रीचक्रं योऽर्चयेत् सकृत् ।
पद्मैर्वा तुलसीपुष्पैः कल्हारैर्वा कदम्बकैः ॥ ५२

चम्पकैर्जातिकुसुमैर्मल्लिका-करवीरकैः ।
उत्पलैर्बिल्वपत्रैर्वा कुन्द-केसर-पाटलैः ॥ ५३

अन्यैः सुगन्धि-कुसुमैः केतकी-माधवीमुखैः ।
तस्य पुण्यफलं वक्तुं न शक्नोति महेश्वरः ॥ ५४

सा वेत्ति ललितादेवी स्वचक्रार्चनजं फलम् ।
अन्ये कथं विजानीयुर्ब्रह्माद्याः स्वल्पमेधसः ॥ ५५

प्रतिमासं पौर्णमास्याम् एभिर्नामसहस्रकैः ।
रात्रौ यश्चक्रराजस्थाम् अर्चयेत् परदेवताम् ॥ ५६

स एव ललितारूपस्तद्रूपा ललिता स्वयम् ।
न तयोर्विद्यते भेदो भेदकृत् पापकृद् भवेत् ॥ ५७

महानवम्यां यो भक्तः श्रीदेवीं चक्रमध्यगाम् ।
अर्चयेन्नामसाहस्रैस्तस्य मुक्तिः करे स्थिता ॥ ५८

यस्तु नामसहस्रेण शुक्रवारे समर्चयेत् ।
चक्रराजे महादेवीं तस्य पुण्यफलं शृणु ॥ ५९

सर्वान् कामान् अवाप्येह सर्व-सौभाग्य-संयुतः ।
पुत्रपौत्रादि-संयुक्तो भुक्त्वा भोगान् यथेप्सितान् ॥ ६०

अन्ते श्रीललितादेव्याः सायुज्यम् अतिदुर्लभम् ।
प्रार्थनीयं शिवाद्यैश्च प्राप्नोत्येव न संशयः ॥ ६१

यः सहस्रं ब्राह्मणानाम् एभिर्नामसहस्रकैः ।
समर्च्य भोजयेद् भक्त्या पायसापूप-षड्रसैः ॥ ६२

तस्मै प्रीणाति ललिता स्वसाम्राज्यं प्रयच्छति ।
न तस्य दुर्लभं वस्तु त्रिषु लोकेषु विद्यते ॥ ६३

निष्कामः कीर्तयेद् यस्तु नामसाहस्रमुत्तमम् ।
ब्रह्मज्ञानम् अवाप्नोति येन मुच्येत बन्धनात् ॥ ६४

धनार्थी धनमाप्नोति यशोऽर्थी चाप्नुयाद् यशः ।
विद्यार्थी चाप्नुयाद् विद्यां नामसाहस्रकीर्तनात् ॥ ६५

नानेन सदृशं स्तोत्रं भोग-मोक्ष-प्रदं मुने ।
कीर्तनीयम् इदं तस्माद् भोग-मोक्षार्थिभिर्नरैः ॥ ६६

चतुराश्रम-निष्ठैश्च कीर्तनीयम् इदं सदा ।
स्वधर्म-समनुष्ठान-वैकल्य-परिपूर्तये ॥ ६७

कलौ पापैक-बहुले धर्मानुष्ठान-वर्जिते ।
नाम-संकीर्तनं मुक्त्वा नृणां नान्यत् परायणम् ॥ ६८

लौकिकाद् वचनान्मुख्यं विष्णु-नामानुकीर्तनम् ।
विष्णुनाम-सहस्राच्च शिवनामैकमुत्तमम् ॥ ६९

शिवनामसहस्राच्च देव्या नामैकमुत्तमम् ।
देवी-नाम-सहस्राणि कोटिशः सन्ति कुम्भज ॥ ७०

तेषु मुख्यं दशविधं नाम-साहस्रमुच्यते ।
रहस्यनाम-साहस्रम् इदं शस्तं दशस्वपि ॥ ७१

तस्मात् संकीर्तयेन्नित्यं कलि-दोष-निवृत्तये ।
मुख्यं श्रीमातृनामेति न जानन्ति विमोहिताः ॥ ७२

विष्णु-नाम-पराः केचिच्छिव-नाम-पराः परे ।
न कश्चिदपि लोकेषु ललिता-नाम-तत्परः ॥ ७३

येनान्य-देवता-नाम कीर्तितं जन्म-कोटिषु ।
तस्यैव भवति श्रद्धा श्रीदेवी-नाम-कीर्तने ॥ ७४

चरमे जन्मनि यथा श्रीविद्योपासको भवेत् ।
नाम-साहस्र-पाठश्च तथा चरम-जन्मनि ॥ ७५

यथैव विरला लोके श्रीविद्याचार-वेदिनः ।
तथैव विरला गुह्य-नाम-साहस्र-पाठकाः ॥ ७६

मन्त्रराज-जपश्चैव चक्रराजार्चनं तथा ।
रहस्यनाम-पाठश्च नाल्पस्य तपसः फलम् ॥ ७७

अपठन्नाम-साहस्रं प्रीणयेद् यो महेश्वरीम् ।
स चक्षुषा विना रूपं पश्येद् एव विमूढ-धीः ॥ ७८

रहस्यनाम-साहस्रं त्यक्त्वा यः सिद्धि-कामुकः ।
स भोजनं विना नूनं क्षुन्निवृत्तिम् अभीप्सति ॥ ७९

यो भक्तो ललिता-देव्याः स नित्यं कीर्तयेद् इदम् ।
नान्यथा प्रीयते देवी कल्प-कोटि-शतैरपि ॥ ८०

तस्माद् रहस्यनामानि श्रीमातुः प्रयतः पठेत् ॥ ८१

इति ते कथितं स्तोत्रं रहस्यं कुम्भसंभव ।
नाविद्यावेदिने ब्रूयान्नाभक्ताय कदाचन ॥ ८२

यथैव गोप्या श्रीविद्या तथा गोप्यम् इदं मुने ।
पशु-तुल्येषु न ब्रूयाज्जनेषु स्तोत्रमुत्तमम् ॥ ८३

यो ददाति विमूढात्मा श्रीविद्या-रहिताय च ।
तस्मै कुप्यन्ति योगिन्यः सोऽनर्थः सुमहान् स्मृतः ॥ ८४
रहस्यनामसाहस्रं तस्मात् संगोपयेदिदम् ॥ ८५
स्वतन्त्रेण मया नोक्तं तवापि कलशीभव ।
ललिताप्रेरणाद् एव मयोक्तं स्तोत्रमुत्तमम् ॥ ८६
कीर्तनीयमिदं भक्त्या कुम्भयोने निरन्तरम् ।
तेन तुष्टा महादेवी तवाभीष्टं प्रदास्यति ॥ ८७

श्रीसूत उवाच —

इत्युक्त्वा श्रीहयग्रीवो ध्यात्वा श्रीललिताम्बिकाम् ।
आनन्द-मग्न-हृदयः सद्यः पुलकितोऽभवत् ॥ ८८

इति श्रीब्रह्माण्डपुराणे उत्तरखण्डे हयग्रीवागस्त्य-संवादे श्रीललितानाम-सहस्र-फल-निरूपणं नाम तृतीयोऽध्यायः ॥

श्रीललिता-सहस्र-नामावली ।

१ ॐ श्रीमात्रे नमः
२ श्रीमहाराज्ञ्यै नमः
३ श्रीमत्सिंहासनेश्वर्यै नमः
४ चिदग्निकुण्डसंभूतायै नमः।
५ देवकार्यसमुद्यतायै नमः
६ उद्यद्भानुसहस्राभायै नमः
७ ॐ चतुर्बाहुसमन्वितायै नमः
८ रागस्वरूपपाशाढ्यायै नमः
९ क्रोधाकाराङ्कुशोज्ज्वलायै नमः
१० मनोरूपेक्षुकोदण्डायै नमः
११ पञ्चतन्मात्रसायकायै नमः
१२ निजारुण-प्रभापूर-मज्जद्-ब्रह्माण्ड-मण्डलायै नमः
१३ चम्पकाशोक-पुन्नाग-सौगन्धिक-लसत्-कचायै नमः
१४ कुरुविन्द-मणि-श्रेणी-कनत्कोटीर-मण्डितायै नमः
१५ अष्टमी-चन्द्र-विभ्राजदलिक-स्थल-शोभितायै नमः
१६ मुखचन्द्र-कलङ्काभ-मृगनाभि-विशेषकायै नमः
१७ वदन-स्मर-माङ्गल्य-गृह-तोरण-चिल्लिकायै नमः
१८ वक्त्रलक्ष्मी-परीवाह-चलन्मीनाभ-लोचनायै नमः
१९ नवचम्पक-पुष्पाभ-नासा-दण्ड-विराजितायै नमः
२० ताराकान्ति-तिरस्कारि-नासाभरण-भासुरायै नमः
२१ कदम्ब-मञ्जरी-क्लृप्त-कर्णपूर-मनोहरायै नमः
२२ ताटङ्क-युगलीभूत-तपनोडुप-मण्डलायै नमः
२३ पद्मरागशिलादर्श-परिभावि-कपोलभुवे नमः
२४ नवविद्रुम-बिम्बश्री-न्यक्कारि-दशनच्छदायै नमः
२५ शुद्धविद्याङ्कुराकार-द्विजपङ्क्ति-द्वयोज्ज्वलायै नमः
२६ कर्पूरवीटिकामोद-समाकर्षद्-दिगन्तरायै नमः
२७ निजसंल्लाप-माधुर्य-विनिर्भर्त्सित-कच्छप्यै नमः
२८ मन्दस्मित-प्रभापूर-मज्जत्-कामेश-मानसायै नमः
२९ अनाकलित-सादृश्य-चुबुक-श्री-विराजितायै नमः
३० कामेश-बद्ध-माङ्गल्य-सूत्र-शोभित-कन्धरायै नमः

३१ ॐ कनकाङ्गद-केयूर-कमनीय-भुजान्वितायै नमः
३२ रत्न-ग्रैवेय-चिन्ताक-लोल-मुक्ता-फलान्वितायै नमः
३३ कामेश्वर-प्रेम-रत्न-मणि-प्रतिपण-स्तन्यै नमः
३४ नाभ्यालवाल-रोमालि-लता-फलकुचद्वय्यै नमः
३५ लक्ष्य-रोमलताधार-तासमुन्नेय-मध्यमायै नमः
३६ स्तनभार-दलन्मध्य-पट्ट-बन्ध-वलि-त्रयायै नमः
३७ अरुणारुण-कौसुम्भ-वस्त्र-भास्वत्कटीतटयै नमः
३८ रत्नकिङ्किणिका-रम्य-रशना-दाम-भूषितायै नमः
३९ कामेश-ज्ञात-सौभाग्य-मार्दवोरु-द्वयान्वितायै नमः
४० माणिक्य-मकुटाकार-जानुद्वय-विराजितायै नमः
४१ इन्द्रगोप-परिक्षिप्त-स्मर-तूणाभ-जङ्घिकायै नमः
४२ गूढगुल्फायै नमः
४३ कूर्मपृष्ठ-जयिष्णु-प्रपदान्वितायै नमः
४४ नख-दीधिति-संछन्न-नमज्जन-तमोगुणायै नमः
४५ पदद्वय-प्रभाजाल-पराकृत-सरोरुहायै नमः
४६ शिञ्जान-मणि-मञ्जीर-मण्डित-श्रीपदाम्बुजायै नमः
४७ मराली-मन्द-गमनायै नमः
४८ महालावण्य-शेवधये नमः
४९ सर्वारुणायै नमः
५० अनवद्याङ्ग्यै नमः
५१ सर्वाभरण-भूषितायै नमः
५२ शिवकामेश्वराङ्कस्थायै नमः
५३ शिवायै नमः
५४ स्वाधीनवल्लभायै नमः
५५ सुमेरुमध्यशृङ्गस्थायै नमः
५६ ॐ श्रीमन्नगरनायिकायै नमः
५७ चिन्तामणिगृहान्तस्थायै नमः
५८ पञ्चब्रह्मासनस्थितायै नमः
५९ महापद्माटवीसंस्थायै नमः
६० कदम्बवनवासिन्यै नमः
६१ सुधासागरमध्यस्थायै नमः
६२ कामाक्ष्यै नमः
६३ कामदायिन्यै नमः
६४ देवर्षिगण-संघात-स्तूयमानात्मवैभवायै नमः
६५ भण्डासुर-वधोद्युक्त-शक्ति-सेना-समन्वितायै नमः
६६ संपत्करी-समारूढ-सिन्धुर-व्रज-सेवितायै नमः

६७ ॐ अश्वारूढाधिष्ठिताश्व-कोटि-कोटिभिरावृतायै नमः
६८ चक्रराज-रथारूढ-सर्वायुध-परिष्कृतायै नमः
६९ गेयचक्र-रथारूढ-मन्त्रिणी-परिसेवितायै नमः
७० किरिचक्र-रथारूढ-दण्डनाथा-पुरस्कृतायै नमः
७१ ज्वालामालिनिकाक्षिप्त-वह्नि-प्राकार-मध्यगायै नमः
७२ भण्डसैन्य-वधोद्युक्त-शक्ति-विक्रम-हर्षितायै नमः
७३ नित्यापराक्रमाटोप-निरीक्षण-समुत्सुकायै नमः
७४ भण्डपुत्र-वधोद्युक्त-बाला-विक्रम-नन्दितायै नमः
७५ मन्त्रिण्यम्बाविरचित-विषङ्ग-वध-तोषितायै नमः
७६ विशुक्र-प्राणहरण-वाराही-वीर्यनन्दितायै नमः
७७ कामेश्वर-मुखालोक-कल्पित-श्रीगणेश्वरायै नमः
७८ महागणेश-निर्भिन्न-विघ्न-यन्त्र-प्रहर्षितायै नमः
७९ भण्डासुरेन्द्र-निर्मुक्त-शस्त्र-प्रत्यस्त्र-वर्षिण्यै नमः
८० कराङ्गुलि-नखोत्पन्न-नारायण-दशाकृत्यै नमः
८१ महापाशुपतास्त्राग्नि-निर्दग्धासुर-सैनिकायै नमः
८२ कामेश्वरास्त्र-निर्दग्ध-सभण्डासुरशून्यकायै नमः
८३ ब्रह्मोपेन्द्र-महेन्द्रादि-देव-संस्तुत-वैभवायै नमः
८४ हरनेत्राग्नि-संदग्ध-काम-संजीवनौषध्यै नमः
८५ श्रीमद्-वाग्भव-कूटैक-स्वरूप-मुख-पङ्कजायै नमः
८६ कण्ठाधःकटि-पर्यन्त-मध्य-कूट-स्वरूपिण्यै नमः
८७ शक्ति-कूटैकतापन्न-कटयधोभाग-धारिण्यै नमः
८८ मूलमन्त्रात्मिकायै नमः
८९ मूलकूटत्रयकलेवरायै नमः
९० कुलामृतैक-रसिकायै नमः
९१ कुलसंकेत-पालिन्यै नमः
९२ कुलाङ्गनायै नमः
९३ कुलान्तस्थायै नमः
९४ कौलिन्यै नमः
९५ कुलयोगिन्यै नमः
९६ अकुलायै नमः
९७ ॐ समयान्तस्थायै नमः
९८ समयाचार-तत्परायै नमः
९९ मूलाधारैक-निलयायै नमः
१०० ब्रह्मग्रन्थविभेदिन्यै नमः
१०१ मणिपूरान्तरुदितायै नमः
१०२ विष्णुग्रन्थि-विभेदिन्यै नमः
१०३ आज्ञाचक्रान्तरालस्थायै नमः

१०४ रुद्रग्रन्थिविभेदिन्यै नमः
१०५ सहस्राराम्बुजारूढायै नमः
१०६ सुधाधाराभिवर्षिण्यै नमः
१०७ तटिल्लतासमरुच्यै नमः
१०८ षट्चक्रोपरिसंस्थितायै नमः
१०९ महासक्त्यै नमः
११० कुण्डलिन्यै नमः
१११ बिसतन्तुतनीयस्यै नमः
११२ भवान्यै नमः
११३ भावनागम्यायै नमः
११४ भवारण्यकुठारिकायै नमः
११५ भद्रप्रियायै नमः
११६ भद्रमूर्त्यै नमः
११७ भक्तसौभाग्यदायिन्यै नमः
११८ भक्तिप्रियायै नमः
११९ भक्तिगम्यायै नमः
१२० भक्तिवश्यायै नमः
१२१ भयापहायै नमः
१२२ शांभव्यै नमः
१२३ शारदाराध्यायै नमः
१२४ शर्वाण्यै नमः
१२५ शर्मदायिन्यै नमः
१२६ शांकर्यै नमः
१२७ श्रीकर्यै नमः
१२८ साध्व्यै नमः
१२९ शरच्चन्द्रनिभाननायै नमः
१३० शातोदर्यै नमः
१३१ शान्तिमत्यै नमः
१३२ निराधारायै नमः
१३३ निरञ्जनायै नमः
१३४ निर्लेपायै नमः
१३५ निर्मलायै नमः
१३६ नित्यायै नमः
१३७ निराकारायै नमः
१३८ निराकुलायै नमः
१३९ निर्गुणायै नमः
१४० निष्कलायै नमः
१४१ शान्तायै नमः
१४२ निष्कामायै नमः
१४३ निरुपप्लवायै नमः
१४४ नित्यमुक्तायै नमः
१४५ निर्विकारायै नमः
१४६ निष्प्रपञ्चायै नमः
१४७ निराश्रयायै नमः
१४८ नित्यशुद्धायै नमः
१४९ नित्यबुद्धायै नमः
१५० निरवद्यायै नमः
१५१ निरन्तरायै नमः
१५२ निष्कारणायै नमः
१५३ निष्कलङ्कायै नमः
१५४ निरुपाधये नमः
१५५ निरीश्वरायै नमः
१५६ निरागायै नमः
१५७ रागमथन्यै नमः
१५८ निर्मदायै नमः
१५९ मदनाशिन्यै नमः

१६० निश्चिन्तायै नमः

१६१ निरहंकारायै नमः

१६२ निर्मोहायै नमः

१६३ मोहनाशिन्यै नमः

१६४ निर्मयायै नमः

१६५ ममताहन्त्र्यै नमः

१६६ निष्पापायै नमः

१६७ पापनाशिन्य नमः

१६८ निष्क्रोधायै नमः

१६९ क्रोधशमन्यै नमः

१७० निर्लोभायै नमः

१७१ लोभनाशिन्यै नमः

१७२ निःसंशयायै नमः

१७३ संशयघ्न्यै नमः

१७४ निर्भवायै नमः

१७५ भवनाशिन्यै नमः

१७६ निर्विकल्पायै नमः

१७७ निराबाधायै नमः

१७८ निर्भेदायै नमः

१७९ भेदनाशिन्यै नमः

१८० निर्नाशायै नमः

१८१ मृत्युमथन्यै नमः

१८२ निष्क्रियायै नमः

१८३ निष्परिग्रहायै नमः

१८४ निस्तुलायै नमः

१८५ नीलचिकुरायै नमः

१८६ निरपायायै नमः

१८७ निरत्ययायै नमः

१८८ दुर्लभायै नमः

१८९ दुर्गमायै नमः

१९० दुर्गायै नमः

१९१ दुःखहन्त्र्यै नमः

१९२ सुखप्रदायै नमः

१९३ दुष्टदूरायै नमः

१९४ दुराचारशमन्यै नमः

१९५ दोषवर्जितायै नमः

१९६ सर्वज्ञायै नमः

१९७ सान्द्रकरुणायै नमः

१९८ समानाधिकवर्जितायै नमः।

१९९ सर्वशक्तिमय्यै नमः

२०० सर्वमङ्गलायै नमः

२०१ सद्गतिप्रदायै नमः

२०२ सर्वेश्वर्यै नमः

२०३ सर्वमय्यै नमः

२०४ सर्वमन्त्रस्वरूपिण्यै नमः

२०५ सर्वयन्त्रात्मिकायै नमः

२०६ सर्वतन्त्ररूपायै नमः

२०७ मनोन्मन्यै नमः

२०८ माहेश्वर्यै नमः

२०९ महादेव्यै नमः

२१० महालक्ष्म्यै नमः

२११ मृडप्रियायै नमः

२१२ महारूपायै नमः

२१३ महापूज्यायै नमः

२१४ महापातकनाशिन्यै नमः

२१५ महामायायै नमः

२१६ महासत्त्वायै नमः

२१७ महाशक्त्यै नमः

२१८ महारत्यै नमः

२१९ महाभोगायै नमः
२२० महैश्वर्यायै नमः
२२१ महावीर्यायै नमः
२२२ महाबलायै नमः
२२३ महाबुद्ध्यै नमः
२२४ महासिद्ध्यै नमः
२२५ महायोगेश्वरेश्वर्यै नमः
२२६ महातन्त्रायै नमः
२२७ महामन्त्रायै नमः
२२८ महायन्त्रायै नमः
२२९ महासनायै नमः
२३० महायागक्रमाराध्यायै नमः
२३१ महाभैरवपूजितायै नमः
२३२ महेश्वरमहाकल्पमहाताण्डवसाक्षिण्यै नमः
२३३ महाकामेशमहिष्यै नमः
२३४ महात्रिपुरसुन्दर्यै नमः
२३५ चतुःषष्ट्युपचाराढ्यायै नमः
२३६ चतुःषष्टिकलामय्यै नमः
२३७ महाचतुःषष्टिकोटियोगिनीगणसेवितायै नमः
२३८ मनुविद्यायै नमः
२३९ चन्द्रविद्यायै नमः
२४० चन्द्रमण्डलमध्यगायै नमः
२४१ चारुरूपायै नमः
२४२ चारुहासायै नमः
२४३ चारुचन्द्रकलाधरायै नमः
२४४ चराचरजगन्नाथायै नमः
२४५ चक्रराजनिकेतनायै नमः
२४६ पार्वत्यै नमः
२४७ पद्मनयनायै नमः
२४८ पद्मरागसमप्रभायै नमः
२४९ पञ्चप्रेतासनासीनायै नमः
२५० पञ्चब्रह्मस्वरूपिण्यै नमः
२५१ चिन्मय्यै नमः
२५२ परमानन्दायै नमः
२५३ विज्ञानघनरूपिण्यै नमः
२५४ ध्यानध्यातृध्येयरूपायै नमः
२५५ धर्माधर्मविवर्जितायै नमः
२५६ विश्वरूपायै नमः
२५७ जागरिण्यै नमः
२५८ स्वपन्त्यै नमः
२५९ तैजसात्मिकायै नमः
२६० सुप्तायै नमः
२६१ प्राज्ञात्मिकायै नमः
२६२ तुर्यायै नमः
२६३ सर्वावस्थाविवर्जितायै नमः
२६४ सृष्टिकर्त्र्यै नमः
२६५ ब्रह्मरूपायै नमः
२६६ गोप्त्र्यै नमः
२६७ गोविन्दरूपिण्यै नमः
२६८ संहारिण्यै नमः
२६९ रुद्ररूपायै नमः
२७० तिरोधानकर्यै नमः
२७१ ईश्वर्यै नमः

२७२ ॐ सदाशिवायै नमः
२७३ अनुग्रहदायै नमः
२७४ पञ्चकृत्यपरायणायै नमः
२७५ भानुमण्डलमध्यस्थायै नमः
२७६ भैरव्यै नमः
२७७ भगमालिन्यै नमः
२७८ पद्मासनायै नमः
२७९ भगवत्यै नमः
२८० पद्मनाभसहोदर्यै नमः
२८१ उन्मेषनिमिषोत्पन्न-विपन्नभुवनावल्यै नमः
२८२ सहस्रशीर्षवदनायै नमः
२८३ सहस्राक्ष्यै नमः
२८४ सहस्रपदे नमः
२८५ आब्रह्मकीटजनन्यै नमः
२८६ वर्णाश्रमविधायिन्यै नमः
२८७ निजाज्ञारूपनिगमायै नमः
२८८ पुण्यापुण्यफलप्रदायै नमः
२८९ श्रुतिसीमन्तसिन्दूरीकृत-पादाब्जधूलिकायै नमः
२९० सकलागमसंदोहशुक्ति-संपुटमौक्तिकायै नमः
२९१ पुरुषार्थप्रदायै नमः
२९२ पूर्णायै नमः
२९३ भोगिन्यै नमः
२९४ भुवनेश्वर्यै नमः
२९५ अम्बिकायै नमः
२९६ अनादिनिधनायै नमः
२९७ हरिब्रह्मेन्द्रसेवितायै नमः
२९८ ॐ नारायण्यै नमः
२९९ नादरूपायै नमः
३०० नामरूपविवर्जितायै नमः
३०१ ह्रींकार्यै नमः
३०२ ह्रीमत्यै नमः
३०३ हृद्यायै नमः
३०४ हेयोपादेयवर्जितायै नमः
३०५ राजराजार्चितायै नमः
३०६ राज्ञ्यै नमः
३०७ रम्यायै नमः
३०८ राजीवलोचनायै नमः
३०९ रञ्जन्यै नमः
३१० रमण्यै नमः
३११ रस्यायै नमः
३१२ रणत्किङ्किणिमेखलायै नमः
३१३ रमायै नमः
३१४ राकेन्दुवदनायै नमः
३१५ रतिरूपायै नमः
३१६ रतिप्रियायै नमः
३१७ रक्षाकर्यै नमः
३१८ राक्षसघ्न्यै नमः
३१९ रामायै नमः
३२० रमणलम्पटायै नमः
३२१ काम्यायै नमः
३२२ कामकलारूपायै नमः
३२३ कदम्बकुसुमप्रियायै नमः
३२४ कल्याण्यै नमः
३२५ जगतीकन्दायै नमः
३२६ करुणारससागरायै नमः

३२७ ॐ कलावत्यै नमः
३२८ कलालापायै नमः
३२९ कान्तायै नमः
३३० कादम्बरीप्रियायै नमः
३३१ वरदायै नमः
३३२ वामनयनायै नमः
३३३ वारुणीमदविह्वलायै नमः
३३४ विश्वाधिकायै नमः
३३५ वेदवेद्यायै नमः
३३६ विन्ध्याचलनिवासिन्यै नमः
३३७ विधात्र्यै नमः
३३८ वेदजनन्यै नमः
३३९ विष्णुमायायै नमः
३४० विलासिन्यै नमः
३४१ क्षेत्रस्वरूपायै नमः
३४२ क्षेत्रेश्यै नमः
३४३ क्षेत्रक्षेत्रज्ञपालिन्यै नमः
३४४ क्षयवृद्धिविनिर्मुक्तायै नमः
३४५ क्षेत्रपालसमर्चितायै नमः
३४६ विजयायै नमः
३४७ विमलायै नमः
३४८ वन्द्यायै नमः
३४९ वन्दारुजनवत्सलायै नमः
३५० वाग्वादिन्यै नमः
३५१ वामकेश्यै नमः
३५२ वह्निमण्डलवासिन्यै नमः
३५३ भक्तिमत्कल्पलतिकायै नमः
३५४ ॐ पशुपाशविमोचिन्यै नमः
३५५ संहृताशेषपाषण्डायै नमः
३५६ सदाचारप्रवर्तिकायै नमः
३५७ तापत्रयाग्निसंतप्तसमाह्लादनचन्द्रिकायै नमः
३५८ तरुण्यै नमः
३५९ तापसाराध्यायै नमः
३६० तनुमध्यायै नमः
३६१ तमोऽपहायै नमः
३६२ चित्यै नमः
३६३ तत्पदलक्ष्यार्थायै नमः
३६४ चिदेकरसरूपिण्यै नमः
३६५ स्वात्मानन्दलवीभूतब्रह्माद्यानन्दसंतत्यै नमः
३६६ परायै नमः
३६७ प्रत्यक्चितीरूपायै नमः
३६८ पश्यन्त्यै नमः
३६९ परदेवतायै नमः
३७० मध्यमायै नमः
३७१ वैखरीरूपायै नमः
३७२ भक्तमानसहंसिकायै नमः
३७३ कामेश्वरप्राणनाड्यै नमः
३७४ कृतज्ञायै नमः
३७५ कामपूजितायै नमः
३७६ श्रृङ्गाररससंपूर्णायै नमः
३७७ जयायै नमः
३७८ जालन्धरस्थितायै नमः
३७९ ओड्याणपीठनिलयायै नमः
३८० बिन्दुमण्डलवासिन्यै नमः

३८१ ॐ रहोयागक्रमाराध्यायै नमः
३८२ रहस्तर्पणतर्पितायै नमः
३८३ सद्यःप्रसादिन्यै नमः
३८४ विश्वसाक्षिण्यै नमः
३८५ साक्षिवर्जितायै नमः
३८६ षडङ्गदेवतायुक्तायै नमः
३८७ षाड्गुण्यपरिपूरितायै नमः
३८८ नित्यक्लिन्नायै नमः
३८९ निरुपमायै नमः
३९० निर्वाणसुखदायिन्यै नमः
३९१ नित्याषोडशिकारूपायै नमः
३९२ श्रीकण्ठार्धशरीरिण्यै नमः
३९३ प्रभावत्यै नमः
३९४ प्रभारूपायै नमः
३९५ प्रसिद्धायै नमः
३९६ परमेश्वर्यै नमः
३९७ मूलप्रकृत्यै नमः
३९८ अव्यक्तायै नमः
३९९ व्यक्ताव्यक्तस्वरूपिण्यै नमः
४०० व्यापिन्यै नमः
४०१ विविधाकारायै नमः
४०२ विद्याविद्यास्वरूपिण्यै नमः
४०३ महाकामेशनयनकुमुदाह्लादकौमुद्यै नमः
४०४ भक्तहार्दतमोभेदभानुमद्-भानुसंतत्यै नमः
४०५ ॐ शिवदूत्यै नमः
४०६ शिवाराध्यायै नमः
४०७ शिवमूर्त्यै नमः
४०८ शिवङ्कर्यै नमः
४०९ शिवप्रियायै नमः
४१० शिवपरायै नमः
४११ शिष्टेष्टायै नमः
४१२ शिष्टपूजितायै नमः
४१३ अप्रमेयायै नमः
४१४ स्वप्रकाशायै नमः
४१५ मनोवाचामगोचरायै नमः
४१६ चिच्छक्त्यै नमः
४१७ चेतनारूपायै नमः
४१८ जडशक्त्यै नमः
४१९ जडात्मिकायै नमः
४२० गायत्र्यै नमः
४२१ व्याहृत्यै नमः
४२२ संध्यायै नमः
४२३ द्विजवृन्दनिषेवितायै नमः
४२४ तत्त्वासनायै नमः
४२५ तस्मै नमः
४२६ तुभ्यै नमः
४२७ अय्यै नमः
४२८ पञ्चकोशान्तरस्थितायै नमः
४२९ निःसीममहिम्ने नमः
४३० नित्ययौवनायै नमः
४३१ मदशालिन्यै नमः
४३२ मदघूर्णितरक्ताक्ष्यै नमः
४३३ मदपाटलगण्डभुवे नमः

४३४ ॐ चन्दनद्रवदिग्धाङ्ग्यै नमः
४३५ चाम्पेयकुसुमप्रियायै नमः
४३६ कुशलायै नमः
४३७ कोमलाकारायै नमः
४३८ कुरुकुल्लायै नमः
४३९ कुलेश्वर्यै नमः
४४० कुलकुण्डालयायै नमः
४४१ कौलमार्गतत्परसेवितायै नमः
४४२ कुमारगणनाथाम्बायै नमः
४४३ तुष्टयै नमः
४४४ पुष्टयै नमः
४४५ मत्यै नभः
४४६ धृत्यै नमः
४४७ शान्त्यै नमः
४४८ स्वस्तिमत्यै नभः
४४९ कान्त्यै नमः
४५० नन्दिन्यै नमः
४५१ विघ्ननाशिन्यै नमः
४५२ तेजोवत्यै नमः
४५३ त्रिनयनायै नमः
४५४ लोलाक्षीकामरूपिण्यै नमः
४५५ मालिन्यै नमः
४५६ हंसिन्यै नमः
४५७ मात्रे नमः
४५८ मलयाचलवासिन्यै नमः
४५९ सुमुख्यै नमः
४६० नलिन्यै नमः
४६१ ॐ सुभ्रुवे नमः
४६२ शोभनायै नमः
४६३ सुरनायिकायै नमः
४६४ कालकण्ठ्यै नमः
४६५ कान्तिमत्यै नमः
४६६ क्षोभिण्यै नमः
४६७ सूक्ष्मरूपिण्यै नमः
४६८ वज्रेश्वर्यै नमः
४६९ वामदेव्यै नमः
४७० वयोऽवस्थाविवर्जितायै नमः
४७१ सिद्धेश्वर्यै नमः
४७२ सिद्धविद्यायै नमः
४७३ सिद्धमात्रे नमः
४७४ यशस्विन्यै नमः
४७५ विशुद्धिचक्रनिलयायै नमः
४७६ आरक्तवर्णायै नमः
४७७ त्रिलोचनायै नमः
४७८ खट्वाङ्गादिप्रहरणायै नमः
४७९ वदनैकसमन्वितायै नमः
४८० पायसान्नप्रियायै नमः
४८१ त्वक्स्थायै नमः
४८२ पशुलोकभयंकर्यै नमः
४८३ अमृतादिमहाशक्तिसंवृतायै नमः
४८४ डाकिनीश्वर्यै नमः
४८५ अनाहताब्जनिलयायै नमः
४८६ श्यामाभायै नमः

४८७ ॐ वदनद्वयायै नमः
४८८ दंष्ट्रोज्ज्वलायै नमः
४८९ अक्षमालादिधरायै नमः
४९० रुधिरसंस्थितायै नमः
४९१ कालरात्र्यादिशक्त्यौघ-वृतायै नमः
४९२ स्निग्धौदनप्रियायै नमः
४९३ महावीरेन्द्रवरदायै नमः
४९४ राकिण्यम्बास्वरूपिण्यै नमः
४९५ मणिपूराब्जनिलयायै नमः
४९६ वदनत्रयसंयुतायै नमः
४९७ वज्रादिकायुधोपेतायै नमः
४९८ डामर्यादिभिरावृतायै नमः
४९९ रक्तवर्णायै नमः
५०० मांसनिष्ठायै नमः
५०१ गुडान्नप्रीतमानसायै नमः
५०२ समस्तभक्तसुखदायै नमः
५०३ लाकिन्यम्बास्वरूपिण्यै नमः
५०४ स्वाधिष्ठानाम्बुजगतायै नमः
५०५ चतुर्वक्त्रमनोहरायै नमः
५०६ शूलाद्यायुधसंपन्नायै नमः
५०७ पीतवर्णायै नमः
५०८ अतिगर्वितायै नमः
५०९ मेदोनिष्ठायै नमः
५१० ॐ मधुप्रीतायै नमः
५११ बन्दिन्यादिसमन्वितायै नमः
५१२ दध्यन्नासक्तहृदयायै नमः
५१३ काकिनीरूपधारिण्यै नमः
५१४ मूलाधाराम्बुजारूढायै नमः
५१५ पञ्चवक्त्रायै नमः
५१६ अस्थिसंस्थितायै नमः
५१७ अङ्कुशादिप्रहरणायै नमः
५१८ वरदादिनिषेवितायै नमः
५१९ मुद्गौदनासक्तचित्तायै नमः
५२० साकिन्यम्बास्वरूपिण्यै नमः
५२१ आज्ञाचक्राब्जनिलयायै नमः
५२२ शुक्लवर्णायै नमः
५२३ षडाननायै नमः
५२४ मज्जासंस्थायै नमः
५२५ हंसवतीमुख्यशक्तिसमन्वितायै नमः
५२६ हरिद्रान्नैकरसिकायै नमः
५२७ हाकिनीरूपधारिण्यै नमः
५२८ सहस्रदलपद्मस्थायै नमः
५२९ सर्ववर्णोपशोभितायै नमः
५३० सर्वायुधधरायै नमः
५३१ शुक्लसंस्थितायै नमः

५३२ ॐ सर्वतोमुख्यै नमः
५३३ सर्वौदनप्रीतचित्तायै नमः
५३४ याकिन्यम्बास्वरूपिण्यै नमः
५३५ स्वाहायै नमः
५३६ स्वधायै नमः
५३७ अमत्यै नमः
५३८ मेधायै नमः
५३९ श्रुत्यै नमः
५४० स्मृत्यै नमः
५४१ अनुत्तमायै नमः
५४२ पुण्यकीर्त्यै नमः
५४३ पुण्यलभ्यायै नमः
५४४ पुण्यश्रवणकीर्तनायै नमः
५४५ पुलोमजार्चितायै नमः
५४६ बन्धमोचन्यै नमः
५४७ बन्धुरालकायै नमः
५४८ विमर्शरूपिण्यै नमः
५४९ विद्यायै नमः
५५० वियदादिजगत्प्रस्वे नमः
५५१ सर्वव्याधिप्रशमन्यै नमः
५५२ सर्वमृत्युनिवारिण्यै नमः
५५३ अग्रगण्यायै नमः
५५४ अचिन्त्यरूपायै नमः
५५५ कलिकल्मषनाशिन्यै नमः
५५६ कात्यायन्यै नमः
५५७ कालहन्त्र्यै नमः
५५८ कमलाक्षनिषेवितायै नमः
५५९ ताम्बूलपूरितमुख्यै नमः
५६० दाडिमीकुसुमप्रभायै नमः

५६१ ॐ मृगाक्ष्यै नमः
५६२ मोहिन्यै नमः
५६३ मुख्यायै नमः
५६४ मृडान्यै नमः
५६५ मित्ररूपिण्यै नमः
५६६ नित्यतृप्तायै नमः
५६७ भक्तनिधये नमः
५६८ नियन्त्र्यै नमः
५६९ निखिलेश्वर्यै नमः
५७० मैत्र्यादिवासनालभ्यायै नमः
५७१ महाप्रलयसाक्षिण्यै नमः
५७२ परस्यै शक्त्यै नमः
५७३ परस्यै निष्ठायै नमः
५७४ प्रज्ञानघनरूपिण्यै नमः
५७५ माध्वीपानालसायै नमः
५७६ मत्तायै नमः
५७७ मातृकावर्णरूपिण्यै नमः
५७८ महाकैलासनिलयायै नमः
५७९ मृणालमृदुदोर्लतायै नमः
५८० महनीयायै नमः
५८१ दयामूर्त्यै नमः
५८२ महासाम्राज्यशालिन्यै
५८३ आत्मविद्यायै नमः
५८४ महाविद्यायै नमः
५८५ श्रीविद्यायै नमः
५८६ कामसेवितायै नमः
५८७ श्रीषोडशाक्षरीविद्यायै नमः
५८८ त्रिकूटायै नमः

५८९ ॐ कामकोटिकायै नमः
५९० कटाक्षकिङ्करीभूतकमला-
कोटिसेवितायै नमः
५९१ शिरःस्थितायै नमः
५९२ चन्द्रनिभायै नमः
५९३ भालस्थायै नमः
५९४ इन्द्रधनुःप्रभायै नमः
५९५ हृदयस्थायै नमः
५९६ रविप्रख्यायै नमः
५९७ त्रिकोणान्तरदीपिकायै
नमः
५९८ दाक्षायण्यै नमः
५९९ दैत्यहन्त्र्यै नमः
६०० दक्षयज्ञविनाशिन्यै नमः
६०१ दरान्दोलितदीर्घाक्ष्यै नमः
६०२ दरहासोज्ज्वलन्मुख्यै
नमः
६०३ गुरुमूर्त्यै नमः
६०४ गुणनिधये नमः
६०५ गोमात्रे नमः
६०६ गुहजन्मभुवे नमः
६०७ देवेश्यै नमः
६०८ दण्डनीतिस्थायै नमः
६०९ दहराकाशरूपिण्यै नमः
६१० प्रतिपन्मुख्यराकान्त-
तिथिमण्डलपूजितायै
नमः
६११ कलात्मिकायै नमः
६१२ कलानाथायै नमः
६१३ काव्यालापविनोदिन्यै
नमः
६१४ ॐ सचामररमावाणीसव्य-
दक्षिणसेवितायै नमः
६१५ आदिशक्त्यै नमः
६१६ अमेयायै नमः
६१७ आत्मने नमः
६१८ परमायै नमः
६१९ पावनाकृत्यै नमः
६२० अनेककोटिब्रह्माण्डजनन्यै
नमः
६२१ दिव्यविग्रहायै नमः
६२२ क्लींकार्यै नमः
६२३ केवलायै नमः
६२४ गुह्यायै नमः
६२५ कैवल्यपददायिन्यै नमः
६२६ त्रिपुरायै नमः
६२७ त्रिजगद्वन्द्यायै नमः
६२८ त्रिमूर्त्यै नमः
६२९ त्रिदशेश्वर्यै नमः
६३० त्र्यक्षर्यै नमः
६३१ दिव्यगन्धाढ्यायै नमः
६३२ सिन्दूरतिलकाञ्चितायै
नमः
६३३ उमायै नमः
६३४ शैलेन्द्रतनयायै नमः
६३५ गौर्यै नमः
६३६ गन्धर्वसेवितायै नमः
६३७ विश्वगर्भायै नमः
६३८ स्वर्णगर्भायै नमः
६३९ अवरदायै नमः
६४० वागधीश्वर्यै नमः

६४१ ॐ ध्यानगम्यायै नमः
६४२ अपरिच्छेद्यायै नमः
६४३ ज्ञानदायै नमः
६४४ ज्ञानविग्रहायै नमः
६४५ सर्ववेदान्तसंवेद्यायै नमः
६४६ सत्यानन्दस्वरूपिण्यै नमः
६४७ लोपामुद्रार्चितायै नमः
६४८ लीलाक्लृप्तब्रह्माण्ड-
मण्डलायै नमः
६४९ अदृश्यायै नमः
६५० दृश्यरहितायै नमः
६५१ विज्ञात्र्यै नमः
६५२ वेद्यवर्जितायै नमः
६५३ योगिन्यै नमः
६५४ योगदायै नमः
६५५ योग्यायै नमः
६५६ योगानन्दायै नमः
६५७ युगन्धरायै नमः
६५८ इच्छाशक्तिज्ञानशक्ति-
क्रियाशक्तिस्वरूपिण्यै
नमः
६५९ सर्वाधारायै नमः
६६० सुप्रतिष्ठायै नमः
६६१ सदसद्रूपधारिण्यै नमः
६६२ अष्टमूर्त्यै नमः
६६३ अजाजैत्र्यै नमः
६६४ लोकयात्राविधायिन्यै
नमः
६६५ एकाकिन्यै नमः
६६६ भूमरूपायै नमः

६६७ ॐ निर्द्वैतायै नमः
६६८ द्वैतवर्जितायै नमः
६६९ अन्नदायै नमः
६७० वसुदायै नमः
६७१ वृद्धायै नमः
६७२ ब्रह्मात्मैक्यस्वरूपिण्यै
नमः
६७३ बृहत्यै नमः
६७४ ब्राह्मण्यै नमः
६७५ ब्राह्म्यै नमः
६७६ ब्रह्मानन्दायै नमः
६७७ बलिप्रियायै नमः
६७८ भाषारूपायै नमः
६७९ बृहत्सेनायै नमः
६८० भावाभावविवर्जितायै
नमः
६८१ सुखाराध्यायै नमः
६८२ शुभकर्यै नमः
६८३ शोभनायै सुलभायै गत्यै
नमः
६८४ राजराजेश्वर्यै नमः
६८५ राज्यदायिन्यै नमः
६८६ राज्यवल्लभायै नमः
६८७ राजत्कृपायै नमः
६८८ राजपीठनिवेशितनिजा-
श्रितायै नमः
६८९ राज्यलक्ष्म्यै नमः
६९० कोशनाथायै नमः
६९१ चतुरङ्गबलेश्वर्यै नमः
६९२ साम्राज्यदायिन्यै नमः

६९३ ॐ सत्यसन्धायै नमः
६९४ सागरमेखलायै नमः
६९५ दीक्षितायै नमः
६९६ दैत्यशमन्यै नमः
६९७ सर्वलोकवशंकर्यै नमः
६९८ सर्वार्थदात्र्यै नमः
६९९ सावित्र्यै नमः
७०० सच्चिदानन्दरूपिण्यै नमः
७०१ देशकालापरिच्छिन्नायै नमः
७०२ सर्वगायै नमः
७०३ सर्वमोहिन्यै नमः
७०४ सरस्वत्यै नमः
७०५ शास्त्रमय्यै नमः
७०६ गुहाम्बायै नमः
७०७ गुह्यरूपिण्यै नमः
७०८ सर्वोपाधिविनिर्मुक्तायै नमः
७०९ सदाशिवपतिव्रतायै नमः
७१० संप्रदायेश्वर्यै नमः
७११ साधुने नमः
७१२ यै नमः
७१३ गुरुमण्डलरूपिण्यै नमः
७१४ कुलोत्तीर्णायै नमः
७१५ भगाराध्यायै नमः
७१६ मायायै नमः
७१७ मधुमत्यै नमः
७१८ मह्यै नमः
७१९ गणाम्बायै नमः
७२० गुह्यकाराध्यायै नमः
७२१ ॐ कोमलाङ्ग्यै नमः
७२२ गुरुप्रियायै नमः
७२३ स्वतन्त्रायै नमः
७२४ सर्वतन्त्रेश्यै नमः
७२५ दक्षिणामूर्तिरूपिण्यै नमः
७२६ सनकादिसमाराध्यायै नमः
७२७ शिवज्ञानप्रदायिन्यै नमः
७२८ चित्कालायै नमः
७२९ आनन्दकलिकायै नमः
७३० प्रेमरूपायै नमः
७३१ प्रियंकर्यै नमः
७३२ नामपारायणप्रीतायै नमः
७३३ नन्दिविद्यायै नमः
७३४ नटेश्वर्यै नमः
७३५ मिथ्याजगदधिष्ठानायै नमः
७३६ मुक्तिदायै नमः
७३७ मुक्तिरूपिण्यै नमः
७३८ लास्यप्रियायै नमः
७३९ लयकर्यै नमः
७४० लज्जायै नमः
७४१ रम्भादिवन्दितायै नमः
७४२ भवदावसुधावृष्ट्यै नमः
७४३ पापारण्यदवानलायै नमः
७४४ दौर्भाग्यतूलवातूलायै नमः
७४५ जराध्वान्तविप्रभायै नमः
७४६ भाग्याब्धिचन्द्रिकायै नमः
७४७ भक्तचित्तकेकिघना-घनायै नमः

७४८ ॐ रोगपर्वतदम्भोलये नमः
७४९ मृत्युदारुकुठारिकायै नमः
७५० महेश्वर्यै नमः
७५१ महाकाल्यै नमः
७५२ महाग्रासायै नमः
७५३ महाशनायै नमः
७५४ अपर्णायै नमः
७५५ चण्डिकायै नमः
७५६ चण्डमुण्डासुरनिषूदिन्यै नमः
७५७ क्षराक्षरात्मिकायै नमः
७५८ सर्वलोकेश्यै नमः
७५९ विश्वधारिण्यै नमः
७६० त्रिवर्गदात्र्यै नमः
७६१ सुभगायै नमः
७६२ त्र्यम्बकायै नमः
७६३ त्रिगुणात्मिकायै नमः
७६४ स्वर्गापवर्गदायै नमः
७६५ शुद्धायै नमः
७६६ जपापुष्पनिभाकृतये नमः
७६७ ओजोवत्यै नमः
७६८ द्युतिधरायै नमः
७६९ यज्ञरूपायै नमः
७७० प्रियव्रतायै नमः
७७१ दुराराध्यायै नमः
७७२ दुराधर्षायै नमः
७७३ पाटलीकुसुमप्रियायै नमः
७७४ महत्यै नमः
७७५ मेरुनिलयायै नमः
७७६ मन्दारकुसुमप्रियायै नमः
७७७ ॐ वीराराध्यायै नमः
३७८ विराड्रूपायै नमः
७७९ विरजसे नमः
७८० विश्वतोमुख्यै नमः
७८१ प्रत्यग्रूपायै नमः
७८२ पराकाशायै नमः
७८३ प्राणदायै नमः
७८४ प्राणरूपिण्यै नमः
७८५ मार्तण्डभैरवाराध्यायै नमः
७८६ मन्त्रिणीन्यस्तराज्यधुरे नमः
७८७ त्रिपुरेश्यै नमः
७८८ जयत्सेनायै नमः
७८९ निस्त्रैगुण्यायै नमः
७९० परापरायै नमः
७९१ सत्यज्ञानानन्दरूपायै नमः
७९२ सामरस्यपरायणायै नमः
७९३ कपर्दिन्यै नमः
७९४ कलामालायै नमः
७९५ कामदुहे नमः
७९६ कामरूपिण्यै नमः
७९७ कलानिधये नमः
७९८ काव्यकलायै नमः
७९९ रसज्ञायै नमः
८०० रसशेवधये नमः
८०१ पुष्टायै नमः
८०२ पुरातनायै नमः
८०३ पूज्यायै नमः
८०४ पुष्करायै नमः
८०५ पुष्करेक्षणायै नमः

८०६ ॐ परस्मै ज्योतिषे नमः
८०७ परस्मै धाम्ने नमः
८०८ परमाणवे नमः
८०९ परात्परायै नमः
८१० पाशहस्तायै नमः
८११ पाशहन्त्र्यै नमः
८१२ परमन्त्रविभेदिन्यै नमः
८१३ मूर्तायै नमः
८१४ अमूर्तायै नमः
८१५ अनित्यतृप्तायै नमः
८१६ मुनिमानसहंसिकायै नमः
८१७ सत्यव्रतायै नमः
८१८ सत्यरूपायै नमः
८१९ सर्वान्तर्यामिन्यै नमः
८२० सत्यै नमः
८२१ ब्रह्माण्यै नमः
८२२ ब्रह्मणे नमः
८२३ जनन्यै नमः
८२४ बहुरूपायै नमः
८२५ बुधार्चितायै नमः
८२६ प्रसवित्र्यै नमः
८२७ प्रचण्डायै नमः
८२८ आज्ञायै नमः
८२९ प्रतिष्ठायै नमः
८३० प्रकटाकृत्यै नमः
८३१ प्राणेश्वर्यै नमः
८३२ प्राणदात्र्यै नमः
८३३ पञ्चाशत्पीठरूपिण्यै नमः
८३४ विशृङ्खलायै नमः
८३५ विविक्तस्थायै नमः
८३६ ॐ वीरमात्रे नमः
८३७ वियत्प्रसुवे नमः
८३८ मुकुन्दायै नमः
८३९ मुक्तिनिलयायै नमः
८४० मूलविग्रहरूपिण्यै नमः
८४१ भावज्ञायै नमः
८४२ भवरोगघ्न्यै नमः
८४३ भवचक्रप्रवर्तिन्यै नमः
८४४ छन्दःसारायै नमः
८४५ शास्त्रसारायै नमः
८४६ मन्त्रसारायै नमः
८४७ तलोदर्यै नमः
८४८ उदारकीर्त्यै नमः
८४९ उद्दामवैभवायै नमः
८५० वर्णरूपिण्यै नमः
८५१ जन्ममृत्युजरातप्तजन-
विश्रान्तिदायिन्यै नमः
८५२ सर्वोपनिषदुद्घुष्टायै
नमः
८५३ शान्त्यतीतकलात्मिकायै
नमः
८५४ गम्भीरायै नमः
८५५ गगनान्तःस्थायै नमः
८५६ गर्वितायै नमः
८५७ गानलोलुपायै नमः
८५८ कल्पनारहितायै नमः
८५९ काष्ठायै नमः
८६० अकान्तायै नमः
८६१ कान्तार्धविग्रहायै नमः
८६२ कार्यकारणनिर्मुक्तायै
नमः

८६३ ॐ कामकेलितरङ्गितायै नमः
८६४ कनत्कनकताटङ्कायै नमः
८६५ लीलाविग्रहधारिण्यै नमः
८६६ अजायै नमः
८६७ क्षयविनिर्मुक्तायै नमः
८६८ मुग्धायै नमः
८६९ क्षिप्रप्रसादिन्यै नमः
८७० अन्तर्मुखसमाराध्यायै नमः
८७१ बहिर्मुखसुदुर्लभायै नमः
८७२ त्रय्यै नमः
८७३ त्रिवर्गनिलयायै नमः
८७४ त्रिस्थायै नमः
८७५ त्रिपुरमालिन्यै नमः
८७६ निरामयायै नमः
८७७ निरालम्बायै नमः
८७८ स्वात्मारामायै नमः
८७९ सुधासृत्यै नमः
८८० संसारपङ्कनिर्मग्नसमुद्धरणपण्डितायै नमः
८८१ यज्ञप्रियायै नमः
८८२ यज्ञकर्त्र्यै नमः
८८३ यजमानस्वरूपिण्यै नमः
८८४ धर्माधारायै नमः
८८५ धनाध्यक्षायै नमः
८८६ धनधान्यविवर्धिन्यै नमः
८८७ विप्रप्रियायै नमः
८८८ विप्ररूपायै नमः
८८९ विश्वभ्रमणकारिण्यै नमः
८९० ॐ विश्वग्रासायै नमः
८९१ विद्रुमाभायै नमः
८९२ वैष्णव्यै नमः
८९३ विष्णुरूपिण्यै नमः
८९४ अयोनये नमः
८९५ योनिनिलयायै नमः
८९६ कूटस्थायै नमः
८९७ कुलरूपिण्यै नमः
८९८ वीरगोष्ठीप्रियायै नमः
८९९ वीरायै नमः
९०० नैष्कर्म्यायै नमः
९०१ नादरूपिण्यै नमः
९०२ विज्ञानकलनायै नमः
९०३ कल्यायै नमः
९०४ विदग्धायै नमः
९०५ बैन्दवासनायै नमः
९०६ तत्त्वाधिकायै नमः
९०७ तत्त्वमय्यै नमः
९०८ तत्त्वमर्थस्वरूपिण्यै नमः
९०९ सामगानप्रियायै नमः
९१० सौम्यायै नमः
९११ सदाशिवकुटुम्बिन्यै नमः
९१२ सव्यापसव्यमार्गस्थायै नमः
९१३ सर्वापद्विनिवारिण्यै नमः
९१४ स्वस्थायै नमः
९१५ स्वभावमधुरायै नमः
९१६ धीरायै नमः
९१७ धीरसमर्चितायै नमः
९१८ चैतन्यार्घ्यसमाराध्यायै नमः

११९ ॐ चैतन्यकुसुमप्रियायै नमः
१२० सदोदितायै नमः
१२१ सदातुष्टायै नमः
१२२ तरुणादित्यपाटलायै नमः
१२३ दक्षिणादक्षिणाराध्यायै नमः
१२४ दरस्मेरमुखाम्बुजायै नमः
१२५ कौलिनीकेवलायै नमः
१२६ अनर्घ्यकैवल्यपददायिन्यै नमः
१२७ स्तोत्रप्रियायै नमः
१२८ स्तुतिमत्यै नमः
१२९ श्रुतिसंस्तुतवैभवायै नमः
१३० यशस्विन्यै नमः
१३१ मानवत्यै नमः
१३२ महेश्यै नमः
१३३ मङ्गलाकृत्यै नमः
१३४ विश्वमात्रे नमः
१३५ जगद्धात्र्यै नमः
१३६ विशालाक्ष्यै नमः
१३७ विरागिण्यै नमः
१३८ प्रगल्भायै नमः
१३९ परमोदारायै नमः
१४० परामोदायै नमः
१४१ मनोमय्यै नमः
१४२ व्योमकेश्यै नमः
१४३ विमानस्थायै नमः
१४४ वज्रिण्यै नमः
१४५ वामकेश्वर्यै नमः
१४६ पञ्चयज्ञप्रियायै नमः
१४७ ॐ पञ्चप्रेतमञ्चाधिशायिन्यै नमः
१४८ पञ्चम्यै नमः
१४९ पञ्चभूतेश्यै नमः
१५० पञ्चसङ्ख्योपचारिण्यै नमः
१५१ शाश्वत्यै नमः
१५२ शाश्वतैश्वर्यायै नमः
१५३ शर्मदायै नमः
१५४ शंभुमोहिन्यै नमः
१५५ धरायै नमः
१५६ धरसुतायै नमः
१५७ धन्यायै नमः
१५८ धर्मिण्यै नमः
१५९ धर्मवर्धिन्यै नमः
१६० लोकातीतायै नमः
१६१ गुणातीतायै नमः
१६२ सर्वातीतायै नमः
१६३ शमात्मिकायै नमः
१६४ बन्धूककुसुमप्रख्यायै नमः
१६५ बालायै नमः
१६६ लीलाविनोदिन्यै नमः
१६७ सुमङ्गल्यै नमः
१६८ सुखकर्यै नमः
१६९ सुवेषाढ्यायै नमः
१७० सुवासिन्यै नमः
१७१ सुवासिन्यर्चनप्रीतायै नमः
१७२ आशोभनायै नमः
१७३ शुद्धमानसायै नमः
१७४ बिन्दुतर्पणसंतुष्टायै नमः

९७५ ॐ पूर्वजायै नमः
९७६ त्रिपुराम्बिकायै नमः
९७७ दशमुद्रासमाराध्यै नमः
९७८ त्रिपुराश्रीवशंकर्यै नमः
९७९ ज्ञानमुद्रायै नमः
९८० ज्ञानगम्यायै नमः
९८१ ज्ञानज्ञेयस्वरुपिण्यै नमः
९८२ योनिमुद्रायै नमः
९८३ त्रिखण्डेश्यै नमः
९८४ त्रिगुणायै नमः
९८५ अम्बायै नमः
९८६ त्रिकोणगायै नमः
९८७ अनघायै नमः
९८८ अद्भुतचारित्रायै नमः
९८९ वाञ्छितार्थप्रदायिन्यै नमः
९९० अभ्यासातिशयज्ञातायै नमः
९९१ ॐ षडध्वातीतरूपिण्यै नमः
९९२ अव्याजकरुणामूर्तये नमः
९९३ अज्ञानध्वान्तदीपिकायै नमः
९९४ आबालगोपविदितायै नमः
९९५ सर्वानुल्लङ्घ्यशासनायै नमः
९९६ श्रीचक्रराजनिलयायै नमः
९९७ श्रीमत्त्रिपुरसुन्दर्यै नमः
९९८ श्रीशिवायै नमः
९९९ शिवशक्त्यैक्यरूपिण्यै नमः
१००० ललिताम्बिकायै नमः



शारदा-गौरव-ग्रन्थमाला ...५८

भासोऽहासः ।

नाटककारः

डॉ. ग. बा. पळसुले

★

मूल्यं ५ रूप्यकाः

प्रकाशकः
पं. वसन्त अनन्त गाडगीळ
शारदा-गौरव-ग्रन्थ-माला
४२५ सदाशिव पेठ, पुण्यपत्तनम् ४११ ०३०

卐

सर्वाधिकाराः प्रकाशकायत्ताः

卐

★

मुद्रकः
पं. वसन्त अनन्त गाडगीळ
श्रीशारदा-मुद्रण-सिद्धि-मन्दिरम्
४२५ सदाशिव पेठ, पुण्यपत्तनम् ३०
यशवन्त-मुद्रणालयः
१८३५ सदाशिव पेठ, पुण्यपत्तनम् ३०

भासोऽहासः ।

प्रथमोऽङ्कः ।

[स्थानम् — महाकवेः भासस्य गृहम् । उपस्थानशाला । एकस्मिन् कोणे नटराजस्य मूर्तिः । भित्तौ चित्राणि, प्रमुखत एव च शारदायाः चित्रम् । एकस्मिन् कोणे वीणा-मृदङ्गौ, अपरत्र चित्रफलकः, वर्तिकाश्च । सुष्ठु रचितानि हस्तलिखित-पुस्तकानि । एकस्मिन् स्थाने भासस्य लेखनस्थानम्, पटलम्, अन्या च लेखनसामग्री । समग्रं वातावरणं समृद्धिं वैदग्ध्यं च द्योतयति ।

ततः प्रविशति भास-पत्नी संगीता । आयुः प्रायः ३५ वर्षाणि ।]

संगीता — चतुरिके ! चतुरिके !

(प्रविश्य)

चतुरिका — इयमहम् अस्मि । आज्ञापयतु स्वामिनी ।

संगीता — पश्य तावत् आर्यपुत्रः उत्थितो वा, न वा । उषः-कालोत्थायी सः कथमिव अद्यापि शयनं न जहाति ?

चतुरिका — ननु स्वामिनि! पूर्वेद्युः नाटक-दर्शनार्थं गतेन स्वामिना विलम्बेन सुप्तम् ।

संगीता — युज्यते । ममैव हृदयं त्वरते इव। गच्छ। स्वं नियोगम् अनुतिष्ठ ।

चतुरिका — तथा । (निष्क्रान्ता । संगीता शालायां तत्र तत्र गत्वा आसनानि सज्जीकरोति, चित्राणि च मार्ष्टि । एवं मार्जन-क्रमेण शारदायाः चित्रपुरतः प्राप्य, अञ्जलिं बद्ध्वा —)

संगीता — भगवति शारदे ! एवमेव आर्यपुत्रस्य सदैव शिवानु-ध्यानपरा भव । तव प्रसादं विहाय किमन्यत् अस्माभिः प्रार्थनीयम् ? तव कृपावशात् आर्यपुत्रस्य प्रतिभा एवमेव अनिशं विजृम्भताम् ।

(कतिचित् पदानि गत्वा पुनः स्थित्वा —)

अद्य सभायां स्वयं महाराजः आर्यपुत्रं गौरवोपाधि-वितरणेन संमान-यिष्यति । यदाप्रभृति पूर्वेद्युः नाटकप्रयोगावसरे राज्ञा एवम् उद्घोषि-

तम्, तत आरभ्य कृतार्थमिव आत्मानं पश्यामि । ननु पत्युः सार्वजनीनात् गुणग्रहणोत्सवात् ऋते किमन्यत् अस्माकं स्त्रीणां प्रीतिस्थानम् ?

(प्रविश्य)

चतुरिका — स्वामिनि ! प्रागेव उत्थितः अस्ति स्वामी । किमपि चिन्तनपर इव आसीत् । 'अयम् अहम् आगच्छामि' इति संदिष्टम् अस्ति स्वामिना ।

संगीता — भवतु । अत्रैव नाथं परिपालयिष्यामि ।

(चतुरिका निष्क्रान्ता। संगीता भासस्य पुस्तकानि, लेखन-सामग्रीं च स्वच्छीकर्तुं यथायोग्यं च आरचयितुं पुनरपि आरभते । अत्रान्तरे दासी पुनरपि प्रविशति ।)

चतुरिका — स्वामिनि ! कोऽपि युवा द्वारि उपस्थितोऽस्ति। स्वामिदर्शनं प्रार्थयते ।

संगीता — युवेति भणसि ? कीदृशः सः ?

चतुरिका — स्यात् पञ्चदश-षोडश-वर्षीयः । किं च, नायम् अत्रस्थः, आगन्तुक इव भाति ।

संगीता — कथं त्वया ज्ञातम् ?

चतुरिका — किमत्र ज्ञातव्यम् ? तस्य वेष-वैचित्र्यात् ज्ञातम्, भाषणप्रकाराच्च ।

संगीता — साधु ! चतुरिका खलु त्वम् । ततस्ततः ?

चतुरिका — मां पृष्टवान् (तमनुकुर्वती) 'अपि उदयनकथा-कोविदस्य तत्रभवतः महाकवेः श्रीभासस्य इदमेव गृहम् ?' मया 'तथा' इत्युक्ते भणति, 'कच्चित् कविराजः दर्शनं वितरिष्यति ?'

संगीता — ततस् त्वया किम् उक्तम् ?

चतुरिका — मया उक्तम् 'नायं दर्शनावसरः । अयं खलु स्वामिनः प्रतिभा-साधनस्य अवसरः । पुनः कदाचित् आगच्छ ।'

संगीता — ततस्ततः ?

चतुरिका — ततो भणति, 'भवति ! मा एवं निष्ठुरा भूः । योजन-शतानि अतिक्रम्य दर्शनार्थी आगतोऽस्मि ।'

संगीता — एवं भणति ? प्रवेशय तर्हि तम् । मा भूत् तपस्वी निराशः ।

चतुरिका — तथा। (निष्क्रम्य, अध्वग-वेषेण शारद्वतेन सह पुनः प्रविश्य, शारद्वतम् उद्दिश्य) इयम् अस्माकं स्वामिनी। उपसर्प।

शारद्वतः — भद्रे! वन्दे।

संगीता — चिरं जीव, वत्स! उपविश। (स संकुचति।) अयि, उपविश। अलं संकोचेन। (शारद्वतः उपविशति।)

संगीता — किंनामधेयो वत्सः? कुतो वत्सः? किं वा एवम् अति-दूरागमने प्रयोजनम्?

शारद्वतः — शृणोतु आर्या। अहमस्मि शारद्वतो नाम उज्जयि-नीयः। पित्रा यथाकालम् अहं गुरुगृहं प्रवेशितः। कतिचित् वर्षाणि मया तत्र अतिवाहितानि। अतितीव्राऽस्ति मे स्मृतिः। सकृत्-पाठीव अस्मि। न तु शास्त्राभ्यासे रमते मे मनः।

संगीता — एवम्? कुत्र तर्हि रमते?

शारद्वतः — भवति! काव्यालापेषु। विशेषतश्च ...

चतुरिका — स्वामिनि! कोमलमतिः इव आर्यः।

संगीता — चतुरिके! मा एनम् अन्तरा प्रतिबधान। स्वैरं वक्तु शारद्वतः।

शारद्वतः — विशेषतश्च नाटक-विरचने रसं गृह्णामि।

संगीता — अम्मो! समान-व्यसनौ अतिथि-यजमानौ!

शारद्वतः — सोहं विगताध्ययनरुचिः असमाप्ते एव विद्याध्ययने गुरुभिः गृहं प्रतिप्रेषितः। अत्रान्तरे मया भावि-जीवन-विषयकः निर्णयः कृत आसीत्। गृहं गतेन मया निवेदितः स निर्णयः। श्रुतमात्रे तस्मिन् अस्माकं स जमदग्निः ...

संगीता — (साश्चर्यम्) जमदग्निः?

शारद्वतः — (लज्जितः) नाम अस्माकं पितृचरणाः। तैः द्वारं प्रति अङ्गुलि-निर्देशः कृतः, उक्तं च, 'इदमस्ति उद्घाटितं द्वारम्। अनि-रुद्धाः सन्ति दश दिशः। यत्र कुत्रापि गच्छ। वेदाचार्याणाम् इदं गृहम्, न शैलूषाचार्याणाम्।'

संगीता — अहह। निष्कासितस् तर्हि वत्सः स्वगृहात्। ततस्ततः?

शारद्वतः — अस्माकं कृते तावत् अनुकूल एवासीत् स अर्धचन्द्रः। तत्र गृहे वस्तुम् इच्छत्येव कः? उज्जयिन्यां तेषु तेषु उत्सवेषु दृष्टानि

सन्ति मया नैकानि नाटकानि । न तु एकमपि तत्रभवतो भासस्य नाटक-सदृशम् । गृहीतोऽस्मि स्वयं नाट्यलेखन-स्वप्नेन । कियन्तमपि कालं ममायम् अभिलाषः, तत्रभवतः शिक्षया नाट्य-लेखनम् अभ्यस्यामि इति । गृहात् निर्वासितमात्रेण मया दिष्टया एतन्नगरगामी सार्थो लब्धः । तेन सह च यथाकथंचित् अत्र प्राप्तः ।

संगीता — अहो ते परिश्रमः ! अहो तितिक्षा ! अथ पृच्छामि, कविराजः त्वां शिष्यत्वेन स्वीकरिष्यति इति कथं त्वया ज्ञातम् ? अपि तस्य स्वभाव-विशेषे त्वं किमपि जानासि ?

शारद्वतः — आर्ये ! कथमिव तत्रभवतः स्वभाव-विषये अहं साक्षात् किमपि जानीयाम् ? किं तु दृष्टानि सन्ति मया तस्य नाटकानि । शैलीं च कवेः शीलानुगामिनीम् आहुः । किं च तर्कयामि ...

संगीता — किं तर्कयसि ?

शारद्वतः — तर्कयामि यत् न तादृशः आकृतिविशेषः प्रत्याख्यान-रूक्षो भविष्यति, यस्तथा नाम सुभगाकृतिः, मधुराभाषी, प्रिय-दर्शनः, सानुक्रोशः, चतुरः, अगर्वः, दाक्षिण्य-परवशः ...

(सहसा प्रविश्य)

भासः — प्रिये ! लब्धम् । लब्धम् उत्तरम् । (शारद्वतं दृष्ट्वा) अये, को न्वयं प्राघूर्णिकः ?

संगीता — (सपरिहासम्) स्वागतं नाट्याचार्यस्य । जयतु नाट्याचार्यः ।

भासः — आर्ये ! को न्वयम् अद्य अपूर्वः स्वागत-विधिः ? ननु नूतनोऽयं समुदाचारः ।

संगीता — दिष्टया वर्धते आर्यपुत्रः प्रथम-शिष्य-लाभेन । शिष्य-सापेक्षो हि आचार्य-शब्दः । एष उपस्थितोऽस्ति भवतः प्रथमः शिष्यः । संभावयतु वत्सम् आर्यपुत्रः । इयम् अहम् आगतैव । (निष्क्रान्ता ।)

शारद्वतः — प्रसीदतु कविराजः । शारद्वतोऽहम् उज्जयिनीतः शिष्यभावेन उपसन्नोऽस्मि । अनुगृह्यताम् अयं जनः स्वीकरणेन । (पादयोः पतति ।)

भासः — उत्तिष्ठ । वत्स ! उत्तिष्ठ । उपविश । (शारद्वतः उत्थाय उपविशति ।) किं मत्सकाशात् अध्येतुम् इच्छसि ?

शारद्वतः — भवता अध्यापितः नाट्य-लेखन-कलाम् अधिगन्तुम् उत्सहे ।

भासः — अहो नु खलु भोः ।

शारद्वतः — किमत्र आश्चर्यम् ?

भासः — कुतस्ते इयं बुद्धिः समुत्पन्ना ? नेयं विद्या अर्थकरी, न कीर्तिकरी ।

शारद्वतः — ननु भवान् अपि एवं वक्ति इति ...

भासः — (विहस्य) मा मम उदाहरणेन वञ्चितो भूः । न सर्व एव कवयो भाग्यवन्तः । विरला हि महाराज-सदृशाः रसिकाः राजानः, विशेषतश्च नाट्ये बद्धरुचयः । तद् यदि अर्थकामोऽसि, यशो वा वाञ्छसि, तर्हि शास्त्राणि अधीष्व । पण्डितो भव । लप्स्यसे राजाश्रयम् ।

शारद्वतः — असाध्यो रोगी इव वैद्यैः, पूर्वमेव परित्यक्तोऽस्मि गुरुभिः । मयापि जन्मान्तर-साध्यत्वेन सुरक्षितोऽस्ति शास्त्राभ्यासः ।

भासः — अथ धनागमः ?

शारद्वतः — लभ्यते, यदि विधि-लिखितं स्यात् । न वा लभ्येत । यत्सत्यम्, नाट्यलेखनं विहाय नान्यत् किमपि मे प्रतिभाति ।

भासः — एवं नाम आविष्टोऽसि नाट्य-लेखन-ग्रहेण ! पुनरपि चिन्तय । ततो निर्णय ।

शारद्वतः — किं भोः कश्चिद् लाभालाभौ विगणय्य प्रेमपतितो भवति ?

भासः — (विहस्य) अनुत्तरम् उक्तम् । (स्मृतिम् अभिनीय) अथ वा सर्वं तावत् तिष्ठतु । कदा त्वम् अत्र नगरं प्राप्तः ?

शारद्वतः — पूर्वेद्युः सायम् । दिष्टया समयागतः 'अविमारक'स्य प्रयोगं द्रष्टुम् अशक्नवम् ।

भासः — किं पूर्वेद्युः त्वं तत्र उपस्थित आसीः ?

शारद्वतः — आम् । तत्रैव मया भवान् प्रथमं दृष्टः ।

भासः — अथ कुत्र भुक्तम् ?

शारद्वतः — प्रयोग-दर्शनेन अपहृत-चित्तत्वात् भोजनं नैव विभावितम् ।

भासः — कुत्र सुप्तम् ?

शारद्वतः — समीपस्थे कार्तिकेय-मन्दिरे ।

भासः — अद्य प्रातराशः कुत्र भुक्तः ?

शारद्वतः — अत्र आगमनोत्सुकेन मया स विस्मृत एव ।

भासः — धिक्, मूर्ख ! तत् किं स्पष्टं न वदसि, पूर्वेद्युः प्रभृति अभुक्तोऽस्मि इति ? कः कोऽत्र भोः ?

(ततः प्रविशति प्रातराश-हस्ता संगीता ।)

संगीता — (शारद्वतम् उपगम्य) गृहाण, वत्स! ननु क्षुधितः स्याः। अलं संकोचेन । (स भोक्तुं प्रारभते ।)

भासः — अयि, कथं नु त्वया मम हृद्गतं मत्तोऽपि पूर्वं ज्ञातम्।

संगीता — एतावन्ति वर्षाणि आर्यपुत्रेण सह नीतानि । किम् इदमपि न उत्पश्येयम् ? (उपगम्य भासस्य समीपे उपविशति । इतःपरं तयोः संवादः जनान्तिकं भवति ।)

भासः — यदि आर्या एवं मम भावज्ञा, तर्हि कथयतु यद् अन्यदपि मम मनसि वर्तते ।

संगीता — कथयानि ?

भासः — कथय ।

संगीता — आर्यपुत्रस्य अयम् अभिप्रायः, शिष्यत्वेन स्वीकृत्य एष वत्सः गृहे एव स्थापनीय इति ।

भासः — कथम् ! इदमपि ऊहितम् ! भवतु, किं वा भवती मन्यते ?

संगीता — अपि कदाचित् मया आर्यपुत्रस्य संकल्पः अननुमतः ?

भासः — अनुमन्यसे तर्हि ?

संगीता — यत्सत्यं ममैव हृदयेन संमन्त्र्य इव आर्यपुत्रेण इदं चिन्तितम् ।

भासः — प्रीतोऽस्मि तव आनुकूल्येन । अहो स्वर-संवादित्वम् आवयोर् हृदय-वीणयोः ।

संगीता — नास्ति आवयोः संतान-लाभः भाग्य-लिखितः । तत् पुत्रीभूय तिष्ठतु अयम् अत्रैव ।

भासः — साधु उक्तम्। (शारद्वतम् उद्दिश्य) अयि, समाप्तम्?

शारद्वतः — अथ किम्?

भासः — शक्यम् अधुना भाषितुम्। न हि पिपासितेन इव बुभुक्षितेनापि काव्यरसः पीयते।

शारद्वतः — आज्ञापयतु भवान्।

भासः — कथय तावत्। किम् एतावत्पर्यन्तं त्वया पठितम्? अपि किंचित् लिखितम्?

शारद्वतः — अस्ति तावत् कश्चित् शास्त्राणां मुख-परिचयः। स तु अत्र अनिर्देश्य एव। रामायण-महाभारतयोस्तु विशेषा मे रुचिः। कथा-वाङ्मयमपि हरति मे मनः। लोककथासु अपि आत्त-रसोऽस्मि।

भासः — अथ नाटचम् अन्तरेण?

शारद्वत — अभ्यस्तानि सन्ति मया शिलालेः नटसूत्राणि। भरत-मुनेः नाटचशास्त्रमपि मया नैकवारम् अधीतम्। किं तु, अपि सत्यं कथयानि?

भासः — एतावत्-कालपर्यन्तम् असत्यमेव कथितम्?

शारद्वत — (विहस्य) न तथा। केवलं वाचोयुक्तिः सा।

भासः — भवतु। कथय।

शारद्वत — इदमेव अवगतं यत् न नाटचशास्त्रम् अधीत्य कश्चित् नाटच-लेखनं कर्तुं शक्नोति। (उभौ हसतः।)

भासः — तेन हि विदित-वेदितव्य एवासि। एकं तु वक्तव्यम्। अन्यत् किमपि पठ, मा वा पठ। एकं ग्रन्थं तु अवश्यम् अधीष्व।

शारद्वतः — (सौत्सुक्यम्) कोऽसौ ग्रन्थः?

भासः — जीवन-ग्रन्थः।

शारद्वतः — (किमपि अपूर्वं शृण्वन्निव भासं कुतूहलपूर्णया दृष्टचा प्रेक्षमाण आस्ते।)

भासः — शारद्वत! नाटचं मनुष्यस्य निखिलं जीवनं व्याप्य स्थितमस्ति। केवलम् अमोघ-दर्शिनी दृष्टिः अपेक्ष्यते, या तत् लक्ष्यी-कुर्यात्। तत् न केवलं राजप्रासादे वर्तते, किं तु पांशुलपादस्य हालिकस्य कुटचामपि। न केवलं महापुरुषाणां जीवने, किं तु युष्मद्-अस्मदादीनां

जीवनेऽपि। यदि तव हृदयं संवेदनाक्षमं स्यात्, करुणा-मसृणं स्यातं, तर्हि शक्ष्यसि त्वं जगति ओतं प्रोतं च इदं नाट्यं संवेत्तुम्।

शारद्वत — (भारित इव) एवं भणति भवान्?

भासः — यदि एतादृशं किमपि नाट्यबीजं कस्यापि लब्ध-नाट्य-प्रतिभस्य पुरुषस्य मनसि स्फुरेत्, तर्हि तत् स्वयमेव अङ्कुरितम्, आकारितं च भवेत्। नाटकं न लेखकः लिखति। स्वयं नाटकमेव लेखकेन आत्मानं लेखयतीव। नेयं नाट्यलेखनविद्या अध्यापनेन लब्धव्या। नाट्यात्मनि पुरुषे इयं स्वभावादेव विकसति। कथमिति पृच्छ।

शारद्वतः — कथयतु आचार्यः।

भासः — यथा प्रेमपतितस्य जिह्वायां प्रियाराधनचतुरा पदावलिः।

(उभौ हसतः।)

संगीता — अम्मो! आर्यपुत्रोऽपि शारद्वतः संवृत्तः!

भासः — अतोऽहं ब्रवीमि, नाहम् अध्यापयिष्यामि इव। त्वम् अत्र वस। मम लेखन-पद्धतिम् अवलोकय। अहं काले काले त्वया सह चर्चां करिष्यामि। त्वया लिखितं परीक्षिष्ये। एवं स्वयमेव त्वं कालेन अध्येष्यसे।

शारद्वतः — यथेच्छन्ति आचार्यचरणाः।

भासः — अन्यद् एकम्। आत्मीयमेव गेहं विद्धि। मा आत्मानं परकीयं मन्यस्व। यथा अन्यो गृहजनः, तथैव निवस।

संगीता — चतुरिके! चतुरिके!

(प्रविश्य)

चतुरिका — इयमस्मि। को नियोगः अनुष्ठीयताम्?

संगीता — शारद्वतम् अन्तर्गृहं प्रवेशय। अध्वश्रमखिन्नोऽस्ति सः। तस्य स्नानादिव्यवस्थां कुरु। अद्यप्रभृति सः अत्रैव वसिष्यति।

चतुरिका — तथा। (निष्क्रान्ता। तामनु शारद्वतश्च।)

संगीता — शोभनोऽस्ति वत्सः। मन्ये न केवलं शिष्यभावम्, पुत्रत्वमपि सुष्ठु निर्वक्ष्यति।

भासः — न जाने कस् तावत् जन्मान्तर-संबन्धो वर्तते।

संगीता — (सहसा स्मृतिम् अभिनीय) आर्यपुत्र! त्वं तदानीं 'लब्धम्। लब्धम् उत्तरम्' इति वदन् प्रविष्टः। किं तत्?

भासः — प्रिये ! जानासि एव त्वम्, यद् एतान् दिवसान् विचारमग्नोऽस्मि । किमपि नवीनमेव स्फुरति ।

संगीता — सामान्यतो जानामि । न तु विशेषेण किं । नु खलु तत् ?

भासः — एतावत्कालपर्यन्तं मया नाटकानि लिखितानि । प्रायेण प्रीतिविषयकाणि । वासवदत्ता-वत्सराजयोः प्रेम । कुरङ्गी-अविमारकयोः प्रेम । वसन्तसेना-चारुदत्तयोः प्रेम । स्त्रीपुंसयोः प्रथमानुरागो नाम किमपि अपार्थिवं रत्नम् । कियत् कियन्नु तद् उद्गातव्यम् ? स्थाने एव अहमहमिकया तत् पूर्वैः नूतनैश्च कविभिः गीतम्, कल्पान्तं यावत् गास्यते च । न च अस्माकं कथाभाण्डागारे किमपि वैरल्यं नाट्यरूपेण उपन्यासक्षमाणां प्रेम-कथानाम् । सा पतिव्रतानाम् आदर्शभूता वृत-संवरणा तपती । सा वशीकृत-पुरूरवाः, चिरयौवना, सदाकामिनी दिव्याङ्गना उर्वशी । सा यथैव रूपातिशायिनी तथैव व्यवहार-निष्ठुरा, विलोभित-दुःषन्ता, तापस-कन्या शकुन्तला । कियन्त्यपि नाट्यबीज-मौक्तिकानि भारतसागरे शेरते । प्रथमदर्शनोत्थ-प्रेम-पराणि कियन्त्यपि नाटकानि तानि उपजीव्य प्रणेतुं शक्यानि । न तु अधुना तादृशानां नाटकानां विरचने रमते मनः । न हि प्रेमैक-सर्वस्वं जीवितम् ।

संगीता — (सपरिहासम्) – हं ! सदृशमेव इदम् अतिक्रामतो यौवनस्य ।

भासः — न न । अलमेवं वक्तुम् । ननु परिचिताऽसि एव मे स्वाभाव्येन ।

संगीता — जानामि, आर्यपुत्र ! जानामि । क्रीडितं मया ।

भासः — आदित एव न कदापि मया जगतीतलं व्याप्य स्थितं दुःखं विस्मर्तुं पारितम् । कियत् दुःखम् ! कियत् विश्वरूपम् ! कियत् सर्वगामि ! कियत् सूक्ष्मम् ! तस्यां तस्यां परिस्थितौ गीयमानः जीवित-संगीतस्य यः कोऽपि रागो भवतु नाम, मन्ये सर्वत्रैव तत्र दुःखं वादि-स्वरायते ।

संगीता — सत्यम् । नाथ ! सत्यम् । सर्वं दुःखमिति उक्तमेव भगवता गौतमेन ।

भासः — न केवलं सौगतसमयोऽयम् । जन्म-मृत्यु-जरा-व्याधि-दुःखदोषानुदर्शिनाम्, अत एव 'सर्वमेव दुःखं विवेकिनाम्' इति मन्वा-

नानाम् अस्माकम् आस्तिकानामपि अयमेव सिद्धान्तः। सोऽहं मन्ये, किमिति इदं दुःखं नाटकस्य विषयो न भवतु? कुतः सर्वदैव नायिका-नायकयोः संगमान्तेन नाटकेन भवितव्यम्? यदि नाटकं नाम जीवन-प्रतिबिम्बम्, किमिति दुःखमपि न तत्र प्रतिबिम्बितं भवतु? अपि स्मरसि?

संगीता — किमिव?

भासः — आवयोः यवनमित्रम्, स अन्तियोकः योऽत्र पुरा अवसत्? स तावत् वदति स्म, यत् यवनदेशे प्रायः दुःखान्तान्येव नाटकानि भवन्ति। ते किल दुःखं देवतानां क्रोधमूलकं मन्यन्ते।

संगीता — हं। स्मरामि।

भासः — अन्यच्च।

संगीता — किमिति?

भासः — कविपुत्रादीनां नाटकानि त्वया दृष्टानि सन्त्येव। अपि त्वया तत्र एको विशेषः अवधारितः?

संगीता — कोऽसौ?

भासः — तत्र पात्राणि कात्स्न्र्येन एकरसानि भवन्ति। यदि सज्जनः, तर्हि मूर्तिमत् सौजन्यमिव। यदि दुष्टः, तर्हि मूर्तिरिव दुष्टतायाः। किं तु स्थूलमिदं पात्र-लेखनम्। नैते नाटककाराः संभावयन्ति, यत् सज्जनस्यापि मनसि कदाचित् मोहः क्षणमात्रं चोरपदेन प्रविशेत्। समराङ्गणे अनवेक्षित-शस्त्रशतसंप्रहारः कश्चित् साहसिकः गृहे कदाचित् मूषकादपि बिभीयात्। क्रूर-हृदयस्य वा कस्यचित् आयुध-जीविनः लुण्टाकस्य हृदयं क्वचित् असहायस्य बालकस्य दर्शनेन द्रवेदपि। अतीव जटिलं ग्रन्थिलं च मानव-जीवितम्। न तद् एवं सुबोधीकर्तव्यम्। तदेव नाटकम् उच्चकोटिकं स्यात्, यत् जटिलम् इमं मानवस्वभावं याथातथ्येन चित्रयितुं प्रभवेत्। आस्तां तावदेषा कथा। संगीते! अद्य प्रभाते मया किमपि नवीनं स्फुरणम् अनुभूतम्।

संगीता — अम्मो! अद्यैव प्रभाते!

भासः — एवम्। कुतः?

संगीता — तदस्तु। कथय तावत्। (सलाडिमम्) कथय।

भासः –– 'रामायण-महाभारते नाटचीकुरु'। अयम् आदेश इव मया अन्तर्मनसि लब्धः। (आसनात् उत्तिष्ठन्) तं चाहम् अनुष्ठास्यामि। अहं रामायण-महाभारताभ्यां नाटचरूपं प्रदास्यामि। एते आर्षमहाकाव्ये नाम किमपि संभृतं मधु। काऽपि अक्षय्या खनिः नाटचवस्तूनाम्। यत् नाटचम् अद्यावधि केवलं श्रोत्र-विषयोऽस्ति तत् नेत्रगोचरं कारयिष्यामि। यत् पुस्तके निलीनम् अस्ति, तत् रङ्गमञ्चे मूर्तिमत् अवतारयिष्यामि। विशालीकुर्वन्तु जनाः नेत्राणि इदंप्रथमतया रङ्ग-मञ्चे आविर्भवत् इदं महानाटचं साक्षात् अवलोकयितुम्। अहं रामायण-महाभारते रङ्गभूमौ अवतारयिष्यामि। किं तु यथा अहं ते पश्यामि, तथा। यथा अहम् ते अवगच्छामि, तथा। मम कल्पनानुसारम्। यथा पात्राणि स्वाभाविकतराणि भविष्यन्ति, सचेतनतराणि भविष्यन्ति, सूक्ष्मतराणि भविष्यन्ति, मानवतराणि भविष्यन्ति। इदं रामायण-महाभारतयोः नाटचीकरणमेव इदानीं मम जीवित-कार्यं भविष्यति। कथं वा भवती मन्यते ?

संगीता –– (सपरिहासम्) – ननु लेखकेन केवलम् आत्मनिष्ठेन भवितव्यम् इति भवान् वदति, तत् कुतो मद्वचनस्य अवसरः ?

भासः –– (सपरिहासम्) – ननु, अत एव पृच्छामि। किं त्वं मत्तोऽपि भिन्ना ?

संगीता — (हसन्ती) अलम्। अलम्। बहु मानिताऽस्मि प्रियवादिना आर्यपुत्रेण।

भासः — तेन हि ब्रूहि तावत्।

संगीता — नूनम् अपूर्वोऽयं कल्पः। सुसदृश एवायम् आर्यपुत्रस्य प्रातिभस्य चक्षुषः। कियत् जनाय रोचिष्यते, इति तु अन्यत्। कामं जनः नावीन्यप्रियः, न तु सः क्रान्तिप्रायं नावीन्यं सोढुं क्षमः।

भासः — भवतु नाम। न त्वहम् अन्तःस्फुरणम् अतिक्रमिष्यामि। किं च, यदि अद्य मे कल्पना जनाय न रोचते, श्वः रोचिष्यते। सर्वत्र हि अभ्यासात् रमते। किं च, लेखकेन न केवलं जनरुचिः संमाननीया, सा स्वमतानुसारं निर्मातव्या, संस्कर्तव्या च।

संगीता — सत्यमाह भवान्। अथ महाराजः किमिव मन्येत ?

भासः — म-हा-रा-जः। न खलु शक्यं तत् तर्कयितुम्। तथापि महान् देवस्य मयि विश्वासः। वर्तते च तस्य मयि कोऽपि प्रसादातिशयः। ननु अनेन उपोद्घातेन स्मृतम्-अद्य पुनरपि महाराजः गौरवोपाधिवितरणेन मां सभाजयिष्यति। को वा स उपाधिः स्यात् ?

संगीता — ममापि अस्ति अत्र कुतूहलम्। किं तु महाराजस्य रसिकतां जानन्ती मन्ये सः अन्वर्थ एव उपाधिः स्यात् ?

भासः — यः कोऽपि भवतु। (क्षणं तूष्णीं स्थित्वा) इदमपि एकं चिन्तनीयम्।

संगीता — किं तत् ?

भासः — अस्मिन्नपि वर्षे सौमिल्लक-वसुमित्रौ स्पर्धायां पराभूतौ। सौमिल्लकस् तावत् ऋजुमनस्कोऽस्ति। नेदं स गणयिष्यति। वसुमित्रस्तु न तथा। न जाने कथं स इदं सहिष्यते ?

संगीता — एवं न्विदम्। तथापि का गतिः ? एवं नाम जीवितम्।

भासः — युक्तं भणसि। उक्तमेव भगवता व्यासेन-'प्राप्तं प्राप्तम् उपासीत।'

(प्रविश्य)

चतुरिका — स्वामिन्, आस्थानपण्डितो देवरातः द्वारि उपस्थितोऽस्ति।

भासः — आस्थानपण्डितो देवरातः ? (स्वगतम्) किमर्थं नु स आगतो भवेत् ? (किंचिद् अनिच्छया, प्रकाशम्।) प्रवेश्यताम्। (निष्क्रान्ता चतुरिका संगीता च।)

(प्रविश्य)

देवरातः — (स्वगतम्) महाराजस्य संदेशेन अत्र प्राप्तोऽस्मि। अन्यथा कस् तावत् राजप्रसादगर्वितस्य अस्य कविब्रुवस्य गृहे पादन्यासमपि कर्तुं मनसि कुर्यात् ? (भासं दृष्ट्वा) नमो नमः। कविराज! अपि प्रतिभा वर्धते ?

भासः — नमो नमः। आगच्छन्तु पण्डितराजाः। अलंक्रियताम् इदम् आसनम्।

देवरातः — (सर्वतः अवलोकयन्) अहो सश्रीकता भवनस्य! अहो शोभातिशयः वस्तु-विन्यासस्य! अहो संपन्नता उपकरण-संभारस्य!

भासः — सर्वोऽप्ययं देवस्य प्रसाद-महिमा।

देवरातः — (स्वगतम्) अहो अस्थाने महाराजस्य द्रव्योत्सर्गः। सोऽपि अस्मादृशान् पण्डितान् विलङ्घ्य अस्य अक्षर-चिन्तकस्य कृते। (प्रकाशम्) अथ किम्। अथ किम्। अस्त्येव महाराजस्य गुणग्राहिता दशसु अपि दिक्षु अशेषजनस्य कर्णातिथीभूता। साधु! शोभनम्!

भासः — अथ किंनिमित्तम् अद्य चरण-धूलि-न्यासेन कृतार्थीकृतम् अस्मदीयं गृहम्?

देवरातः — देवस्य संदेशम् आदाय उपस्थितोऽस्मि।

भासः — देवस्य संदेशः? (उत्थाय, अञ्जलिं बद्ध्वा) अवहितोऽस्मि।

देवरातः — ननु आसनस्थितेन एव कविराजेन श्रोतव्यः देवस्य संदेशः। (भासः उपविशति।) राजदारिकां भवान् जानात्येव।

भासः — (शुष्कस्वरेण) जानामि। किं ततः?

देवरातः — निपुणा। अतीव निपुणा। कुशाग्र-मतिः। अतीव कुशाग्र-मतिः।

भासः — हं।

देवरातः — अहं तत्रभवतीम् आन्वीक्षिकीं काणादं च अध्यापयामि। – भवानपि तां काव्यम् अध्यापयति इति श्रूयते। साधु। अतीव साधु! राजपुत्री अतीव निपुणा। अतीव कुशाग्र-मतिः। कुत इति चेत्...

भासः — ननु पण्डितराज! अहं देवस्य संदेशं श्रोतुम् उत्सुकोऽस्मि।

देवरातः — उच्यते। उच्यते। अद्य प्रभाते यथानित्यम् अहम् अध्यापनार्थं राजकुलं गतोऽस्मि। व्याप्ति-लक्षणं प्रस्तुतम्। कविराज! किं कथयामि? एवं दुर्ज्ञेयोऽयं विषयो नु। राजपुत्र्या तु एवं नाम झटिति अवबुद्धोऽयं विषयः। अतीव निपुणा। अतीव कुशाग्रबुद्धिः।

भासः — मन्ये महाराजस्य संदेशं श्रावयितुं भवान् अत्र प्राप्तः।

देवरातः — इदम् उच्यते। इदम् उच्यते। क्रमेण उच्यते। अद्य यावदेव अध्यापनं समाप्य निवर्तितुकामोऽस्मि, तावत् महाराजेन अहम्

आहूतः। स्वयं महाराजेन आहूतः। आज्ञप्तं च, "पण्डितराज! मद्-वचनात् गत्वा भासकविः उच्यताम्, 'इच्छामो वयम् उपाधिना सहैव किमपि पारितोषिकं प्रदानीकर्तुम्। तत् ब्रूहि, किं ते प्रियम्'" इति।

भासः — अहो महानुभावता देवस्य। पण्डितराज! मद्वचनात् विज्ञाप्यतां देवः, "कस्य वा अन्यस्य प्रसादं भुञ्जमहे? लब्धमेव सर्वं यत् लब्धव्यम्। किम् अन्यत् काङ्क्षणीयम्? देवस्य सौहार्दम् इत्थमेव मयि अखण्डितं वर्तताम् इत्येव याचे" इति।

देवरातः — उत्प्रेक्षितमेव इदं देवेन। अत एव तेन अहं प्रेषितः। कविराज! श्रूयतां मम वचनम्। नैतादृशाः अवसराः पुनरावर्तिनः। प्रसन्नोऽस्ति देवः। तद् अधुनैव याच्यतां किमपि — दासीदासं, हस्त्य-श्वं, शिबिकायानं, आभरणानि, अन्यद्वा अभिप्रेतम्।

भासः — ननु उक्तमेव मया। सत्यमेव नाहं किमपि अभि-लषामि। कोऽत्र आग्रहस्य अवसरः?

देवरातः — (स्वगतम्) प्रार्थयितुमपि बुद्धि-विभवः अपेक्ष्यते। देवः कामं यत् किमपि प्रसादीकर्तुं सिद्धो भवतु, कुतोऽयं गर्भ-दरिद्रः याचितुं जानीयात्? (प्रकाशम्) ननु कविराज। न भवान् व्यवहारं जानाति।

भासः — स्यादपि तथा। न तु अहं कश्चित् चाटुकारः इति तु सत्यम्।

देवरातः — 'यथा भवान्' इति वाक्यशेषो नु? तथापि आस्तां तावत्। क्रियतां मम वचनम्। अनभ्यस्तं राज्ञां नकार-श्रवणम्। यदि भवता राजाज्ञा न मानिता, तर्हि तत् महान्तं राजक्रोधम् उत्पादयेत्। तद् याच्यतां किमपि।

भासः — पण्डितराज! युष्मत्तोऽपि सम्यक् अहं देवं वेद्मि। नासौ क्रुध्येत्। तत् गत्वा निवेद्यतां मम प्रतिवचनम्।

देवरातः — कविराज! श्रूयतां मम उपदेशः। मा एवं राजानम् अवगणयतु भवान्। राजक्रोधो नाम सर्वसुखहानिः, सर्वदुःखप्राप्तिश्च।

भासः — अहो हास्यम् अभिधानम्। ननु प-ण्डि-त-रा-ज! यदि सुखस्य दुःखस्य च कश्चित् दाता स्यात्, तर्हि स एको भगवान् रमारमणो

नारायण एव । यदि दातव्यम्, तर्हि तेनैव । यदि ग्रहीतव्यम्, तर्हि तस्यैव सकाशात् । वयं सर्वे सूत्रबद्धाः पुत्तलिका इव । तद् आस्तां तावत् । निश्चिन्तोऽस्मि, यत् न देवः अन्यथा ग्रहीष्यति । तत् यथोक्तं प्रतिवचनं निवेद्यताम् ।

देवरातः — एष भवतो निर्णयः ?

भासः — बाढम् । एष मे निर्णयः ।

देवरातः — भवतु । का गतिः ? कथयिष्यामि । (स्वगतम्) कथयिष्यामि च देवाय यथा 'राजप्रसाद-दुर्ललितोऽयं कविमन्यः देवमपि न गणयति, तृणाय मन्यते देवम्', इति । अस्मानपि विलङ्घ्य राजकृपायाः अयम् अंशहरः अनेन निमित्तेन अविस्मरं पाठम् अध्यापनीयः । (निष्क्रान्तः ।)

(ततः प्रविशति संगीता ।)

संगीता — गत इव देवरातः ।

भासः — हं । गतः ।

संगीता — किंनिमित्तम् अत्र आगतः आसीत् ?

भासः — देवस्य संदेशम् आदाय । देवः किमपि पारितोषिकमपि मह्यं प्रसादीकर्तुम् इच्छति । तद्-विषये मम अभिप्रायं ज्ञातुं तेन देवरातः प्रेषितः ।

संगीता — (सानन्दम्) एवम् ? किं तर्हि प्रार्थितं भवता ?

भासः — प्रार्थितम्, देवस्य सौहार्दमेव मम पारितोषिकम्, केवलं तदेव अनुवर्तताम् इति । — कच्चित् संमतं ते ?

संगीता — (एक-द्वि-क्षणोत्तरम्) आर्यपुत्र ! यत् तुभ्यं रुचितम्, तत् मह्यमपि रुचितमेव ।

भासः — प्रियं मे । प्रियं मे । संगीते ! न जाने कथम् अहं देवस्य सौहार्दस्य अनृणो भविष्यामि । सत्कारोऽपि नाम सत्कारेण प्रतीष्टः प्रीतिम् उत्पादयति ।

संगीता — मन्ये सत्कारेण लब्धोत्साहः नाथस्य अधिकतरः प्रतिभा-विलास एव देवस्य अभिमतं प्रतिप्रियं भवेत् ।

भासः — सुष्ठु उक्तम् । आर्य, एकं कर्तव्यं तावत् साधु स्मृतम्। विदितमेव ते यद्, यत्किचित् मया साहित्ये कर्तु पारितम्, तत्र उपाध्यायो ज्ञाननिधिरेव कारणम् । तेनैव शास्त्र-कलानां मुक्तहस्ताभ्यां वितरणेन अहम् एवं संस्कारितः । यदि परमकारुणिकेन तेन अयं जनः संवर्धितो विनीतश्च नाभविष्यत् ... न जाने का मम गतिः अभविष्यत् । तद् युक्तम् अस्मिन् दिने तद्दर्शनेन आत्मानं पावयितुम् ।

संगीता — युक्तमाह आर्यपुत्रः । भवतु एतन्मङ्गलादिः अद्यतनीयः समारोहः । तदेहि । उपाध्यायं द्रष्टुं गच्छावः । (निष्क्रान्तौ)

(जवनिका-पातः ।)

द्वितीयं दृश्यम् ।

[स्थानम् — राजप्रसादः । राजसभा संमिलिता अस्ति । अमात्यः, उपाध्यायः ज्ञाननिधिः, आस्थानपण्डितः देवरातः, नाटककारौ वसुमित्र-सौमिल्लकौ, अन्ये च स्वे स्वे स्थाने उपविष्टाः सन्ति ।]

वसुमित्रः — (जनान्तिकम्) तस्य कार्यस्य का वार्ता ?

देवरातः — विपन्नप्रायं तत् ।

वसुमित्रः — कथमिव ?

देवरातः — मया प्रयत्नः कृतः । किं तु देवस्य महान् खलु पक्षपातः भासे ।

वसुमित्रः — अधुना किं कर्तव्यम् ?

देवरातः — अनुकूलस्य कालस्य प्रतीक्षा । किमन्यत् ?

वसुमित्रः — हं । इत्थमेव जरा आगमिष्यति ।

देवरातः — मा भवान् एवम् अङ्गानि मुञ्चतु ।

वसुमित्रः — का तर्हि प्रतिपत्तिः ?

देवरातः — तिष्ठ । एष भासः प्रविशति । (ततः प्रविशति भासः, संगीता, शारद्वतश्च । संगीता परिवृत्य शुद्धान्तकृते रक्षितं यवनिकाच्छन्नं प्रकोष्ठं गच्छति । उपस्थिताः सभ्याः 'अये ! एष भासः', 'आगच्छतु कविराजः' 'नमो नमः कविराज !' इत्यादिभिः शब्दैः स्वागतं व्याहरन्ति । भासः उपाध्यायं प्रणम्य आसने उपविशति । तत्समीपे शारद्वतश्च)

शारद्वतः — (जनान्तिकम्) आचार्य ! को नु खलु असौ महार्हकम्बल-परिवृतः पण्डितमानी इव?

भासः — (वीक्ष्य, स्मयमानः) सः ? स तावत् आस्थानपण्डितः देवरातः ।

शारद्वतः — किं स एव, यः अद्य प्रभाते अस्मद्गृहम् आगतः ?

भासः — अथ किम् ? किं निमित्तं पृच्छसि ?

शारद्वतः — न जाने । किं तु मन्ये ... मन्ये ...

भासः—श्ऽऽऽ! एष प्रविशति देवः। (उद्घोषकः उद्घोषयति।)

उद्घोषकः — एष प्रविशति दिनकर-कुल-प्रसूतिः, प्रतियोद्धृ-भयंकरः,गोब्राह्मण-प्रतिपालकः,सरस्वतीकण्ठाभरणः दिगन्तविश्रान्तकीर्तिः, सागराम्बरवसुंधरैकपतिः, नृपति-सार्वभौमः महाराजाधिराजो राजसिंहः । साऽऽवधानम् । साऽऽवधानम् ।(सर्वे उत्थाय अभिवादयन्ति। राजा प्रणामस्वीकारपूर्वकं स्वासनम् आरोहति । तदनु सभ्याः उपविशन्ति ।)

राजा — अमात्य ! प्रस्तूयतां सभाकार्यम् ।

अमात्यः — (उत्थाय) यत् देवः आज्ञापयति । अयि पौरजानपदाः ! विदितमेव उपस्थितानाम् अत्रभवतां सर्वेषां यत् गतवर्षात् आरभ्य अत्र देवेन नाट्योत्सवः प्रारब्धः । को वा इदं न जानाति, यत् यथैव अस्माकं महाराजः समरधुरंधरः, तथैव काव्यकलाकुशलोऽपि इति ? किं च, नूनं भाग्यवन्तो वयम्, यैः तादृशो महाराजः लब्धः, यो न केवलं स्वयं कविः, किं तु कवीनाम् आश्रयोऽपि। एतादृशेन काव्यरसिकेन, नाट्याभिज्ञेन च देवेन आरब्धस्य नाट्योत्सवस्य इदं द्वितीयं वर्षम् । पूर्वेद्युरेव नाट्य-स्पर्धा समाप्ता, या अत्रभवद्भिः सर्वैः प्रत्यक्षीकृता स्यादेव । अद्य पारि-तोषिकवितरणं नाम नाट्योत्सवस्य अन्तिमो भागः संपत्स्यते । विदितचरम् एव सर्वेषां यत् अस्मिन् वर्षेऽपि श्रीभासकवेः नाटकम् – अविमारकम् – सर्वोत्कृष्टत्वेन निर्णीतम् अस्ति । अधुना देवः महाकविं भासं गौरवो-पाधिसमर्पणेन सभाजयिष्यति । (उपविशति ।)

राजा — (उत्थाय) अयि काव्यनाटकानुरागिणः पौरजानपदाः ! महद् इदं प्रमोदस्थानम् यद् वयम् अद्य अत्र उपस्थातुं समर्थाः स्मः । महद् इदं भाग्यम् इति अस्माकं मतिः । जानन्त्येव अत्रभवन्तः यत् कुत-श्चित् कालात् आरभ्य नूतनमेव किंचित् परचक्रम् उपस्थितम् अस्ति । तस्यैव प्रतीकारे गतान् द्वित्रान् मासान् अन्यैः राजभिः सह वयमपि व्यापृताः

स्मः। नाद्यापि तद् भयं सर्वथा समूलं विनष्टमस्ति। तथापि अस्ति कश्चित् उच्छ्वासावसरो लब्धः, येन वयम् अत्र उपस्थातुं प्राभूम। यथा परचक्रादिभ्यः प्रजानां रक्षणं राजकर्तव्यम्, तथा साहित्यकलादीनां रक्षणं वर्धनं च इत्येतदपि राजकर्तव्यमेव इति वयं मन्यामहे। राजा प्रकृतिरञ्जनात्। अत एव अस्माभिः गतवर्षात् आरभ्य अयं नाट्योत्सवः प्रवर्तितः। तस्मिन् वर्षे भासकवेः स्वप्नवासवदत्तं नाटकं सर्वोत्कृष्टत्वेन परिषदा निर्णीतम्। तस्मिन् अवसरे यशस्विनम् इमं कविराजं सभाजयितुम् अस्माभिः 'उदयन-कथाकोविदः' इति गौरवोपाधिः तस्मै वितीर्णः। एषमोऽपि भासस्यैव नाटकं 'अविमारकम्' नाम तैस्तैर् गुणैः सर्वातिशायि इति निर्णीतमस्ति परिषदा। ईदृशः गुणवतः कवेः संमानं कर्तुम् अस्माभिः पुनरपि अयम् अवसरो लब्धः इति हेतोः वयम् आत्मानं धन्यं मन्यामहे। तद् इदानीं कविराजो भासः इमं गौरवोपाधिं स्वीकर्तुं प्रसीदतु। (भासः उत्तिष्ठति।) जानाम्यहं यत् को नाम अयम् उपाधिः इति ज्ञातुं भवन्तः उत्सुकाः स्युः। उपाधिः अस्ति ... (क्षणं विरम्य) 'कविताकामिनीहासः'। तदिदानीं कविराजाय श्रीमते भासाय वयं गौरवोपाधिं समर्पयामः। (भासम् उपगम्य तस्य उरसि वस्त्रे आसञ्जयति। जनानां तालिकानादः। भासः राजानं सभां च प्रणम्य उपविशति।) दृढं हि वयम् आशास्महे, यत् इतः परमपि शोभनात् शोभनतराणि भासनाटकानि वयं द्रष्टुं लप्स्यामहे। विलसतुतरां नाट्यश्रीहासः श्रीभासकारणात्। भो रसिकाः! अनेन प्रसङ्गेन वयं किंचित् उद्घोषयितुम् इच्छामः। यदि कोऽपि नाटककारः अखण्डं वर्षत्रयं सर्वश्रेष्ठत्वेन निर्णीयेत, तर्हि वयं तं 'नाटकचक्रवर्ती' इति पदेन संमानयिष्यामः। यथा भासः इमं गौरवम् आसादयितुं प्रयतेत, तथा (सौमिल्लकवसुमित्रयोः प्रति दृष्टिपातं कृत्वा) कश्चित् अन्योऽपि नाटककारः भासेन सह स्पर्धेत इत्यपि वयम् आशास्महे। न हि स्पर्धासदृशः सुप्तगुणानां प्रकाशयिता अन्यो हेतुः। स्पर्धया तु निकोपया भवितव्यम्। वयं सौमिल्लकवसुमित्रौ मित्रत्वेन उपदिशामः, यत् ताभ्यां सांप्रतिकम् अयशः अविगणय्य, उत्साहम् आहार्य पुनरपि विजिगीषया प्रयतितव्यम्। आस्तां तावत्। नास्ति अस्माकं बहु भाषितव्यम्। खड्गव्यापारे समर्था वयम्, न वाचां पल्लवने। प्रतीक्षते च

अस्मान् समरः । अपूर्वस्य अस्य परचक्रस्य प्रतिकारार्थम् अद्यापि अनेक-राजबलं संघटनीयम् । यदा तु विजयिनो भूत्वा निर्वतिष्यामहे, तदा अस्मद्विनोदार्थं कविताकामिनीहासस्य श्रीभासस्य किमपि नवीनं रससान्द्रं नाटकं सिद्धं स्यात् इति आशास्महे । (सहसा स्मृतिम् अभिनीय) एकं तावत् विस्मृतमेव आसीत् । न केवलं गौरवोपाधिप्रदानेन वयं संतुष्यामः । न हि शब्दमात्रेण क्षुधा शाम्यति, आरामो वा लभ्यते । अतः किंचित् व्यावहारिकमपि प्रार्थयितुम् अस्माभिः भासः आदिष्ट आसीत् । प्रकृत्या निरिच्छस्तु सः न किमपि प्रार्थयते । अतः वयमेव किंचिद् उद्घोषयितु-कामाः । अद्यप्रभृति कविराजस्य मासिकी संभावना द्विगुणीकृता अस्ति, संचारार्थं च शिबिका प्रसादीकृता अस्ति । (उपरमति। तालिकानादः ।)

भासः — (उत्थाय) अयि परगुणपरमाणूनां पर्वतीकरणप्रवीणाः सभ्याः ! योऽयं संप्रति मम सत्कारः, कृतः, न जाने कथं तस्य आनृण्यम् अहं गच्छेयम् इति । यत्सत्यम्, सत्कारात् अहं बिभेमि । स हि अहंकारं पुष्णाति । अथ वा साधूक्तं भगवता मनुना "संमानाद् ब्राह्मणो नित्यम् उद्विजेत विषादिव" इति। अद्याहं सर्वजनप्रकाशं कथयितुम् इच्छामि, यद् यदि मयि कश्चित् गुणलेशः स्यात्, तर्हि स सर्वथा मम गुरुदेवानां श्रीमतां ज्ञाननिधिचरणानामेव निर्व्याजकरुणामूलक इति अयं संमानः वस्तुतः तेषा-मेव अस्ति। तेषामेव च प्रतिनिधिभूतेन स मया स्वीक्रियते। जानामि,देवस्य मयि कश्चित् अहेतुकः पक्षपातो वर्तते । नूनम् अन्यस्मिन् जन्मनि मया किमपि अवदातं कर्म कृतम्, येन मया ईदृशः उदारमतिः आश्रयो लब्धः। यद्यपि अशक्यं मया तस्य सर्वथा अनृणीभवितुम्, तथापि देवेन प्रकटिता अपेक्षाः अंशतोऽपि सफलयितुं सर्वात्मना अहं प्रयतिष्ये। उत्सहे च कालान्त-रेण समरनिवृत्तस्य विजयिनस् तस्य कामपि अपूर्वां नाटकमालां स्वागती-कर्तुम्। भो रसिकाः। अहं यत् लिखामि, न तत् कवियशःप्रार्थितया, न वा गौरवोपाधि-विजिगीषया । कयापि दुर्निवारया अन्तःप्रेरणया प्रचोदितोऽहं लिखामि। अन्तर् उत्तिष्ठन्तीनाम् ऊर्मीणां प्रशमनार्थं नाटकानि प्रणेष्यामि, न नाटक-चक्रवर्ति-पदलिप्सया । रामायण-महाभारतयोः नाट्यरूप-प्रदानं मया संकल्पितम् अस्ति । अपूर्वोऽयं प्रयोगः । तं मम दृष्ट्यनुसारेण, मत्यनुसारेण, कल्पनानुसारेण च उपस्थापयिष्यामि। आशासे, स युष्मभ्यं

रोचेत इति । आस्तां तावत् । अन्यदा शब्दपल्लवनसमर्थोऽप्यहं नाद्य मम भावनाव्यञ्जनसमर्थान् शब्दान् उपलभे । अतः केवलं देवं प्रति कृतज्ञतां प्रकटय्य अत्रैव विरमामि ।

अमात्यः — समाप्तमस्ति सभाकार्यम् । (प्रथमं राजा, अनन्तरम् अन्ये जनाः निष्क्रान्ताः । भासस्य सौमिल्लकादयः सुहृदः तम् उपगम्य दिष्टया वर्धयन्ति । अत्रान्तरे संगीताऽपि तत्र प्राप्नोति ।)

सौमिल्लकः — दिष्टया वर्धते भवान् । (भासम् आलिङ्गति ।)

संगीता — प्रियं मे ! प्रियं मे ! लब्धं जीवितफलम् ।

शारद्वतः — अहो महानुभावता देवस्य ।

भासः — मनोरथानामपि अभूमिः एष सत्कारः ।

शारद्वतः — उत्कृष्टः खलु समारम्भः ।

(प्रविश्य)

राजसेवकः — आर्य ! सिद्धास्ति शिबिका । तदेतु आर्यः ।

(भासः विचिन्तयंस् तिष्ठति ।)

संगीता — किं विचिन्तयति आर्यपुत्रः ? ननु गच्छतु । लभेय तावत् नेत्रनिर्वाणम् । (भासो निष्क्रान्तः । सर्वे तां दिशम् अवलोकयन्तः तिष्ठन्ति । ततः —) शारद्वत ! पश्य, पश्य । एष गच्छति शिबिकारूढः आर्यपुत्रः । तदेहि । वयमपि गच्छामः । (निष्क्रान्ताः सर्वे ।)

इति प्रथमोऽङ्कः ।

दीपावली-शुभ-चिन्तनम्

ऊर्जारूपेण या शक्तिः सर्वयन्त्रेषु राजते ।
'ज्योति'र्नाम्ना सुविख्याता नमस्तस्यै नमो नमः ॥

JYOTI Hydel sets, Turbins, Power Electronics Equipment,
Chemical & Special Purpose Pumps Circuit
Breakers & Switchboards

JYOTI LIMITED, BARODA 3

ज्योति

ज्योति लिमिटेड
वटोदरम्
390 003

दूरवाणी
8851 (पञ्चशाखाः)

TELEX-JYOTI
BRD—214

तन्त्री
Jyotipumps

शारदा – १९ : १-२ ★ रजि.क्र.पीएन्सी.१४५ ★ लायसेन्स क्र. ४४
पुण्यपत्तने 411 030 पृथक्करण-क. [illegible]याय ३०–११–७७ दिने समर्पितम्

भारतवर्षे सर्वप्रियं ऑफ्सेट-यन्त्ररत्न-द्वयम्

★ आन्ध्र-केरळ-तमिळनाडु-कर्णाटक-गोमन्तक-महाराष्ट्र-मध्यप्रदेश-गुजरात-राजस्थान-पञ्जाब-दिल्ली-उत्तरप्रदेश-बिहार-वङ्ग-प्रभृति-राज्येषु —

★ श्रीहरिकोटा (सिल्लूरपेट)-सहारणपुर-अमदाबाद-वटोदर-जमशेटपुर-कलकत्ता-जोधपुर-भो(ज)पाल-दिल्ली-बेती-बङ्गलोर-तिरुअनन्तपुर(त्रिवेन्द्रम्) कोडाईकनाल-मद्रास-मुम्बई-पुण्यपत्तन-नागपुर-अकोला-वणी-अमरावती-प्रभृति-नगरेषु —

सार्धशतं (१५०) स्विफ्ट्स् 150 यन्त्राणि

तथा

विविध-नगरेषु – **स्विफ्ट्स् 300 यन्त्राणि विराजन्ते।**

★ स्वयम् आगत्य द्रष्टव्यं संपूर्ण-भारतीयं यन्त्र-रत्न-द्वयम्।

स्विफ्ट्स् प्रायव्हेट लिमिटेड

दूरवाणी) **मराठे उद्योग भवनम्** (451323

अप्पासाहेब मराठे मार्गः, प्रभादेवी, मुम्बई 400 025

संपादकः मुद्रकः प्रकाशकः स्वामी – वसन्त अनन्त गाडगीळ, B.A. B.Ed.
कार्यालयः – दूरवाणी ४२१९७ सुमनागर, १७०/५/अ, पर्वती, पुणे ४११ ००९
मुद्रणस्थलम् – यशवन्त मुद्रणालयः, १८३५ सदाशिव, पुण्यपत्तनम् ३०.
प्रकाशनस्थलम् – श्री. ल. म. चक्रदेव, ३१८ राममोहनमार्गः, मुम्बापुरी ४.
खजिना-महाल-भवनम्, ४२५ सदाशिव, पुण्यपत्तनम् ३०
पत्र-मञ्जूषा (पोस्ट-बॉक्स) क्र. ७५०, पुणे ४११०३०.

॥ वाग् भूषणं भूषणम् ॥

भारतवर्षे संस्कृत-वाक्-पटुता-क्षेत्रे महाराष्ट्र-राज्यम् अग्रेसरत्वेन विख्यातम् । उज्जयिनी-क्षेत्रे कालिदास-महोत्सवीय-संस्कृत-वाक्-पाटव-स्पर्धायां पुण्यपत्तनात् गतेन छात्र-द्वयेन विजिता अजय्य-पदस्य रजत-वैजयन्ती । शारदा-भक्तोत्तमः श्री. जोग प्रमोदशर्मा भारत-विदेश-व्यवहार-मन्त्रिणः श्री. अटलबिहारी वाजपेयी-महोदयस्य करकमलाभ्यां स्वीकरोति प्रथम क्रमाङ्क-पारितोषिकत्वेन सुवर्ण-पदकम् ।

सहर्षं हार्दम् अभिनन्दनम् । — संपादकः

• •

शारदा
संपादक वसन्त अ. गाडगीळ
१६ आग्रहायण १८९९
७ डिसेम्बर १९७७